UNIVERSAL
LIBRARY
OU_184022
UNIVERSAL
LIBRARY

MADRAS UNIVERSITY SANSKRIT SERIES No. 7. PART 4.
GENERAL EDITOR
DR. C. KUNHAN RAJA, M.A., D.PHIL. (OXON)
HEAD OF THE DEPARTMENT OF SANSKRIT

THE UṆĀDISŪTRAS IN VARIOUS RECENSIONS

PART IV

AUṆĀDIKAPADĀRNAVA

AUṆĀDIKAPADĀRNAVA

BY

PERUSŪRI

EDITED BY

T. R. CHINTAMANI, M.A., PH.D.
SENIOR LECTURER IN SANSKRIT, UNIVERSITY OF MADRAS

UNIVERSITY OF MADRAS

1939

PRICE RS. 4.]

PRINTED AT THE
HINDI PRACHAR PRESS,
TYAGARAYANAGAR, MADRAS.

मद्रपुरीयविश्वविद्यालयसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः ७.

औणादिकपदार्णवः

पेरुसूरिविरचितः

संपादकः

ति. रा. चिन्तामणिः

मद्रपुरीयविश्वविद्यालयः

१९३९

CONTENTS

Foreword	...	ix
Preface	...	xi
Introduction	...	xiii
List of works and authors referred to	...	xix
Text	...	१—२०४
Index of Sūtras	...	१—९
Index of words	...	११—५४
Errata	...	५५

FOREWORD

The Auṇādikapadārṇava is a work in the form of metrical stanzas, dealing with an explanation of the Uṇādi Sūtras of Pāṇini. The manuscripts on which the edition is based are incomplete and as such it is not possible to present the work in its complete form. The importance and usefulness of this work is quite plain. I have very great pleasure to introduce it in this series.

University of Madras.
1st March, 1939.

C. KUNHAN RAJA,
General Editor.

PREFACE

The Auṇādikapadārṇava of Perusūri, which is being issued now for the first time as the fourth part in the "Uṇādi Sūtras in Various Recensions" is based on two copies of the work, one in palm leaf and the other in paper, both deposited in the Government Oriental MSS. Library, Madras. The records do not show, but it is very likely that of the two, the paper manuscript in Devanāgari is a transcript made from the palm leaf original in Telugu characters, as the errors of omission and commission, happen to be common. In the alternative, the original might have been the same for the paper as well as palm leaf MSS. now available. For all practical purposes therefore, it should be admitted that the present edition is based on a single manuscript.

Brahmaśrī Rao Bahadur S. K. Padmanabha Sastrigal, formerly of the Presidency College, Madras, and now of the Madras Sanskrit College, has been, as usual, unstinting in his willingness to help me in this publication. He has found time in spite of delicate health and heavy work, to read through the proofs and make valuable suggestions and I wish to express my grateful thanks to him. Brahmaśrī S. K. Ramanatha Sastrigal, my former Colleague in the University was good enough to read through a major portion of the proof and I am much

indebted to him. Dr. C. Kunhan Raja, my colleague and Head of the Department has been of great help to me in this, as in other publications, and I am much obliged to him. I thank the Curator of the Government Oriental MSS. Library, Madras, for having placed the manuscript at my disposal for a long time.

Calcutta,
1-2-1939.

T. R. CHINTAMANI.

INTRODUCTION

The Auṇādikapadārṇava, as the name indicates, is as it were an ocean of words derived through the Uṇādi sūtras. Perusūri, the author tells us that his father and mother bore the same name—Veṅkaṭeśvara. As the name of a lady, the word Veṅkaṭeśvara would have taken the form Veṅkamma, Veṅkaṭammā or Veṅkaṭāmbā. He probably hailed from the city of Kāñcīpura in the Chingleput District of the Madras Presidency. This hypothesis is based on the remaks of the author in the opening passage[1] where he pays his respects to Śrī Kāmākṣī, the presiding deity of the city of Kāñcīpura. He says :—

श्रीकाञ्चीनगराधासामाकाङ्क्षितफलप्रदाम् ।
कामारिप्रेयसीं शश्वत्कामाक्षीं कलयामहे ॥

And at the end of the first pāda again we find

कामिनि कामद्विषतः कामितफलदायिनि प्रपत्तिजुषाम् ।
कामिह शरणयिताहे कामाक्षि विना दयावतीं भवतीम् ॥[2]
अम्ब कामाक्षि कल्याणि शम्बरारातिजीविके ।
बिम्बशोणाधरे चन्द्रबिम्बकान्तानने नमः ॥[3]

Unless the author had something to do with the city of Kāñcīpura, it is difficult to explain why he chose the presiding deity of that city for special worship.

Very little is known about the personality of the author, except the fact that both his parents bore the same name, even like Jaratkāru of Purāṇa fame. They were named Veṅkaṭeśvara. In all likelihood the father was

1. Page 1.
2. Page 80.
3. Page 81.

known by the name Veṅkaṭeśvara and the mother, Veṅkammā or Veṅkaṭāmbā. The name Perusūri is generally associated with Āndhras in this part of the country and it is not unlikely that Perusūri was an Āndhra himself. It may be mentioned, by the way, that in the past, as now, there were many Āndhras domiciled in Kāñcīpuram and many of them were great scholars to add. In addition, he tells us that he belonged to the family of Śrīdhara in the verse

इति श्रीधरवंश्येन रचिते पेरुशास्त्रिणा

which occurs as the colophon at the end of the second[1] and the third[2] pādas. But who that Śrīdhara was, we are not in a position to know.

In the verses

स्वशय्यापक्षपातेन तदुक्तिव्याचिकीर्षया।
अवतीर्णं हरिं वन्दे वासुदेवाध्वरिच्छलात् ॥
तच्छिष्योऽहं पेरुसूरिर्मयोणादिपदार्णवः ॥[3]

Perusūri tells us that he is the pupil of one Vāsudevādhvarin, who was the very God Mahāviṣṇu descended into the mortal world, merely with a desire to comment upon the work, composed by one who was his bed in Vaikuṇṭha. In other words, Patañjali the author of the Mahābhāṣya is generally believed to have been an avatāra of Ādiśeṣa and since the teacher of Perusūri was known by the name of Vāsudeva, the author cleverly puts it that Mahāviṣṇu Himself has come down on account of His partiality to Ādiśeṣa, to comment upon his work, the Mahābhāṣya.

Now, who is this Vāsudevādhvarin? In grammatical literature, we find only one Vāsudevādhvarin so far, and that is the author of the Bālamanoramā; but it should be

1. Page 121.
2. Page 162.
3. Page 1.

borne in mind, that it is not a commentary on the Mahābhāṣya. The expression तदुक्तिव्याचिकीर्षया need not necessarily mean that a commentary was composed; perhaps Vāsudevādhvarin was a good exponent of the Mahābhāṣya, in which case, he might have been identical with the author of the Bālamanoramā. If we thus assume that he was a pupil of Vāsudevādhvarin, his date may be put, with a fair amount of certainty, in the beginning of the 18th century. But there are certain other difficulties in the way. Among the works and authors mentioned by Perusūri, we do not find anybody that is later than 1400 A.D. Among those mentioned, the Medinī Kośa happens to be the latest, from the chronological point of view. Among the commentators on the Uṇādi Sūtras, he mentions only two i.e. that of Ujjvaladatta and the Daśapādīvṛttikāra; and these are older than 1300 A.D., The omission of Bhaṭṭoji's name is significant. It may not be unreasonable to suppose that Perusūri lived after 1350 and before 1600 A.D. the probable date of Bhaṭṭoji Dīkṣita, but an argument from negation cannot go a long way.

Again, the points of similarity between the commentary of Perusūri and that of Jñānendra Sarasvati on the Uṇādi portion of the Kaumudī are many and one can certainly assert that one or the other of the two had occasion to look into the work of the other. If Vasudevādhvarin were the same as the author of the Bālamanoramā, then Perusūri is certainly indebted to Jñānendra Sarasvati. Bhānuji Dikṣita, the son of Bhaṭṭoji and author of the Vyākhyāsudhā, a commentary on the Amarakośa quotes certain verses anonymously in connection with the meanings of particular words and they are found in the Auṇādikapadārṇava. But one is not sure whether those verses have not been extracted from other lexicons by the author of the Auṇādikapadārṇava also. Under these

circumstances, the problem of the date of Perusūri should be left an open question.

A few remarks have to be made on the nature of the method adopted by the author in this work. He tells us at the outset that his is a critical edition of the text of the Uṇādi sūtras, indicating the differences in the readings of the text, and discussing which sūtras do not form part of the text and which sūtras have been mistaken by others as not genuine, i·e. to be later accretions. He says:—

प्रक्षिप्तसूत्रत्यागश्च क्लिष्टसूत्रार्थवर्णनम्।
तत्पाठभेदकथनं सन्दिग्धप्रक्रियाकथा ॥[1]

Again, before beginning his comments on the first sūtra, he says सांप्रदायिकोऽयं पाठः। अन्ये तु "कृपावाजि" इति वापाभात् व्यत्ययेन पठन्ति ॥[2] Again on the third sūtra he says केचिदत्र रसिं न पठन्ति।[3] Instances may be multiplied, but particular attention is invited to the following passages one occurring at the end of first pāda, where we find

अस्मिन्पादे "सप्यशूभ्यां तुट् च" इत्यनन्तरम् "नुदंशोर्गुणश्च" इति, "सहेः षप् लुक् च" इति च सूत्रद्वयं नवन्, दशन्, षट् इति शब्दव्युत्पादकमुज्ज्वलदत्तेन व्याख्यातम्। एवम् "मृजेश्च" इत्यनन्तरम् "खण्डेश्च" इति सूत्रम्। एवमन्यैरपि तैस्तैः वृत्तिकारैः कानिचित्सूत्राणि अधिकानि व्याख्यातानि। सूत्रक्रमभेदश्च भूयान् परिदृश्यते। पाठभेदाश्च भूयांसः इति सांप्रदायिक एवाश्रित इत्यलं बहुना ॥[4]

and the other in the beginning of the fourth pāda where the author says:—

अत्र प्रत्ययेषु मतभेदात् सूत्रपाठभेदः। आद्यस्य निरनुबन्धकस्य पाठादलीयतुजित्यादि। इष्ठचः स्थाने इष्णुच् पठ्यते। इन्स्थाने इशन्।

1. Page 2.
2. Page 2.
3. Page 10.
4. Page 80.

इथिन्स्थाने इथिः । उत्यनन्तरं असत्यस्थाने अच्चः अषो वा । तदनन्तरस्य आस इति दीर्घादिः, अस इति ह्रस्वादिर्वा । उभयथापि न सन्धिविशेषः ॥[1]

In commenting upon the sūtras, which he does in metrical form, the author takes us, wherever necessary, through all the processes of derivation, citing the sūtras on which the particular *prakriyā* is based. One instance will suffice :—

अतिकारुरतिक्रान्ता कारूमत्र तु नोङ् भवेत् ।
ङीबुक्त्यनन्तरो हि स्त्रीप्रत्ययोऽनुपसर्जनात्[2] ॥
नात्र तत्पुरुषत्वेऽपि पैरवल्लिङ्गता भवेत् ।
ह्रिग्वादिवाक्येन गतिसमासे तन्निषेधतः ॥
कुगत्यादिसमासोऽत्र गतिशब्दोपलक्षितः ।
ईको ह्रस्वोऽङ्य इत्युक्तेस्तस्योत्तरपदे परे ॥
भवेत्कारुपतिः कारूपतिरित्यादि सर्वतः ।
सह्रस्वाह्रस्वभेदेन द्विधा रूपविनिर्णयः ॥[3]

In addition to giving the *prakriyā* in full, we find the author attempting at giving the forms that could be derived from the word, whose derivation is sought to be explained in the sūtra. He says

प्रसङ्गात्क्वचिदन्येषामपि संस्पर्शशालिनाम् ।
व्युत्पादनमिह प्रायः क्रियते धीविवित्तये ॥

I shall illustrate this point by mentioning all the forms that are mentioned by the author as could be derived from the word कारु, whose derivation is given in the first sūtra. They are :—

कारुः ; कारूः ; अतिकारुः ; कारुपतिः ; कारूपतिः ; कारुतमा ; कारूतमा ; कारुतरा ; कारुचेली ; कारुचेलितमा ; कारुका ; कारुकाभार्या ; बाहुकारूकः ;

---

१. Page 163.
२. Pā. IV-i-13.
३. Pā. IV-i-14.
४. Pā. II-iv-26.
५. Pā. II-ii-18
६. Pā. VI-iii-61.
७. Page 3.

कारुभार्यः; कारवः; कारविः; कारवायणः; कारवायणिः; कारवायणी; कारेयः; कारेयी; कारवीभार्यः; कारवकः; कारविका; कारविकाभार्यः; कारुकम्; कारवीयः; कारुमयम्; कारूमयम्; कारव्यम्; जरत्कारुः; जारत्कारवः; जारत्कारेयः।

Obviously the scheme of the author is very ambitious; and one should admit that the author has succeeded in a remarkable degree in his scheme. It is really, therefore, unfortunate that such an informing work as this, is not available beyond the middle of the fourth pāda (IV-156). Let us hope that ere long, a complete copy of the work would be available for presenting the work, in its entirety.

T. R. CHINTAMANI.

LIST OF

WORKS AND AUTHORS REFERRED TO

		Page. Verse.
Bopadeva	...	50—523.
Daśapādī	...	60—637; 128—63; 152—321; 153—341; 159—404; 163—6; 169—66; 180—189; 188—288.
Daśapādīvṛtti	...	180—191.
Dharaṇi	...	148—279.
Dvirūpakośa	...	10—93; 163—5, 172—103.
Kaiyaṭa	...	138—169; 141—206.
Keśavamālā	....	11—107.
Mādhava	...	99—178.
Māgha	....	60—637.
Maitreya	...	50—524.
Mantrabhāṣya	....	170—82.
Medinī	...	38—395; 148—279.
Nyāsa	...	50—522.
Purāṇa	...	182—212.
Rabhasa	....	148—279.
Rakṣita	....	163—4.
Śabdārṇava	....	158—387.
Saṃsāṛāvarta	...	39—405.

	Page.	Verse.
Śrīpati	...	38—394.
Ujjvaladatta	...	141—206; 147—271; 169—66; 188—288.
Vāmana	...	25—259.
Vedabhāṣya	....	150—306.
Vedanighaṇṭu	...	85—36.
Viśvaprakāśa	....	1—8; 147—271; 148—279.
Vṛttikāra	...	41—421.
Yājñavalkya	....	114—336.

॥ श्रीपेरुसूरिविरचितः ॥

॥ औणादिकपदार्णवः ॥

प्रथमः पादः

आदिव्याकरणादीनां प्रामाण्यं यन्निबन्धनम् ।
तस्मै विश्वात्मने वृद्धप्रयोगब्रह्मणे नमः ॥ १ ॥

श्रीकाञ्चीनगरावासामाकाङ्क्षितफलप्रदाम् ।
कामारिप्रेयसीं शश्वत्कामाक्षीं कलयामहे ॥ २ ॥

जरत्कारू इवान्योन्यमाख्ययानन्ययोत्सुकौ ।
श्रीवेङ्कटेश्वरौ मातापितरौ संश्रये श्रियै ॥ ३ ॥

स्वशय्यापक्षपातेन तदुक्तिव्याचिकीर्षया ।
अवतीर्णं हरिं वन्दे वासुदेवाध्वरिच्छलात् ॥ ४ ॥

तच्छिष्योऽहं पेरुसूरिर्मयोणादिपदार्णवः ।
क्रियते बालबोधाय वृद्धप्रामाण्यशासनात् ॥ ५ ॥

पञ्चपादीप्रकारेण सिद्धान् शब्दानुणादिषु ।
संगृह्य पद्यैः क्रमशस्तत्तदर्थो निरूप्यते ॥ ६ ॥

प्रसङ्गात्क्वचिदन्येषामपि संस्पर्शशालिनाम् ।
व्युत्पादनमिह प्रायः क्रियते धीविवित्तये ॥ ७ ॥

कोशान्विश्वप्रकाशादीन् पर्यालोच्य विशेषतः ।
वृत्तीश्चोणादिसूत्राणां प्रयोगाणामपि स्थितिम् ॥ ८ ॥

असन्देहाय लिङ्गानां नाम्नामपि सविस्तरम् ।
कृतस्सतां मुदे भूयादौणादिकपदार्णवः ॥ ९ ॥

स्त्रीपुंनपुंसकाख्यानां लिङ्गानामिह निर्णयः ।
अन्यकोशेष्विव प्रायो ज्ञेयः प्रकरणादिना ॥ १० ॥

प्रक्षिप्तसूत्रत्यागश्च क्लिष्टसूत्रार्थवर्णनम् ।
तत्पाठभेदकथनं सन्दिग्धप्रक्रियाकथा ॥ ११ ॥

एषा चतुष्टयी कोशादन्यस्था[स्मा]दिह भेदिका ।
उणादयो बहुलमित्युक्तिराचार्यदर्शिता ॥ १२ ॥

सर्वेषामप्युपाधीनामन्यथात्वस्य साधिका ।
तेन लोपागमादेशप्रकृतिप्रत्ययस्वराः ॥ १३ ॥

यथाकामं विभिद्यन्ते स्याच्च वर्णविपर्ययः ।
संज्ञासु[1] धातुरूपाणीत्यादिवार्तिकशासनात्[2] ॥ १४ ॥

अप्यशिष्टाः सूत्रकृता संज्ञाः साधयितुं क्षमाः ।
संज्ञायां[3] वर्तमाने[4] च कालेऽर्थे स्युरुणादयः ॥ १५ ॥

क्वचिद्भूतेऽपि दृश्यन्ते गम्यादिस्तु भविष्यति ।
दाशगोघ्नौ[5] संप्रदाने कारके विनिपातितौ ॥ १६ ॥

भीमादयोऽप्यपादाने तदन्यार्था उणादयः ।
असंज्ञायामपि भवन्त्येते बाहुलकात्क्वचित् ॥ १७ ॥

कृवापाजिमिस्वदि-साध्यशूभ्य उण् ॥ १-१ ॥

सांप्रदायिकोऽयं पाठः । अन्ये तु "कृपावाजि" इति वापाधातू व्यत्ययेन पठन्ति ।

कारुश्शिल्पीन्द्रयोश्शिल्पे कारके विश्वकर्मणि ।
संज्ञाजातिक्रियास्वेवमेष त्रैधमभूदिह ॥ १८ ॥

जातित्वे तु स्त्रियां कारूः ऊङ्[6]तस्सूत्रदर्शनात्[7] ।
मनुष्यजातेरुत ऊङूह्योऽन्यत्राप्ययोपधात्[8] ॥ १९ ॥

१. Pā. III-i-1.
२. Vā. III-i-1.
३. Pā. III-ii-185.
४. Pā. III-ii-123.
५. Pā. III-iii-2.
६. Pā. III-iii-3.
७. Pā. III-iv.73.
८. Pā. III-iv-74.
९. Pā. IV-i-66.

अतिकारुरतिक्रान्ता कारूमत्र तु नोङ् भवेत् ।
ङीबुत्त्यनन्तरो हि स्त्रीप्रत्ययोऽनुपसर्जनात्[1] ॥ २० ॥

नात्र तत्पुरुषत्वेऽपि पैरवल्लिङ्गता भवेत् ।
द्विग्वादिवाक्येन गतिसमासे तन्निषेधतः ॥ २१ ॥

कुगत्यादिसमासोऽत्र गतिशब्दोपलक्षितः[2] ।
ईकोः ह्रस्वोऽङ्य इत्युक्तेस्तस्योत्तरपदे परे ॥ २२ ॥

भवेत्कारुपतिः कारूपतिरित्यादि सर्वतः ।
सह्रस्वाह्रस्वभेदेन द्विधा रूपविनिर्णयः ॥ २३ ॥

अन्यस्याप्येवमङ्यन्तस्येगन्तस्य विभाव्यताम् ।
अस्माद्बहुष्वतिशये स्वार्थिकस्यात्तमब्यदि ॥ २४ ॥

तरब्द्वयोरतिशये विभज्योपपदेऽपि चेत् ।
प्रशंसायां रूपबिति रूपपि स्वार्थिके तथा ॥ २५ ॥

एवंविधे तथैवेषदसमाप्तौ च कल्पपि ।
1चेलड्ब्रुवगोत्रमतहतेष्वेतेषु पञ्चसु ॥ २६ ॥

नेद्याश्शेषस्याद्यनेन ह्रस्वे सूत्रेण पाक्षिके ।
भवेत्कारुतमा कारूतमा कारुतरादयः ॥ २७ ॥

एवं द्विधा योजनीयाः सह्रस्वाह्रस्वभेदतः ।
अञ्जाद्यतष्टाबिति टाप्तमबाद्यन्ततः स्त्रियाम् ॥ २८ ॥

१. Pā. IV-i-13.
२. Pā. IV-i-14.
३. Pā. II-iv-26.
४. Pā. II-ii-18.
५. Pā. VI-iii-61.
६. Pā. V-iii-66.
७. Pā. V-iii-67.
८. Pā. VI-iii-46.
९. Pā. VI-iii-44.
१०. Pā. IV-i-4.

1. This and the next ardha are read in the original as follows :—

चेलड्ब्रुवगोत्रेषु मतहतयोरेषु पञ्चसु परेषु ।
नद्याः शेषस्याद्यनेन सूत्रेण पाक्षिकह्रस्वे ॥

कारुचेलीति टित्वेन टिड्ढाणञिति ङीब्वशात् ।
पञ्चकुत्सार्थकावृत्तिविषये चेलडादयः ॥ २९ ॥

धैरूपकल्पादिसूत्रे ब्रुवेत्युक्त्वा निपातनात् ।
ब्रुवो वचिर्गुणो वा न ब्रुवशब्दे पचाद्यचि ॥ ३० ॥

अङ्यन्तनद्या इत्युक्तं ङ्यन्तैकाचोऽपि वक्ष्यते ।
कारुचेलितमेत्यादौ वाच्ये तदतिशायने ॥ ३१ ॥

नित्य एव भवेद्ध्रस्वो धैरूपेत्यनुशासनात् ।
अज्ञातादिष्विहार्थेषु कप्रत्ययविधौ सति ॥ ३२ ॥

कृते केऽणँ इति ह्रस्वे कारुका स्वार्थ उच्यते ।
न पुंवत्कारुकाभार्ये जातेश्चेति निषेधतः ॥ ३३ ॥

ह्रस्वो न बहुकारूक इत्यत्र नँ कपि स्मृतेः ।
ऊङ्त्वान्न पुंवद्भावोऽस्ति कारूभार्य इति स्थले ॥ ३४ ॥

अनूङन्तैकवाक्यत्वापन्नं पुंवत्वशासनम् ।
जातेश्चेति निषेधस्तदप्राप्तेर्न प्रवर्तते ॥ ३५ ॥

अस्य क्रियाप्रधानत्वे नँ लोकेति निषेधतः ।
षष्ठ्याः कारकसंबन्धे कार्यं कारुरितीष्यते ॥ ३६ ॥

कारवः कार्वपत्येऽणा कारविर्वा निकथ्यते ।
सूत्रेण नियमादेको गोत्र इत्युपदर्शनात् ॥ ३७ ॥

गोत्रापत्ये तु सर्वत्र कारवोऽण्प्रत्ययाद्भवेत् ।
उदीचां वृद्धादगोत्रादिति फिञ्प्रत्ययस्मृतेः ॥३८॥

१. Pā. IV-i-15.
२. Pā. VI-iii-46.
३. Pā. II-iv-53.
४. Pā. VI-iii-46.
५. Pā. VII-iv-13.
६. Pā. VI-iii-41.
७. Pā. VII-iv-14.
८. Pā. VI-iii-41.
९. Pā. II-iii-69.
१०. Pā. IV-i-93.
११. Pā. IV-i-157.

कारवायणिरथापि स्याद्बुधैः [रत्रापि बुधैः] कारववत् स्मृतः ।
फिञन्तात्तु कृतस्याणो यतो पैयक्षत्रियेति लुक् ॥ ३९ ॥

पुत्रेऽपि पितृवद्यूनि कारवायणिरिष्यते ।
स्त्रीत्वे न युवसंज्ञेति न गोत्रात्प्रत्ययोदयः ॥ ४० ॥

संज्ञात्वे नामधेयत्वादिति वृद्धत्वमस्य वा ।
वृद्धत्वे पूर्ववत्फिञ् स्यादवृद्धत्वे तु फिन् भवेत् ॥ ४१ ॥

यतः प्राचामवृद्धात्फिन् बहुलं शासनं स्फुटम् ।
वैकल्पिकाभ्यां फिञ्फिन्भ्यां मुक्तेऽस्मादण्विधिर्भवेत् ॥

एवं फिनन्ताद्यून्यण्चेदञित्वात्कारवायणः ।
प्रत्ययो यून्यगोत्रान्तात् गोत्रेऽद्यून्यस्त्रियामिति ॥ ४२ ॥

कार्वा अपत्ये कारेयः स्त्रीभ्यो ढगिति ढञ्विधेः ।
उवर्णलोपो ढे लेपोऽकद्वेति विधानतः ॥ ४४ ॥

अपत्यप्रत्ययान्तानां जातिकार्यातिदेशनात् ।
स्त्रीत्वेऽणन्तात्कारवीति जातेरस्त्रीति जातिङीष् ॥ ४५ ॥

फढन्तादितो मनुष्येति ङीषा स्यात्कारवायणी ।
न सर्वतोऽक्तिन्नर्थादित्यनेतद्विषयात् फिनः ॥ ४६ ॥

कारेयाद्योपधत्वेन यतो नास्तीह जातिङीष् ।
टिड्ढाणञ्आदिना ङीपि कारेयीत्येव सिध्यति ॥ ४७ ॥

वृद्धार्थे कारवीभार्य इति पुंवन्न तद्धिते ।
एवमन्यत्र चारक्तविकारार्थेष्वमीषु दिक् ॥ ४८ ॥

१. Pā. II-iv-58.
२. Pā. IV-i-160.
३. Pā. IV-i-94.
४. Pā. IV-i-120.
५. Pā. VI-iv-147.
६. Pā. IV-i-63.
७. Pā. IV-i-65.
८. Pā. IV-i-15.
९. Pā. VI-iii-29.

गोत्रोक्षेत्यादिवुञ्यत्र बृन्दे कारवकादिकम् ।
तस्येदमिति चेद्गोत्रचरणाद्वुञ् भवेत्तदा ॥ ४९ ॥

भवेत्कारवकादेव शैषिकोऽङ्केऽपि जात्ययम् ।
गोत्रादङ्कवदुक्त्याद्यातः कथ्यते तत आगते ॥ ५० ॥

अन्येऽप्यङ्के वक्ष्यमाणा एवमूह्या मनीषिभिः ।
स्त्रीत्वे कारविकेत्येव प्रत्ययस्थादितीरणात् ॥ ५१ ॥

नें कोपधाया इत्येवं पुंवद्भावनिषेधतः ।
भवेत्कारविकाभार्य इति तद्धित उक्तितः ॥ ५२ ॥

श्लाघादाविह भावे च कर्मण्यपि कृते वुञि ।
श्लाघते कारविकयेत्यादि साधु समर्थ्यते ॥ ५३ ॥

श्लाघादावेव जातोऽयं स्वभावाद्वर्तते स्त्रियाम् ।
प्रत्ययस्वरतः कारुकार्वागाद्यनुदात्तकौ ॥ ५४ ॥

अतः कारवमात्राजौ स्यात्समूहेऽण्विरोधिना ।
शिल्पार्थकार्दैचित्तेति कारुकं ठकि तस्य के ॥ ५५ ॥

समूहतद्धितः क्लीबे येनिकैटयच्त्वतल् स्त्रियाम् ।
पुंस्यर्हः खः कृतौ लिङ्गं ज्ञेयं सामूहिकेष्विति ॥ ५६ ॥

वृद्धत्वाच्छेषिकेष्वत्र कारवीयश्च शासनात् ।
परत्वादनुदात्तादित्वेऽपि वृद्धान्मयड्विधेः ॥ ५७ ॥

बाधित्वाञ्च कारुमयं कारूमयमितीष्यते ।
उंगवादीति यत्यत्र कारव्यं तद्धितार्थके ॥ ५८ ॥

१. Pā. IV-ii-39.
२. Pā. IV-iii-120.
३. Pā. IV-iii-126.
४. Pā. VII-iii-44.
५. Pā. VI-iii-37.
६. Pā. IV-ii-47.
७. Pā. IV-ii-51.
८. Vā. IV-ii-43.
९. Pā. IV-ii-214.
१०. Pā. V-i-2.

तत्र साध्वपि कारव्यं सर्वसाधारणे यति ।
उक्तप्रत्ययकार्येषु येषामन्यत्र संभवः ॥ ५९ ॥

योज्यानि तानि तत्रापि दिगेषा संप्रदर्शिता ।
सर्वसामान्यकार्यं तु भूयस्त्वान्न प्रदर्श्यते ॥ ६० ॥

वाच्यलिङ्गत्वमुत्सर्गात्तद्धितेष्ववगम्यताम् ।
समासे पूर्वकालेति सामानाधिकरण्यतः ॥ ६१ ॥

पुंस्त्वे स्त्रीत्वे तथालिङ्गे विशिष्टपरिभाषया ।
मुनिभेदे जरत्कारुस्तद्भार्यायां च कथ्यते ॥ ६२ ॥

संज्ञात्वेन ह्यजातित्वात् ऊङुतोऽत्र न कल्पते ।
त्र्ययीपक्षेऽपि नानित्वात्तस्या नैतदिति स्फुटम् ॥ ६३ ॥

समासात्प्राक् तु संज्ञैव भाविनीति न जातिता ।
तदपत्ये शिवादित्वाच्छ्नाभ्रादित्वेन चाण्ढकोः ॥ ६४ ॥

स्याज्जारत्कारवो जारत्कारेय इति च द्वयम् ।
नामत्वात् फिञ्फिनोः प्राग्वत्पक्षे रूपद्वयं भवेत् ॥६५॥

वायुस्तु पुंसि विबुधैः पवमाने प्रकीर्तितः ।
युचा यञजिमनीत्यादिसूत्रे बाहुलकादजेः ॥ ६६ ॥

वा यावित्यादिवाभावे वायुर्भाष्ये निरूपितः ।
वायव्यं वायुदेवत्ये वाय्वृत्वित्यादिना यति ॥ ६७ ॥

आनङ् न देवताद्वन्द्वे वायुशब्दप्रयोगिणि ।
अग्निवायू च वाय्वग्नी पायुः स्याद्रक्षके गुदे ॥ ६८ ॥

शरीरावयवत्वे तु सति यत्प्रत्यये त्वतः ।
पायव्यः कथ्यते तत्र भवेत्तद्रहितेऽपि[तद्धितकेऽपि] च ॥

१. Pā. IV-iv-98.
२. Pā. II-i-49.
३. Pari. 72.
४. Pā. IV-i-66.
५. Pā. IV-i-112.
६. Pā. IV-i-123.
७. Un. III-20.
८. Pā. II-iv-57.
९. Pā. IV-ii-31.
१०. Vā. VI-iii-36.

जानु तास्वादिकादेवं शरीरावयवार्थकात् ।
जायुः पुंस्यौषधे मायुः स्यात्पुमान् पित्तशब्दयोः ॥७०॥

आत्वे युगागमे चैवं गोमायुर्जम्बुके स.... ।
इष्टे च मधुरे चैव स्वादुस्त्रिषु निगद्यते ॥ ७१ ॥

स्वाद्वी स्वादुः स्त्रियां [1]वोतो गुणसूत्रानुशासनात् ।
स्वादुत्वं स्वादुता पुंवद्भावेनत्वतलोरिह ॥ ७२ ॥

एवं साध्वाद्युवर्णान्तगुणशब्देषु चिन्त्यताम् ।
स्वादोरतिशये स्वादुतमः स्वादिष्ठ इत्यपि ॥ ७३ ॥

एवमेव स्वादुतरः स्वादीयान् विषये स्वके ।
स्वादोर्हि गुणशब्दत्वादिष्ठन्नीयसुनोर्विधिः ॥ ७४ ॥

[2]पृथ्वादित्वादिमनिचि भावेऽस्य स्वादिमा पुमान् ।
इष्ठेमेयस्सुटेर्लोपः ख्यातः सूत्रेण टेरिति[3] ॥ ७५ ॥

स्वाद्वीशब्दादपीष्येरन्निष्ठेमेयसुनो यतः ।
[4]भस्याढे तद्धित इति पुंवद्भावो भवेत्तदा ॥ ७६ ॥

तत्र स्वादीयसी स्त्री स्यात् [5]ऊँगितश्चेति ङीब्वशात् ।
स्वादीयसितमा स्वादीयस्तमेत्यादि घादिषु ॥ ७७ ॥

रूपं स्यादुगितश्चेति द्विधा ह्रस्वविकल्पनात् ।
पुंवद्भावस्तु तसिलादिष्वाकृत्वसुचः स्मृतः ॥ ७८ ॥

द्रष्टव्यमेवं धीमद्भिरन्यत्राप्युगितां स्थले ।
तसिस्त्रतलावपि तरप्तमप्तिल्ष्यनौ च थाल् ॥ ७९ ॥

चरड्जातीयरौ कल्पप्देशीयौ पाशरूपपौ ।
[6]बहुल्पार्थाच्छसिति यः सोऽन्येषु परिगण्यते ॥ ८० ॥

१. Pā. IV-i-44.
२. Pā. V-i-122.
३. Pā. VI-iv-143.
४. Vā. VI-iii-35.
५. Pā. VI-iii-45.
६. Pā. V-iv-42.

तसिलादय एते स्युः पुंवद्भावे चतुर्दश ।
निपातनेन मान्तत्वमेतस्मिण्णमुलोर्विधौ ॥ ८१ ॥
स्वादुंकृत्वा त्वसौ स्वादुंकारमत्तीति बुध्यताम् ।
समासः स्वादुनोऽस्यामैवाव्ययेनेत्यपाक्षिकः । ८२ ॥
साधुस्त्रिषूचिते चारौ सभ्ये वार्धुषिके तु ना ।
साध्वसाधुप्रयोगे तु सप्तमीवार्तिकोक्तितः ॥ ८३ ॥
साधुर्मातरि कृष्णोऽयं असाधुर्मातुले मतः
अनर्चायामपि प्राप्त्यै वार्तिके साधुसंग्रहः ॥ ८४ ॥
अपु[अप्र]त्याद्युक्ततः साधुर्मातरं प्रतिपर्यनु ।
साध्वाशू अपि पृथ्वादौ स्वादिन्नी के मनिच् ततः ॥८५॥
निर्देशादेव वाय्वाशु वर्णसाध्यादि मात्रगात् ।
सिद्धा उणादयो भूयस्तेषामेषा प्रपञ्चिका ॥ ८६ ॥
वसन्ति भुवनान्यस्मिन् सर्वत्र वसतीति वा ।
वासुशब्दो बाहुलकादस्ति नारायणार्थकः ॥ ८७ ॥
ततः स चासौ देवश्च वासुदेव इति स्मृतः ।
वासुदेवे भक्तिरस्येत्यर्थे स्याद्वासुदेवकः ॥ ८८ ॥
वासुदेवार्जुनाभ्यां वुन्निति वुन्प्रत्ययस्मृतेः ।
वुञ् गोत्रक्षत्रियाख्येभ्यो बहुलं वुञितीह न ॥ ८९ ॥
नजैषा[नामैषा]न तु गोत्राख्या...[क्षत्रियाख्या]चनेत्यलम् ।
छन्दसीणः ॥ १-२ ॥ आयुर्जीवितकाले स्यान्मनुष्येऽप्यूर्वशीसुते ॥ ९० ॥
छन्दस्येवानुशिष्टोऽपि लोके बाहुलकादसौ ।
एवं छन्दोऽनुशिष्टानामन्येषां लोकवर्तिनाम् ॥ ९१ ॥
उणादिभाजामेषैव गतिर्ज्ञेया मनीषिभिः ।
उस्प्रत्यये तु सान्तोऽयमेतेर्णिच्चेति वक्ष्यते ॥ ९२ ॥

१. Pā. VI-iii-35.
२. Vā. II-iii-36.
३. Pā. IV-iii-98.
४. Pā. IV-iii-99.
५. Un. Sūtra II-120.

जैटायुषं जटायुं च विद्यादायुं तथायुषम् ।
इति द्विरूपकोशोक्तिरत एवोपपद्यते ॥ ९३ ॥
वस्तुतस्तु जटाय्वाय्वोर्मृगय्वादिकुरिष्यते ।
जटां यातीति चायातीत्येतयोर्विग्रहः क्रमात् ॥ ९४ ॥
जटायुर्गुग्गुलुतरौ संपातेरनुजेऽपि च ।
केचिदत्र रसिं न पठन्ति ॥

दृसनिजनिचरिचटि-रहिभ्यो ञुण् ॥१-३॥

पुन्नपुंसकयोर्दारुरिन्धने परिकीर्तितः ॥ ९५ ॥
दार्वाघाटः पक्षिभेदे दारव हन इत्यतः ।
पुंनपुंसकयोस्सानुः प्रस्थे मतुपि सानुमान् ॥ ९६ ॥
उक्तो गिरौ प्रकारार्थात्पर्वद्वन्नित्यादिसूत्रगात् ।
प्रभृतिग्रहणात्स्नुश्च सानौ जानूरुशर्मणि[पर्वणि] ॥ ९७ ॥
ञुण्प्रत्ययस्यानुबन्धद्वयासञ्जनशक्तितः ।
जैनिवध्योश्चेति वृद्धिनिषेधो नात्र कल्पते ॥ ९८ ॥
उपजानुप्रायभवेट्ठकि स्यादौपजानुकः ।
टिड्ढाणञादिना स्त्रीत्वे ङीपि स्यादौपजानुकी ॥९९॥
बहुव्रीहौ समासान्ते प्रसंभ्यां जानुनोर्ज्ञुतः ।
प्रज्ञुः प्रगतजानौ स्यात्संज्ञुः संहतजानुके ॥ १०० ॥
ऊर्ध्वाद्विभाषाज्ञावूर्ध्वज्ञूर्ध्वजानू उभौ स्मृतौ ।
चारुस्तु त्रिषु रम्ये स्यात् चित्रे वचसि न द्वयोः॥१०१॥
चारौ वेत्यण् तयोः पक्षे विधानादिह चाहनः ।
चार्वाघाटस्तथा चार्वाघातश्चेत्युच्यते द्विधा ॥ १०२ ॥

१. Dvirūpakos'a
२. Un. Sūtra I-37.
३. Vā. III-ii-49.
४. Pā. VI-i-63.
५. Pā. VII-iii-35.
६. Pā. IV-i-15.
७. Pā. V-iv-129.
८. Pā. V-iv-130.
९. Vā. III-ii-49.

चाटुस्तु पुंसि राजादिस्तुतौ पशुपिचण्डके ।
विधेः संज्ञापूर्वकस्यानित्यत्वाच्चटुरित्यपि ॥ १०३ ॥

कुप्रत्यये मृगय्वादिपठनाद्वा भवेदयम् ।
चट्टचाद्वित्यपि क्लीबं भट्टचन्द्रेण भाषितम् ॥ १०४ ॥

चाटुकारो नै शब्देति टनिषेधादणा कृञः ।
राहुर्विधुन्तुदे सौत्रपाठाद्वाहुलकेन वा ॥ १०५ ॥

किंजरयोः श्रिणः ॥ १-४. ॥

किंशारुर्ना सस्यशूके विशिखे कङ्कपक्षिणि ।
गर्भाशये जरायुर्ना चषे जविमलेऽम्बुजे ॥ १०६ ॥
उक्तः केशवमालायां सान्तोऽव्ययमिति स्थितिः ।

त्रोरश्च लः ॥ १-५. ॥

तालु स्यात्काकुदे क्लीबमृप्रश्लेषमते त्विह ॥ १०७ ॥
सिध्यत्यालुश्शाकभेदे घटद्यामप्येष कथ्यते ।

कृके वचः कश्च ॥ १-६. ॥

कृकवाकुर्मयूरे च कृकलासे च कुक्कुटे ॥ १०८ ॥
अैप्राणिजातेश्चेत्युक्तेरुवर्णत्वेऽपि स स्त्रियाम् ।

भृमृशीतृचरित्स-रितनिधनिमिमस्जि-भ्य उः ॥ १-७. ॥

केचिदत्र धनिधातुं न पठन्ति ॥
भरुस्तु काञ्चने शंभौ स्वामिन्यपि निगद्यते ॥ १०९ ॥
मरुर्धन्वनि शैले च भवेदजगरे शयुः ।
तरुर्वृक्षे चरुः स्थाल्यां तत्स्थत्वादोदनेऽप्ययम् ॥११०॥
त्सरुः खड्गादिमुष्टौ स्यात्तनुः स्त्री स्याद्वपुस्त्वचोः ।
त्रिष्वल्पे विरले सूक्ष्मे तन्वीतनुरिति त्वमू ॥ १११ ॥
वनितावाचिनी प्राहुर्धनुस्तु स्याच्छरासने ।
राशिभेदे प्रियालद्रौ धानुष्केऽपि निगद्यते ॥ ११२ ॥
केचिद्धनुःपट इति प्रियालाख्यां प्रचक्षते ।
वक्ष्यतेऽर्तिपूर्वसूत्रे सान्तावपि तनुर्धनुः ॥ ११३ ॥

१. Paribhāsā. 94.
२. Pā. III-ii-23.
३. Vā. IV-i-66.
४. Un, II-118.

धनिधातुरसौ कैश्चिदत्र सूत्रे न पठ्यते ।
मयुस्तुरङ्गवदने मृगेऽपि परिकीर्तितः ॥ ११४ ॥

आत्वं बाहुलकान्नात्र मद्गुः पानीयवायसे ।
न्यैङ्कादीनां च सूत्रेण कुत्वमत्र विभाव्यताम् ॥११५॥

अणश्च ॥ १-८. ॥

चात्कटिवटिभ्यामपि ॥

अणुस्तु भेद्यवल्लिङ्गः कण्य[कणेऽ]न्तोदात्त उच्यते ।
कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि ॥ ११६ ॥

नपुंसकमकार्ये स्यात्पुंलिङ्गो रसमात्रके ।
त्रिषु तद्वत्सुगन्ध्योश्च मकरेऽपि खरेऽपि च ॥ ११७ ॥

वटुर्विप्रसुते नात्र चात्तौ कटुपटू इमौ ।

धान्ये निञ्च ॥१-९. ॥

आद्युदात्तोऽणुशब्दस्तु धान्यभेदे प्रकीर्तितः ॥ ११८ ॥

धान्यार्थादणुशब्दाद्भवति विभाषातिलेति यति खञि च ।
भवने क्षेत्रेऽणूनामणव्यमप्याणवीनं च ॥ ११९ ॥

अणूनां यद्रजस्तत्र क्लीबेऽणं [?] कटमुच्यते ।

शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च ॥ १-१०. ॥

चात् " भिदि अवयवे " इत्यपि ॥

शरुः पुंस्यायुधे कोपे शरव्यं शरवे हितम् ॥ १२० ॥

स्वरुर्वज्रेऽपि यूपांशे विशिखेऽप्यध्वरेऽपि च ।
स्नेहुर्हिमकरे व्याधौ त्रपुसीसकरङ्गयोः ॥ १२१ ॥

विकारे त्रपुणः प्राहुस्त्रापुषं षुगणोऽस्त्रिषु ।
विकारार्थतया पुंवद्भावे त्रापुषमुद्रिकः ॥ १२२ ॥

असुशब्दः पुंसि भूम्नि प्राणेषु परिकीर्तितः ।
वसुर्ना देवभेदेषु योक्त्राग्निधनदांशुषु ॥ १२३ ॥

मधुरे तु त्रिषु क्लीबे सलिले धनरत्नयोः ।
पुनःपूर्वो भवेदृक्षभेदे द्वित्वात्पुनर्वसू ॥ १२४ ॥

१. Pā. VI-iii-53. २. Pā. V-ii-4.

इति नित्यद्विवचनयुक्ते काले त्वणो लुपि ।
अविशेषप्रतीतौ लुबैविशेष इति स्मृतेः ॥ १२५ ॥

युक्तवद्भावतो व्यक्तिवचनाभ्यां पुनर्वसू ।
कालाट्टञोऽपवादेऽणि सन्धिवेलादिसूत्रतः ॥ १२६ ॥

जाते श्रविष्ठाफल्गुन्यनूराधेत्यादिना लुकि ।
पुनर्वसुः परेऽप्यृक्षवाचिनो जातगोचराः ॥ १२७ ॥

काले लुबन्तान्नेत्रन्तान्नक्षत्रे नेतुरब्विधेः ।
ताः पुनर्वसुनेत्राः स्युः या एतन्नायिकानिशाः ॥ १२८ ॥

विवक्षिते तु नक्षत्रद्वन्द्वे तिष्यपुनर्वसू ।
बहुत्वेऽपि द्विवचनं विधिना तत्र दृश्यते ॥ १२९ ॥

एतद्युक्ते काले द्वन्द्वाच्छ इति छशासनाकलनात् ।
तस्य[तिष्य]पुनर्वसवीयं भवेद्विशेषोऽत्र भवतु वा मा वा ॥

प्रशस्तार्थाद्वसोरीयसुनि लोपे च टेरिति ।
श्वसो वसीयः सूत्रेण स्यादचि श्वोवसीयसम् ॥ १३१ ॥

हनुर्हट्टविलासिन्यां मृत्यावपि गदे स्त्रियाम् ।
द्वयोः कपालावयवे हनुमान् मारुतात्मजे ॥ १३२ ॥

हनूमानिति चान्येषामपीति कृतदीर्घतः ।
अंप्राणिजातेरिति नोङरज्वादेरितीरणात् ॥ १३३ ॥

क्लेदुश्चन्द्रे च बन्धूके बन्धुर्ज्ञातौ च सोदरे ।
ब्रह्मबन्ध्वादिषु परे स्थितः क्षेपेऽप्यसौ स्मृतः ॥१३४॥

समानस्य सभावेन [1]ऽज्योतिर्जनपदेत्यतः ।
सबन्धुस्तुल्यबन्धौ स्यात्सवर्णादिष्वियं हि दिक् ॥१३५॥

१. Pā. IV-ii-4.
२. Pā. I-ii-51.
३. Pā. IV-iii-16.
४. Pā. IV-iii-34.
५. Pā. IV-ii-6.
६. Pā. I-ii-63.
७. Pā. V-iv-80.
८. Pā. VI-iii-137.
९. Vā- IV-i-66.
१०. Pā. VI-iii-85.

बन्धुता बन्धुनिवहे तद्भावेऽपि स्त्रियां हि तत् ।
बान्धवो बन्धुतुल्यार्थः प्रज्ञाद्यणि निगद्यते ॥ १३६ ॥
मनुर्मन्त्रेऽप्यादिराजे विधातरि च पुंस्यसौ ।
मैनोः कालेति विधिना पुंयोगे तु स्त्रियां मनुः ॥ १३७ ॥
मनायी च मनावी च स्याज्ज्ञातौ वैज्ञ्यतौ षुकि ।
मानुषश्च मनुष्यश्च मर्त्ये शेषेऽणि मानवः ॥ १३८ ॥
अपत्ये कुत्सिते मूढ इत्यादिश्लोकवार्तिकात् ।
माणवोऽपि समूर्धन्यो बालके परिकीर्तितः ॥ १३९ ॥
स्वार्थकप्रत्ययान्तोऽयं हारभेदेऽपि कथ्यते ।
यत्प्रत्यये तु माणव्यं माणवानां कदम्बके ॥ १४० ॥
माणवायं हिते माणवीनं खञि निगद्यते ।
स्त्रीत्वे मनुष्यान्मनुषी जातिङीषि यलोपतः ॥ १४१ ॥
प्रतिप्रसवतो योपधस्याप्यस्यैष संभवेत् ।
तेनमत्सी वक्ष्यमाणा जातिङीषि प्रसिध्यति ॥ १४२ ॥
स्याद्धलस्तद्धितस्येति यलोपो मनुषी स्थले ।
मनुष्याद्भुञि तद्वृन्दे मानुष्यकमिति स्मृतम् ॥ १४३ ॥
भावे कर्मणि चाप्येवं योपधाद्गुरुसूत्रतः ।
अके प्रकृत्येत्युक्त्यात्र यलोपो न प्रकल्पते ॥ १४४ ॥
मनुष्यत्राव्ययं देवैमनुष्येत्यादिसूत्रतः ।
त्रप्रत्यये द्वितीयान्तात्ससम्यन्तादपि स्मृतम् ॥ १४५ ॥
अत्र सूत्रे चकारेण बिन्दुर्विप्रुषि दृश्यते ।
विलेखनेषु साद्दश्यादनुस्वारादिकेऽप्यसौ ॥ १४६ ॥

१. Pā. V-iv-38.
२. Pā. IV-i-161.
३. Pā. IV-i-161.
४. Vā. IV-i-161.
५. Pā. V-i-11.
६. Pā. VI-iv-150.
७. Pā. IV-ii-134.
८. Pā. V-i-132.
९. Vā. VI-iv-162.
१०. Pā. V-iv-56.

दशनक्षतभेदेऽपि तस्मादेष प्रयुज्यते ।
वेदपाठे विप्रुषो यास्तास्तु स्युर्ब्रह्मबिन्दवः ॥ १४७ ॥
विनोदबिन्दुशब्दस्तु कथ्यते व्याधवाचकः ।
तृणबिन्दुस्तु सौवीरे तद्गोत्रे तार्णबिन्दवः ॥ १४८ ॥
तार्णबिन्दविको वृद्धाद्यून्यस्माट्ठकि कुत्सने ।

स्यन्देः संप्रसारणम् धश्च ॥ १-११. ॥

नद्यां स्त्री नाम्बुधौ सिन्धुनदे देशेभदानयोः ॥ १४९ ॥
देशाह्वयात्तु कच्छादेः शैषिकेऽर्थेऽणि सैन्धवः ।
मनुष्यतत्स्थयोर्वुञ्[वुञ्सूत्रेण] सैन्धवको भवेत् ॥१५०॥
जातेऽर्थे सिन्धुवपकराभ्यां कना सिन्धुकः स्मृतः ।
अणञौ चेत्यणित्यत्र सैन्धवः स्यात्कनन्तवत् ॥ १५१ ॥
अण्प्रत्यये तु लवणसिन्धोर्लावणसैन्धवः ।
एवं वृद्धिनिमित्तेषु तद्धितेष्वितरेष्वपि ॥ १५२ ॥
स्मृता स्या[ह्ल]द्वगसिन्ध्वन्त इति वृद्धिः पदद्वये ।

उन्देरिच्चादेः ॥१-१२॥

इन्दुस्तु घनसारे च शशाङ्के च प्रकीर्तितः ॥ १५३ ॥
अर्धेन्दुः शशिखण्डे च गलहस्तनखाङ्कयोः ।

ईषेः किच्च ॥ १-१३ ॥

स्त्रीपुंसयोरिषुरिति सायके कथितो बुधैः ॥ १५४ ॥

स्कन्देः सलोपश्च ॥ १-१४ ॥

वा पुंसि कन्दुः स्वेदन्यां पाकस्थानेऽप्ययं स्मृतः ।
कन्दौ यस्संस्कृतस्सोऽपि कन्दुरेवोपचारतः ॥ १५५ ॥
ईदृशादस्य वर्णो[पण्यो]ऽयमिति कान्दविकष्ठकि ।

सृजेरसुम् च ॥१-१५॥

रज्जुर्वेण्यां गुणेऽस्त्री नोङ् हनुवत्प्रतिषेधतः ॥ १५६ ॥

कृतेराद्यन्तविपर्ययश्च ॥ १-१६ ॥

कटिसूत्रे स्त्रियां तर्कुः कर्तर्यौ सूत्रवेष्टने[७] ॥ १५७ ॥

१. Pā. IV-i-148.
२. Pā. IV-ii-133.
३. Pā. IV-ii-134.
४. Pā. IV-iii-32.
५. Pā. IV-iii-33.
६. Pā. VII-iii-19.
७. This ardha is also read thus.
स्यात्सूत्रवेष्टने तर्कुः कर्तरी कटिसूत्रयोः ॥

नावञ्चेः ॥ १-१७ ॥

न्यङ्कुर्गुरुण्वुलस्थायी शिफवाने मुनौ मृगे ।
कथितः कैश्चन बुधैरयं परशुवाच्यपि ॥ १५८ ॥
न्यैङ्कादीनां च सूत्रेण मद्गुवत्कुत्वमूह्यताम् ।
रङ्कुर्बाहुलकादत्र रञ्जेश्चर्त्वमपीष्यते ॥ १५९ ॥
शैषिकार्थेषु रैङ्कोरमनुष्येणेत्यणि ष्फकि ।
स्याद्राङ्कवो राङ्कवायणो मनुष्यस्तु राङ्कवः ॥ १६० ॥

फलिपाटिनमिमनि - जनीनां गुक्पटिना- किधताश्च ॥ १-१८ ॥

नाद्रौ फल्गुर्मलय्वां स्त्री निस्सारे त्वभिधेयवत् ।
अथ त्रिषु पटुस्तीक्ष्णे नीरोगे निपुणेऽपि च ॥ १६१ ॥
नपुंसकं तु लवणे धीरैरेतदुदीर्यते ।
पाटवं न द्वयोरुक्तं पटोर्भावेऽपि कर्मणि ॥ १६२ ॥
अण्प्रत्ययादिगन्तौ[1] च लघुपूर्वादिति स्मृतात् ।
एवमीदृशशब्देभ्यः तत्र तत्र विचिन्त्यताम् ॥ १६३ ॥
ईषत्पटौ बहुपटुः प्रत्यये बहुचि त्रिषु ।
नाकुस्तु वामलूरौ स्यात् पर्वतेऽपि मुनावपि ॥ १६४ ॥
चैत्रवसन्तमधुद्रुमदैत्यविशेषेषु पुंसि मधुशब्दः ।
क्लीबे त्वम्बुनि दुग्धे मकरन्दे क्षौद्रमद्यवाच्यस्त्री ॥१६५॥
ऊँषसुष्यादिमत्वर्थरविधौ मधुरस्त्रिषु ।
जतुः स्त्री चर्मपत्रायां न द्वयोर्हिङ्गुलाक्षयोः ॥ १६६ ॥
जातुषं तु त्रापुषवद्विकारेषु[···ग]णोस्ततोः ।

वलेर्गुक्च ॥ १-१९ ॥

वेँल्गुः स्याच्छगले पुंसि सुन्दरे चाभिधेयवत् ॥ १६७ ॥

शः कित्सन्वच्च ॥ १-२० ॥

शिशुस्तु बालके पुंसि बालिकायां स्त्रियामसौ ।
अशिश्वी शिशुहीनायां लोके छन्दसि चोच्यते ॥१६८॥
शिशूनां क्रन्दने प्रोक्तः शिशुक्रन्दो घञा ततः ।

१. Pā. VI-iii-53.
२. Pā. IV-ii-100.
३. Pā. V-i-131.
४. Pā. IV-iii-87.
५. Pā. V-ii-107.

अधिकृत्य कृते ग्रन्थे शिशुक्रन्दीय उच्यते ॥ १६९ ॥

छतःशिशुक्रन्दयमसभद्रन्द्वेति दर्शितात् ।

यो द्वे च ॥ १-२१ ॥ ययुर्नाश्वेऽध्वमेधाश्वे दीर्घयष्ट्यां स्त्रियामसौ ॥ १७० ॥

कुर्भ्रश्च ॥ १-२२ ॥ चात्कृञ्हन्पाधातवो गृह्यन्ते ॥

बभ्रुरग्नौ च खलतौ विष्णौ रुद्रे बिडालके ।

विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत् ॥ १७१ ॥

ब्राह्मणकौशिकयोर्मधुबभ्रोर्माधव्यबाभ्रव्यौ ।

कथितौ क्रमेण विबुधैर्यत्प्रत्ययशासनादपत्येऽर्थे ॥१७२॥

चक्रुर्जघ्नुः पपुः कर्तृहन्तृपातृष्वनुक्रमात् ।

सौत्रचादेव निर्णीताः शब्दा एते बुधैरिह ॥ १७३ ॥

पृभिदिव्यधिगृधि-धृषिभ्यः ॥ १. २३ ॥ केचित्तु धृषेरनन्तरं हृषिमपि पठन्ति । अन्ये तु दृशिं पठन्ति ॥

नृपभेदे परागे च देवलोके पुरुः पुमान् ।

धर्मे शीले जलनिधौ स्यात्प्राज्ये त्वभिधेयवत् ॥१७४॥

प्राज्ये पुरुहमप्यस्मिन् हन्तेरुपपदे ढतः ।

मनुष्यत्रावदत्रापि पुरुत्रा त्राविधानैतः ॥ १७५ ॥

भेदके कुलिशे चैव भिदुर्विद्वद्भिरुच्यते ।

विधुः शशाङ्के कर्पूरे हृषीकेशे च राक्षसे ॥ १७६ ॥

विधुन्तुदो विर्ध्वरुषोस्तुद इत्युच्यते तमः ।

गृधुः कामे धृषुर्दक्षे हृषुस्सूर्याग्निराहुषु ॥ १७७ ॥

हर्षे च पृभिदीत्यस्य कैश्चिदन्ते हृषीरणात् ।

दृशीरणे तु कथितो दृशुरादित्यवाचकः ॥ १७८ ॥

रपेरिच्चोपधायाः ॥ १-२४ ॥ अनिष्टं रपतीत्यर्थाद्रिपुः शत्रौ निगद्यते ।

ऋजुः साधावकुटिलेऽप्यव्युत्पन्नमतावपि ॥ १७९ ॥

१. Pā. IV-iii-87.
२. Pā. IV-iii-88.
३. Pā. V-iv-56.
४. Pā. III-ii-35.

अर्जिदृशिकम्यमि-पशिबाधाभृजिवसि-तुग्धुग्दीर्घहकाराश्च ॥ १. २५ ॥

रजिष्ठाजौ विभाषैजोऽछन्दसीति रशासनात् ।
पशुः स्वर्गे शशाङ्केऽग्नौ गवादिष्वपि जन्तुषु ॥१८०॥

सम्यगर्थे च दृश्यर्थे चादित्वादव्ययं पशु ।
कन्तुः कामे कुसूले च हृदयेऽप्युच्यते पुमान् ॥१८१॥

अन्धुः कूपे शकन्धुश्च कर्कन्धुः परैरूपतः ।
पांसुर्धूलौ पुंसि तद्वान् पांसुगो नगपांस्विति [१] ॥१८२॥

स्वैरिण्यां पांसुला स्त्री स्यात् सिध्मादिभ्यश्च लज्वशात् ।
तालव्या अपि दन्त्याश्च सम्बसूकरपांसवः ॥ १८३ ॥

यतः पृषोदरादित्वात्साध्यो वर्णविपर्ययः ।
भुजे स्त्रीपुंसयोर्बाहू राजभेदे तु पुंस्ययम् ॥ १८४ ॥

अकारान्तोऽस्ति पुंलिङ्गो बाहोऽपि भुजवाचकः ।
स्त्री च बाहा पुमांस्त्वश्वमानवायुवृषेष्वपि ॥ १८५ ॥

दिवौविभेत्यादिनास्मिन् टे स्याद्बाहुकरः कृञः ।
बाहुजः क्षत्रिये कीरे स्वयंजाततिलेऽपि च ॥ १८६ ॥

राजभेदार्थकाद्बाहुशब्दाद्बाहविरित्यसौ ।
कथितस्तदपत्येऽर्थे बाह्वादीञनुशासनात् ॥ १८७ ॥

राजार्थकमबुध्वान्ये बाह्वन्तादिञमूचिरे ।
सौबाहव्यादयस्तेषामिञुदाहरणं मतम् ॥ १८८ ॥

स्याच्चतुष्पाद्विशेषे तु भद्रबाहुः पुमानसौ ।
भद्रबाहूस्तु बाह्वन्तात्संज्ञायामूङ् स्त्रियां यतः ॥ १८९ ॥

तत्र तेनेदमिति सरूपे इत्यनुशासनात् ।
स्याद्बाहूबाहवीच्कर्मव्यतिहार इतोभ्य[ज्व]शात् ॥१९०॥

१. Pā. VI-iv-162.
२. Vā. VI-i-94.
३. Pā. V-ii-97.
४. Pā. VI-iii-109.
५. Pā. III-ii-21.
६. Pā. IV-i-96.
७. Pā. IV-i-96.
८. Pā. IV-i-67.
९. Pā. II-ii-27.
१०. Pa. V-iv-127.

पूर्वान्तदीर्घस्त्वन्येषामपि दृश्यत इत्यतः ।
बाहाशब्दस्य चेदेवं बाहाबाहीति सिध्यति ॥ १९.१ ॥

इच्प्रत्ययस्य तिष्ठेद्गुप्रभृतिष्वनुवर्णनात् ।
अव्ययीभावाव्ययत्वे तदन्तस्य निरङ्कुशे ॥ १९.२ ॥

प्रथिभ्रदिभ्रस्जां संप्रसारणं सलोपश्च ॥ १. २६ ॥

उभाबाहूभयाबाहू द्विदण्डैद्यादौ निपातनात् ।
लुप्तइच्तदिजन्तोऽसौ भवेत्प्रत्ययलक्षणात् ॥ १९३ ॥

पृथुस्त्रिषु स्यान्महति त्वक्पत्र्यां कृष्णजीरके ।
पुमानग्नौ राजभेदे मृद्वतीक्ष्णे च कोमले ॥ १९.४ ॥

ईष्ठेमेयस्सु रृ ऋतो हलादेरिति दर्शनात् ।
उक्ताः प्रथिष्ठः प्रथिमा प्रथीयानित्यमी पृथोः ॥ १९५ ॥

मृदोर्भ्रदिष्ठो भ्रदिमा भ्रदीयांश्च रभावतः ।
स्यातामिमनिजर्थेन क्रमात्पार्थवमार्दवे ॥ १९६ ॥

भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि ।
कुत्वमत्र विपश्चिद्भिरूह्यतां न्यङ्कुमद्गुवत् ॥ १९७ ॥

ऋष्यणा भार्गवोऽपत्ये बहुत्वे भृगवो लुकि ।
स्युरत्रिभृगुकुत्सेति सूत्रेण श्रीस्तु[स्त्री तु]भार्गवी ।
लुका ण्यक्षत्रियेतीञो भार्गवो यून्यपि स्मृतः ॥१९८ ॥

लङ्घिबंह्योर्नलोपश्च ॥ १. २७ ॥

लघुरगुरौ च मनोज्ञे निस्सारे वाच्यवत्क्लीबम् ।
शीघ्रे कृष्णागरुणि च पृक्कानामौषधौ तु स्त्री ॥१९९॥

रघुर्ना नृपभेदे स्यादस्यैव रविकल्पतः ।
इक्ष्वाकुदेशवाचीति केचिदेनं प्रचक्षते ॥ २०० ॥

अतो हि राघवं ज्ञात्वा तद्राजान्तं [जं च] लुकं जगुः ।
बहुत्वे तत्र रघवो रघूनित्यादि सिध्यति ॥ २०१ ॥

१. Pā. VI-iii-137.
२. Pā. II-i-17.
३. Pā. V iv-128.
४. Pā. VI-iv-154.
५. Pā. VI-iv-161.
६. Pā. II-iv-65.
७. Pā. II-iv-58.
८. Pā. II-iv-62.

मन्वानास्तदपत्येऽस्य लक्षणां राजवाचिनः ।
अतो नेच्छन्ति तद्राजं बहुत्वे राघवास्तदा ॥ २०२ ॥

बहु द्वित्र्यादि संख्यायां विपुले चाभिधेयवत् ।
भवेदसौ बहुकरो बहुकार्यं करोति यः ॥ २०३ ॥

कृञोऽज्विधानात्किं यत्तद्बहुष्वत्र स्त्रियां तु टाप् ।
ततो बहुकरा पुंसो योगे बहुकरीति ङीष् ॥ २०४ ॥

बह्वादिभ्यश्चेति सूत्राद्बह्वी बहुरिति स्त्रियाम् ।
अर्हीयार्थेषु संख्यात्वात्कनि स्याद्बहुकस्त्रिषु ॥ २०५ ॥

पञ्चकाद्या एवमेव संख्याशब्देषु कन्वशात् ।
पूरणे डट्तिथुकोः संभवे बहुतिथस्त्रिषु ॥ २०६ ॥

सूत्रकारेण बहुलमित्युद्घोषादितस्ततः ।
भावप्रधानादस्माच्चेन्मत्वर्थीयो लजाश्रितः ॥ २०७ ॥

बहुलातीतकालातेराधानार्थात् प्रिये तकः ।
तदा बहुलशब्दोऽपि बह्वर्थः पर्यवस्यति ॥ २०८ ॥

बंहिष्ठो बंहिमाप्यस्माद्बंहीयानिष्ठनादिषु ।
प्रियस्थिरेत्यादिसूत्रे बंह्वादेशविधानतः ॥ २०९ ॥

बहुला कृत्तिकायां स्त्री तज्जाते बहुलस्त्रिषु ।
श्रविष्ठाफल्गुनीत्यादिजातप्रत्ययलुग्विधेः ॥ २१० ॥

अपत्ये बाहुलेयः स्याड्ढकि स्कन्दस्य वाचकः ।
अधिकृत्यात्र किं सर्वनाम बह्विति शिष्टयोः ॥ २११ ॥

कृतयोः पञ्चमीसप्तम्यन्तादस्मात्तसिल्त्रलोः ।
स्यातां क्रमेण बहुतो बहुत्रेत्यव्यये उभे ॥ २१२ ॥

बहुतस्त्य बहुत्रत्यौवव्ययात्त्यबिति त्यपि ।
अर्थेषु शैषिकेष्वेवं ततस्तत्रादिकावपि ॥ २१३ ॥

१. Pā. IV-i-45.
२. Pā. V-ii-48.
३. Pā. VI. iv-157.
४. Pā. IV-iii-34.
५. Pā. IV-ii-104.

अमेहक्कतसित्रेभ्यस्त्यब्विधियन्तरात् [योऽव्ययात् स्मृतः]।
संख्यासाधारणो धा चेद्विधेयार्थे बहुधा तदा ॥ २१४ ॥

बहुकृत्वश्च बहुधा कृत्वोऽर्थे धाविकल्पतैः[3]।
इष्ठेमेयस्सु भूयिष्ठभूमभूयान ईरिताः ॥ २१५ ॥

बहोर्लोपो भू च बहोः सूत्रादिष्ठस्य यिट्चतः[4]।
शस्प्रत्यये कृते बह्वल्पार्थाच्छसिति सूत्रतः ॥ २१६ ॥

यत्किंचित्कारकान्मङ्गलार्थाद्धुहुश उच्यते।
सूत्रे देवमनुष्यादि त्राविधौ बहुलोक्तितः ॥ २१७ ॥

द्वितीयासप्तमीभ्यां हि बहुत्रा दृश्यते क्वचित्।
ऋक्पूरिति समासान्ते बह्वृचोऽध्येतरि स्मृतः ॥२१८॥

ञ्याद्धर्मान्नाययोश्छन्दोगेति बाह्वृच्यमुच्यते।
अनेन गोत्रैश्चरणाद्वुञित्येतद्धि बाध्यते ॥ २१९ ॥

चरणेभ्यो धर्मवदित्यतिदेशाद्धणेऽप्ययम्।
तद्धितश्चेति सूत्रात्त्रातसिल्धाशसव्ययम् ॥ २२० ॥

ऊर्णोतेर्णुलोपश्च ॥ १. २८ ॥

ऊर्णूयते जनैरेष इत्यूरुः पुंसि सक्थिनि।
ऊरूत्तरपदादूङि रम्भोरूरुपमा यदि।
ऊङेषा करभोर्वादेः संहिताद्यादिकात्तथा ॥ २२१ ॥

तत्र साधौ हितशफलक्षणवामसहितसहशब्दाः।
ऊङ्प्रकरणे निबद्धा नोङुचितोऽन्यत्र पीवरोर्वादौ॥२२२॥

१. See Kāśikā on IV-ii-104.
२. Pā. V-iii.42.
३. Pā. V-iv-20.
४. Pā. VI-iv-154.
५. Pā. VI-iv-158.
६. Pā. VI-iv-159.
७. Pā. V-iv-42.
८. Pā. V-iv-56.
९. Pā. V-iv-74.
१०. Pā. IV-iii-126.
११. Pā. IV-ii-46.
१२. Pā. I-i-38.
१३. Pā. IV-i-69.
१४. Pā. IV-iv-98.

शरीरावयवत्वेन सति यत्प्रत्यये त्वतः ।
ऊरव्यः कथ्यते तत्र भवेत्तस्मै हितेऽपि च ॥ २२३ ॥

तत्र साधौ प्रौग्घितीये यदूरव्योऽनुशिष्यते ।
प्रमाणे द्वयसज्दघ्नञ्मात्रचो यद्यतः परे ॥ २२४ ॥

महति ह्रस्वश्च ॥ १. २९ ॥

स्युरूरुद्वयसाद्याश्च तेभ्यष्टिड्ढादिङीप् स्त्रियाम् ।
उरु स्फीते वाच्यलिङ्गो भवेदुर्वी स्त्रियां क्षितौ ॥ २२५ ॥

प्रियस्थिरेत्यादिसूत्रेणेष्ठेमेयस्सुवर्विधेः ।
उक्ता वरिष्ठो वरिमा वरीयानित्यमी त्रयः ॥ २२६ ॥

स्त्रियाः कच्च ॥ १. ३० ॥

श्लिकुर्भृत्येऽपि च ज्योतिष्युद्यतेऽपि प्रकीर्तितः ।
वराहे मूषकेऽप्याखुस्त्रियामपि तथाविधः ॥ २२७ ॥

आङ्परयोः खनिशृभ्यां डिच्च ॥ १. ३१ ॥

आखुवाहो गणपतौ परशुस्तु कुठारके ।
पृषोदरादिपाठेन पर्शुरित्यप्ययं स्मृतः ॥ २२८ ॥

परशव्यं परशुहिते तस्य विकारे तु पारशवम् ।
[आद्यं यति]द्वितीयमञ् सन्नियोगशिष्टलुका ॥ २२९ ॥

पार्श्वं पर्शुसमूहे स्यात् पार्शोर्णसिति वार्तिकात् ।
सिति[11] चेति पदत्वेन भत्वात्स्यादत्र नौर्गुणः ॥ २३० ॥

हरिमितयोर्द्रुवः ॥ १. ३२ ॥

न ह्यत्र शाकलह्रस्वः सिति[12]च प्रतिषेधतः ।
वृक्षे दारुहरिद्रायां हरिद्रुस्तापसान्तरे ॥ २३१ ॥

तेन[13] प्रोक्तमधीयानाः स्युर्हारिद्रविणो जनाः ।
कलाप्यन्तेवासितया णिनि प्रोक्तार्थवाचिनि ॥ २३२ ॥

१. Pā. V-i-5.
२. Pā. IV-iv-98.
३. Pā. IV-iv-75.
४. Pā. V-ii-37.
५. Pā. IV-i-15.
६. Pā. VI-iv-157.
७. Pā. VI-iii-109.
८. Pā. IV-iii-134.
९. Pā. IV-ii-37.
१०. Vā. IV-ii-43.
११. Pā. I-iv-16.
१२. Vā.VI-i-127.
१३. Pā. IV-iii-101.

अध्येत्रणो लुका प्रोक्ताल्लुगित्येवं विदत्स्वपि ।
स्युः प्रोक्तप्रत्ययान्तानि छन्दांसि ब्राह्मणानि च ॥२३३॥

अध्येतृवेदितृर्थैकविषयाणीति शासनम् ।
मितद्रुशब्दस्तु पुमान् कथितो वरुणालये ॥ २३४ ॥

शते च ॥ १. ३३ ॥ शतद्रुस्तु नदीभेदे लवणेऽपि च कथ्यते ।
इह बाहुलकादस्ति द्रुशब्दो वृक्षशाखयोः ॥ २३५ ॥

द्रुघणः करणेऽयोविद्रुष्वित्यप्घनयोर्हनः ।
कुठारसंज्ञेयमिति णत्वं केचित्प्रचक्षते ॥ २३६ ॥

निपातैनादरीहणादिषु णत्वमितीतरे ।
द्रोर्विकारे चावयवे द्रव्यं यत्प्रत्यये सति ।
माने तु द्रुवयं मैाने वय इत्यनुशासनात् ॥ २३७ ॥
हरति वहत्यावहति द्रव्यमिति द्रव्यको भवति ।
वॅस्नद्रव्याभ्यां ठन्कनाविति ख्याते न कन् विधाने च ॥
द्यॅद्रुभ्यां म इति त्वस्मान्मत्वर्थीये द्रुमस्तरौ ।
इवाधिकारे द्रव्यं च भॅव्य इत्यनुशासनात् ।
विग्रहे द्रुरिवेत्यस्मिन् द्रव्यो भव्ये त्रिषु स्मृतः ॥२३९॥

खरुशङ्कुपीयुनील-ङ्गुलिगु ॥ १-३४ ॥ केचित्तु नीलाङ्गु इति दीर्घमध्यं पठन्ति ॥
खरुर्दन्ते हरे दर्पे हये कामे च पुंस्यथ ।
वाच्यलिङ्गः क्रूरमूर्खश्वेतेषु परिकीर्तितः ॥ २४० ॥

पतिंवरायां कन्यायामपि ङीष्प्रतिषेधभाक् ।
शङ्कुः कीले गरे शस्त्रे संख्यापादपभेदयोः ॥ २४१ ॥

यादोभेदे च पापे च स्थाणावपि च दृश्यते ।
राजभेदे त्रिशङ्कुः स्याद्वैनतेयबिडालयोः ॥ २४२ ॥

१. Pā. III-iii-82.
२. Pā. IV-ii-80.
३. Pā IV-iii-162.
४. Pā. V-i-51.
५. Pā. V-ii-108.
६. Pā. V-iii-104.

पीयुकालौ रवौ घूके सुवर्णे वामनेऽपि च ।
नीलङ्गुः कृमिजातौ स्यात् बम्भरालिप्रसूनयोः ॥२४३॥

सृगालेऽप्येष दीर्घादिमर्थो दीर्घादिरेव वा ।
लिगुर्मूर्खे भूप्रदेशे मृगे वा न द्वयोर्हृदि ॥ २४४ ॥

मृगय्वादयश्च ॥ १-३५ ॥

मृगयुर्ब्रह्मणि ख्यातो गोमायुव्याधयोरपि ।
देवयुर्धार्मिके ख्यातो मित्रयुस्सज्जने मुनौ ॥ २४५ ॥

गौष्टयादिढञि मैत्रेयस्तदपत्ये निगद्यते ।
दाण्डिनायनसूत्रेण[1] युलोपस्य निपातनात् ॥ २४६ ॥

यस्कादिभ्यो[2] गोत्र इति बहुत्वे तस्य लुक्स्मृतेः ।
बहवः स्युर्मित्रयवस्तेषां भावे तु वुञ्वशात् ॥२४७॥

श्लाघात्याकारतदवे तेष्वर्थेषु प्रचक्षते ।
मैत्रेयिकां केर्कयादिसूत्रे[3] यादेरियं स्मृतेः ॥ २४८ ॥

अत्र मित्रयुशब्दस्य तदपत्येषु लक्षणा ।
ऋषिशब्दो हि लौकिकं गोत्रं वुञ्सूत्रवर्ति तत् ॥२४९॥

प्रागुक्तेन तु सूत्रेण बहुत्वेऽस्य ढञो लुकि ।
पारिभाषिकगोत्रं वा भवेदेवेति न क्षतिः ॥ २५० ॥

यतोऽयमाकृतिगणो मृगय्वादिरुदाहृतः ।
पीलुकण्ड्वादयश्शब्दा उन्नेयास्तेन कोविदैः ॥ २५१ ॥

पीलुर्द्रुमे गजे काण्डे परमाणुप्रसूनयोः ।
पीलुपाके पीलुकुणः पील्वादिकुणवुक्तितः[4] ॥ २५२ ॥

मुनिभेदे तु कण्डुर्ना भेके वर्षाभुरुच्यते ।
ऊदन्तो वक्ष्यते कण्डूर्वर्षाभूः किपि तादृशः ॥ २५३ ॥

१. Pā. IV-i-136.
२. Pā. VI-iv-174.
३. Pā. II-iv-63.
४. Pā. VII-iii-2.
५. Pā. IV-ii-80.
६. Pā. V-ii-24.

मृगकण्डूयनादस्ति मृकण्डुरिति तापसः ।
मृकण्ड इत्यदन्तो वा शुभ्रादिगणदर्शितः ॥ २५४ ॥

मार्कण्डेयः स्मृतो लोके लोपो यस्येति चेति वा ॥

मन्दिवाशिमधिचति-चङ्क्यङ्क्षिभ्य उरच् ॥ १-३६ ॥

चङ्क्यिः सौत्रो धातुः ॥
मन्दुरा वाजिशालायां शयनीयेऽपि वेश्मनि ॥ २५५ ॥

मन्दुरायां तु जातो यस्तत्र मन्दुरजस्त्रिषु ।
ङ्याप्योस्संज्ञाछन्दसोरित्यत्र ह्रस्वानुशासनम् ॥ २५६ ॥

वाशुरा वासितारात्र्योः पुंसि त्वेष खरे शुनि ।
रसे विषे च मधुरः पुंस्यथ स्वादुनि त्रिषु ॥ २५७ ॥

माधुर्यवति चित्रेऽथ मधुरानगरीभिदि ।
दक्षे धीरे च चतुरो भावे ष्यञिह चेद्भवेत् ॥ २५८ ॥

चातुर्यं चातुरी ङीषि [1]षिद्गौरादिभ्य इत्यतः ।
ष्यञः षित्वं हि ङीषर्थमिति वामननिर्णयः ॥ २५९ ॥

द्वैरूप्यं ष्यञि सर्वत्र स्वार्थभावादिगोचरे ।
अचातुर्यं तु नञ्पूर्वात् स्यात् ष्यञोऽत्र प्रवृत्तितः ॥

ष्यञि प्राक् नञ्समासेऽथ स्यादचातुर्यमेव तत् ।
चङ्क्यिः सौत्राच्चङ्कुरः स्यात् वृक्षे दैत्ये रथेऽपि च ॥

अङ्कुरो रुधिरे रोम्णि पानीयेऽभिनवोद्भिदि ।
दीर्घमध्योऽपि खर्जूरादिष्वङ्कूरो निगद्यते ॥ २६२ ॥

व्यधस्संप्रसारणं किच्च ॥ १-३७ ॥

विधुरस्तु प्रविश्लेषे विकले चोररक्षसोः ।
वर्गद्वितीयमध्योऽपि भयसञ्चलनार्थकात् ॥ २६३ ॥

१. Pā. IV-i-123.
२. Pā. VI-vi-148.
३. Pā. VI-iii-63.
४. Pā. IV-i-41.
५. Kāśikā V-i-123.

धुरो विगत इत्यर्थे····[ऋक्पूरित्यपि] साधितः ॥

मकुरदर्दुरौ ॥ १-३८ ॥ बाहुलकादुकारे मुकुरोऽपि ॥

मकुरो मल्लिकापुष्पे दर्पणेऽपि कलिद्रुमे ॥ २६४ ॥

कुलालदण्डे मुकुरोऽप्युत्वे बाहुलकादिह ।
दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः ॥ २६५ ॥

[1]दर्दुरा चण्डिकायां च ग्रामजाले च दर्दुरम् ।
कैरोति दर्दुरं योसौ भवेद्दार्दुरिकष्ठकि ॥ २६६ ॥

मद्गुरादयश्च ॥१-३९॥ मद्गुरो मत्स्यभेदे तान् हन्ति माद्गुरिकः स्मृतः ।
पैक्षिमत्स्यमृगान् हन्तीत्यनेन ठकि इग्वशात्[2] ॥२६७॥

स्वरूपस्य विशेषाणामपि ग्रहणमत्र यत् ।
कर्बुरः पुंसि पापे च राक्षसे च प्रकीर्तितः ॥ २६८ ॥

कर्बुरं सलिले हेम्नि शबले त्वभिधेयवत् ।
कर्बुरा कृष्णवृन्तायमित्यूह्या मद्गुरादयः ॥ २६९ ॥

तदापि बन्धुरो गम्ये नम्रे हंसेऽपि च स्मृतः ।
बन्धूके च विहङ्गे च बन्धुरा पण्ययोषिति ॥ २७० ॥

अङ्कूर इव बन्धूरोऽप्यस्त्यर्थेऽप्वेषु पूर्ववत् ।
कुक्कुरः शुनके पुंसि ग्रन्थिपर्णे नपुंसकम् ॥ २७१ ॥

कोकतेः कुग्विकल्पेन कोकुरोऽपि भवेदिह ॥

असेरुरन् ॥ १-४० ॥ असुरो दानवे सूर्ये प्रेंज्ञाद्यण्यासुरोऽपि च ॥ २७२ ॥

केचित्सुरविरुद्धत्वान्नञ्समासे वदन्त्यमुम् ।
आसुरिः स्यादपत्येञि स्त्री तु स्यादासुरायणी ॥२७३॥

१. Pā. V-iv-74.
२. Pā. IV-iv-34.
३. Pā. IV-iv-35.
४. Pā. V-iv-38.

1. The original reads **मुकुरा.**
2. The original reads **मद्गवात्.**

आसुरीय इञश्चाणं बाधित्वा छेऽत्र शैषिके ।
यत्र शौश्वतिकं वैरमेषां मथनकालजम् ॥ २७४ ॥
न तस्मादेकवद्भावो द्वन्द्वे देवासुरा इति ।
द्वैन्द्वे देवासुरादिभ्यः प्रतिषेधेन वार्तिके ॥ २७५ ॥
तेषां वैरे वुनोऽभावादणि दैवासुरं स्मृतम् ॥

मसेश्च ॥ १-४१ ॥ मसुरः पुंसि वा व्रीहिभेदे स्त्री पण्ययोषिति ॥ २७६ ॥
मसूरः पञ्चमे पादे दीर्घमध्योऽपि वक्ष्यते ॥

शाषशेरात्तौ ॥ १-४२ ॥ शु इत्याश्वर्येऽव्ययम् ॥
दम्पत्योस्तु पितान्योन्यं तयोः श्वशुर उच्यते ॥२७७॥
तयोरेव प्रसूः श्वश्रूरूङि वर्णविलोपतः ।
देवरश्यालयोः प्रोक्तः [1]श्वशुर्योऽपत्ययद्विधेः ॥ २७८ ॥
शास्त्राप्रवृत्तितः संज्ञाश्वशुराच्छ्वशुरिर्भवेत् ।
एवं बाहव इत्यण् स्यादिदानींतनबाहुतः [?] ॥ २७९ ॥

अविमद्योष्टिषच् ॥ १-४३ ॥ अविषो जलधौ राजन्यविषी तु दिवि क्षितौ ।
सिन्धौ राज्ञि लुलाये च महिषः स्यान्महत्यपि ॥२८०॥
महिषीत्यभिषिक्तायां सैरिभ्यामोषधीभिदि ।
महिष्मान् देशभेदे स्यान्महिषाच्च ङ्मतुञ्विधेः ॥ २८१ ॥
माहिष्मती ततोऽण्ङीपोः पुटभेदे प्रकीर्तिता ॥

अमेर्डीर्घश्च ॥ १-४४ ॥ आमिषं पलले लोभे संभोगोत्कोचयोरपि ॥ २८२ ॥
सुन्दराकाररूपादिविषयेऽपि च कथ्यते ॥

रुहेर्वृद्धिश्च ॥ १-४५ ॥ रौहिषो मृगभेदे स्यादरण्यमहिषे तथा ॥ २८३ ॥
रौहिषं तु तृणे प्रोक्तं लतायां रौहिषी स्मृता ॥

तवेर्णिद्वा ॥ १-४६ ॥ तविषस्ताविषश्चेति पुंसि स्वर्गे महोदधौ ॥ २८४ ॥

१. Pā. II-iv-9. २. Pā. IV-iii-88

1. The original reads श्वशुरोपत्य.

ङ्यन्तावेतौ स्मृतौ देवकन्यायां सरिति क्षितौ ।
तविषी शोभनाकारे बिलेऽब्दव्यवसाययोः ॥ २८५ ॥

ताविषस्तपनीये ना ताविषं बलमुच्यते ॥

नञि व्यधेः ॥ १-४७ ॥ नाब्धौ सूर्येऽप्यव्यधिषो ङ्यन्तो रात्रिभुवोरयम् ॥२८६॥

किलेर्बुक् च ॥ १-४८ ॥ किल्बिषं कल्मषे रोगेऽप्यपराधे च कथ्यते ॥

इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दिति-मिमिहिमुहिमुचिरुचि-रुधिशुषिबन्धिभ्यः किरच् ॥ १-४९ ॥

षोडश धातवः ॥

इषिरस्तु भवेद्वह्नावाहारेऽप्येष विश्रुतः ॥ २८७ ॥

स्त्रियां तु मदिरा मद्ये पाने मत्ते तु वाच्यवत् ।
मुदिरः कामुके मेघे खिदिरस्त्रसचन्द्रयोः ॥ २८८ ॥

छिदिरः पावके रज्जौ खड्गे रन्ध्रे परश्वधे ।
भिदिर·····योर्वज्रे भेदयुक्ते तु वाच्यवत् ॥ २८९ ॥

मन्दिरं नगरेऽगारे मन्दिरा चाम्बुधौ तु ना ।
चन्दिरोऽनेकपे चन्द्रे तिमिरं नयनामये ॥ २९० ॥

तमिस्रे चाथ मिहिरो वृद्धमेघार्कवायुषु ।
मुहिरः कामुके मूर्खे मुचिरो दातृधर्मयोः ॥ २९१ ॥

रुचिरं त्रिषु चारौ स्याद्रुधिरोऽङ्गारके पुमान् ।
रक्तकुङ्कुमयोः क्लीबं सुषिरं तु बिले स्मृतम् ॥ २९२ ॥

क्लीबं वंशादिवाद्येऽपि सरन्ध्रे तु भवेत्त्रिषु ।
मूषके पावके चासौ पुमानल्पौषधौ स्त्रियाम् ॥ २९३ ॥

·····दृश्यते ।
तालव्यादिरयं धातुः शोषणार्थः स्फुटोऽपि सन् ॥२९४॥

औणादिकाद्बाहुलकाद्भजेद्दन्त्यादितामपि ।
शब्दग्रहासमर्थे तु कर्णे बधिर उच्यते ॥ २९५ ॥

तद्योगतो लक्षणया पुनरन्यत्र वर्तते[1] ।
[2]पुरुषादावर्श[1] आदौ स्वाङ्गाद्धीनादितीरितात् ॥२९६॥

अशेर्णिच्च ॥ १-५० ॥

आशिरः क्षीरविकृतौ भोजनेऽन्यर्कयोस्त्रिषु ॥

अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः ॥ १-५१ ॥

सप्त शब्दाः ॥

अजिरः प्राङ्गणे काये विषये दर्दुरेऽनिले ॥ २९७ ॥

शिशिरो ना हिमे न स्त्री त्वृतुभेदे जडे त्रिषु ।
ऋत्वणा[3]सन्धिवेलेति जाताद्यर्थेषु शैशिरम् ॥ २९८ ॥

अदृढे निश्चले प्राज्ये शिथिलं च स्थिरं स्फिरम् ।
विज्ञातव्यं..... ॥२९९॥

स्थेयः स्थेयान् स्थिरे स्थेष्ठः स्फेयांश्च भवति स्फिरे[3] ।
प्रि[4]यस्थिरेति स्थस्फाभ्यामिष्ठन्नीयसुनोर्विधौ ॥ ३०० ॥

तिष्ठतेस्तु वुकि ह्रस्वे स्थविरो नावरञ्जने ।
तद्भावे स्थाविरं प्राणभृज्जातीत्यञ्विधानतः ॥ ३०१ ॥

खदिरे भेकभेदे स्त्री ना चन्द्रे दन्तधावने ।
रुचिरं न द्वयोः षण्डे सिद्धं बाहुलकादिह ॥ ३०२ ॥

सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच् ॥ १-५२ ॥

एकादश धातवः ॥

स्याज्जले सलिलं मिश्रे गहने कलिलं त्रिषु ॥

अनिलः पुंसि पवने महिला फलिनीस्त्रियोः ॥ ३०३ ॥

पृ[5]षोदरादिपाठेन महेलापीष्यते क्वचित् ।
भडिलः सेवके शूरे भण्डिलः शुभदूतयोः ॥ ३०४ ॥

१. Pā. V-ii-127.
२. Gaṇasūtra under Pā. V-ii-127.
३. Pā. IV-iii-16.
४. Pā V-i-129.
५. Pā. VI-iv-157.
६. Pā. VI-iii-109.

1. वर्तते is missing in the original.
2. The original reads .....द्वार्श आदौ.
3. The original reads स्थेयांश्च भवति स्थिरे.

शण्डिलस्तु मुनौ मूर्खे तीर्थे तु स्यान्नपुंसकम् ।
शाण्डिल्यस्तु भवेत्तस्य गोत्रापत्ये च बिल्वके ॥ ३०५ ॥
पिण्डिलो गणके पुंसि स्थूलजङ्घे च कथ्यते ।
[1]स्यात्तुण्डिलस्तु मुखरे कोकिलस्तूच्यते पिके ॥३०६॥
कोकिलेत्येव टाप् स्त्रीत्वे जातिपुंयोगयोः स्मृतः ।
भविलं भवने प्रोक्तं भव्येऽपि च मनीषिभिः ॥ ३०७ ॥
अत्र बाहुलकात्सिद्धमराले कुटिलं त्रिषु ॥

कपेश्च ॥ १-५३ ॥ कपिः सौत्रो धातुः ॥
कपिला रेणुकायां च शिंशपागोविशेषयोः ॥ ३०८ ॥
पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम् ।
नानले वासुदेवे च मुनिभेदे च कुक्कुरे ॥ ३०९ ॥

गुपादिभ्यः कित् ॥ १-५४ ॥ गुपिलो राज्ञि तिजिलः शशाङ्के गुहिलं वने ।
गुपादिभ्यः किद्वचनादन्येऽप्यूह्या विपश्चिता ॥ ३१० ॥

मिथिलादयश्च ॥ १-५५ ॥ मिथिला नगरीभेदे शैषिकेऽणि तु मैथिलः ।
जानकी मैथिली सीता पथिलः पथिकः स्मृतः ॥३११॥
मिथिलाद्या एवमूह्यास्सविकारा निपातनात् ॥

पतिकठिकुठिगडिगुडिदंशिभ्य एरक् ॥ १-५६ ॥ पतेरो गन्तरि खगे कठेरः कृच्छ्रजीविनि ॥ ३१२ ॥
पर्णाशे तु कुठेरः स्यान्न नुं बाहुलकादिह ।
मेघे गडेरो मशके गुडेरो विबुधैः स्मृतः ॥ ३१३ ॥
हिंस्रे जन्तौ तु कथितो दशेर इति कोविदैः[2] ॥

कुम्बेर्नलोपश्च ॥१-५७॥ कुबेरः पुंसि कथितो नन्दिवृक्षे धनाधिपे ॥ ३१४ ॥

1. The original reads :—स्यात्तुण्डिलस्तु म.....कोकिलस्तूके..... पिके ॥
2. The original adds here :—पाठान्तरम्
खगे पतेरः कूपणे कठेरः पर्णाशवृक्षे कथितः कुठेरः ।
मेघे गडेरो मशके गुडेरो हिंस्रे दशेरो धनदे कुबेरः ॥
धनदे कुबेर इत्युत्तरसूत्रोदाहरणम् । तथाहि—

कृष्णवृन्तौषधीभेदे कुबेराक्षिः[?]स्त्रियां मता ।
बेरशब्दाच्छरीरार्थात्कुसमासेऽप्यमुं विदुः[1] ॥ ३१५ ॥

शदेस्त च ॥ १-५८ ॥ शतेर इति विद्वद्भिः शत्रुवाचि निगद्यते ॥

मूलेरादयश्च ॥ १-५९ ॥ मूलेरस्तु जटायां स्याद्गुघेरो गोप्तरि स्मृतः ॥ ३१६ ॥
गुहेरो लोहघाती स्यान्मुहेरो मूर्ख उच्यते ।
मूलेरादिष्विहान्येऽपि ज्ञेया एवं विचक्षणैः ॥ ३१७ ॥

कबेरोतच् पश्च ॥१-६०॥ कपोतः स्याच्चित्रकण्ठपारावतविहङ्गयोः ।
तद्वृणे त्वनुदात्तादेरञि कापोत उच्यते ॥ ३१८ ॥
मयूरादिष्वेवमेव चित्तवत्सु विचिन्त्यताम् ॥

भातेर्डवत् ॥ १-६१ ॥ भातीत्यर्थे भवच्छब्दः पठितः सर्वनामसु ॥ ३१९ ॥
असौ लोके तु सर्वत्र युष्मदर्थे प्रयुज्यते ।
सामानाधिकरण्येऽपि मध्यमं न प्रयोजयेत् ॥ ३२० ॥
शेषत्वात्केचिदत्राहुरामन्त्रितपरो यदि ।
अन्यूनानतिरिक्तार्थो युष्मच्छब्दश्च तत्करः ॥ ३२१ ॥
बहुमन्ये न तदहं युष्मदस्थानितां वदन् ।
आगच्छ देवदत्तेति प्रभृतिष्ववलोकनात् ॥ ३२२ ॥
यत्र तु प्रथमं तत्र स्थानितापि न युष्मदः ।
न युष्मदर्थो लोकेऽन्यः शब्दः शब्देषु दृश्यते ॥३२३॥
.....तौयोगादनङ्गत्वाच्च तद्विदा [?] ।
तत्र चारोपिताभेदाद्भवेतां मध्यमोत्तमौ ॥ ३२४ ॥
भवानाह भवान् वक्तीत्यादिगौरवगोचरः ।
देवो यदाज्ञापयति स्वामी यदभिमन्यते ॥ ३२५ ॥
यदादिशति च श्रीमानित्याद्यभिमुखोक्तिवत् ।
त्वमर्थेऽस्यहमर्थेऽस्मि तिङन्तप्रतिरूपकम् ॥ ३२६ ॥

१. Pā. IV-ii-44.

1. The original reads **अव्ययं विदुः**.

अस्तु वा युष्मदित्यत्र नार्थग्रहणमिष्यते ।
तत्रापि सत्तोपादित्वान्नैव तुल्यार्थताभ्रमः ॥ ३२७ ॥
त्यैदादित्वाच्च शेषोऽस्य सर्वैः किं शब्दवर्जनम्[1] ।
[2]उदीचां वृद्धादगोत्रादिति पाक्षिकफिञ्विधेः ॥ ३२८ ॥
अणा च भवतोऽपत्ये भावतायनि भावतौ ।
भावत्को भवदीयश्च भवतष्ठक्छसोः स्मृतः ॥ ३२९ ॥
शतुस्तु भवतेः सिद्धादवृद्धादणि भावतः ।
पूर्वपाठाश्रये त्वं च भवांश्चेति युवां भवेत् ॥ ३३० ॥
आवामिति स्यादहं च भवांश्चेति सहत्वतः ।
इतराभ्योऽपि दृश्यन्त इत्यत्र [2]दृशिशब्दनात् ॥३३१॥
त्यदादेः प्रथमाद्यन्तात्प्रत्ययास्तसिलादयः ।
योगे स्युर्भवदादीनां स भवान् हि ततो भवान् ॥३३२॥
अैव्ययानां सर्वनाम्नामपि प्राक्टेरकञ्विधौ ।
अज्ञातादिष्विहार्थेषु भवकानिति कथ्यते ॥ ३३३ ॥
भवादृशो भवादृक्च भवादृक्ष इति त्रयम् ।
आ सर्वनाम्न इत्यात्वे कञ्किन्क्षेषु यथाक्रमम् ॥३३४॥
एवं त्यदादिष्वन्येषु रूपाण्यूह्यानि कोविदैः ।
सर्वनाम त्यदादित्ववृद्धत्वोपनिबन्धनम् ॥ ३३५ ॥
कार्यजातमितोऽन्यत्राप्यूहनीयं यथोचितम् ।

कठिचकिभ्यामोरन् ॥ १-६२ ॥ कठोरः कठिने पूर्णे चकोरस्तु खगान्तरे ॥ ३३६ ॥

किशोरादयश्च ॥१-६३॥ किशोरस्त्वश्वशावे स्यात्तरुणावस्थसूर्ययोः ॥
तैलपर्णीषधौ चापि सहोरस्तु क्षमावति ।
एवं किशोरादयोऽमी विज्ञातव्या विशारदैः ॥ ३३७ ॥

१. Pā. VII-ii-102.
२. Pā. IV-i-157.
३. Pā. V-iii-71.
४. Pā. VI-iii-91.

1. The original reads शब्दर्सं ··· न्.
2. The original omits दृशि.

कपिगडिगण्डिकटि-पटिभ्य ओलच्॥१-६४॥

"कपिगडिगण्डिकण्डिपटिभ्य ओलच्" इति केचित् पठन्ति

गण्डस्थले कपोलो नाथ गडोलश्च गण्डोलः ।
द्वावपि कथितौ गुडके स्याद्वरटायां तु गण्डोली ॥३३८॥
कटोलस्त्रिषु कट्वर्थः पटोलं तु पटान्तरे ।
ओषधौ ना पटोलीति ज्योत्स्निकायां निगद्यते ॥३३९॥
सूत्रे तुर्यः कण्डिरिति कैश्चिदुक्तो मदार्थकः ।
तदा कण्डोल इत्यासीच्चण्डाले पिटकेऽपि च ॥३४०॥
बहुलोक्तेस्तु कल्लोलो हर्षोल्लोलरिपुष्विह ॥

मीनातेरूरन् ॥ १-६५ ॥

मयूरो बर्हिचूडायामपामार्गे शिखण्डिनि ॥ ३४१ ॥

स्यन्देस्संप्रसारणं च ॥ १-६६ ॥

सिन्दूरस्तरुभेदे ना रक्तचूर्णे तु न द्वयोः ।
सिन्दूरी रोचनारक्तवेल्लिकाधातकीषु च ॥ ३४२ ॥

सितनिगमिमसिस-क्यविधाञ्क्रुशिभ्य-स्तुन् ॥ १-६७ ॥

अष्टौ धातवः ॥

वरणालिप्रकारेषु सेतुस्तन्तुर्गुणेऽन्वये ।
वरतन्तुर्मुनौ तत्र तित्तिरीत्यादिसूत्रतः[1] ॥ ३४३ ॥
तच्छीलाध्यायिनो वारतन्तवीयाश्छणि स्मृताः ।
द्वावामश्चेत्यणि भवेत् तन्तुवायः कुविन्दके[2] ॥ ३४४ ॥
अपत्ये तान्तुवाय्यः स्यात्सेनान्तेत्यादिना[3] ण्यतः ।
तान्तुवायिरुदीचामिञिति सूत्रान्तरादिञि[4] ॥ ३४५ ॥
पान्थे गन्तुरयं स्यादाङ्पूर्वकः सन्गृहागते ।
मस्तु मण्डे सक्तुशब्दश्चूर्णार्थोऽभिहितोऽस्त्रियाम्॥३४६
चरव्यवदिहापि स्यात्सक्तव्यः सक्तवे हितः ।
सिध्मादिगणपाठेन सक्तुलस्तद्वति स्मृतः[5] ॥ ३४७ ॥

१. Pā. IV-iii-102.
२. The original omits **तच्छी**.
३. Pā. III-ii-2.
४. Pā. IV-i-152.
५. The original omits **तान्तुवायि**.
६. IV-i-153.
७. Pā. V-ii-97.

गुडादिभ्यः छञि भवेत्साधुः सक्तुषु साक्तुकः ।
ओतुर्बिडाले स्थूलोतुः स्थूलौतुरिति च द्विधा ॥ ३४८ ॥

स्यात्समासेऽथ धातुर्ना श्लेष्मरक्तरसादिषु ।
इन्द्रियेष्वश्मविकृतौ शब्दयोनौ च वर्तते ॥ ३४९ ॥

भूतेषु तद्गुणेष्वेवं विशेषादस्ति गैरिके ।
लोहे स्वभावे स्वर्णेऽथ पुंसि क्रोष्टा सृगालके ॥३५०॥

सृगाल्यां तु भवेत्क्रोष्ट्री तृज्वद्भावानुशासनात् ।
यतो रूपातिदेशोऽयमृन्नेभ्यो ङीप् ततो भवेत् ॥३५१॥

पः किच्च ॥ १-६८ ॥ पीतुर्हस्त्यग्निसूर्येषु पुंसि क्लीबं तु चक्षुषि ॥

अर्तेश्च तुः ॥१-६९॥ किच्चेत्यनुवर्तते ॥

स्त्रीणां च कुसुमे काले मानभेदेऽप्यृतुः स्मृतः ॥३५२॥

वायव्यवहतव्योऽत्र देवतार्थे यति स्मृतः ।
प्राप्तोऽस्यर्तुरिति त्वर्थे स्यादार्तवमृतोरणि[1] ।
ऋत्विग्दधृक्स्रग्दिगिति किन्प्रत्ययनिपातनात् ॥३५३॥

यज्ञर्त्विग्भ्यां घखञाविति सूत्रेणात्र खञ्विधानवशात् ।
यजमान आर्त्विजीनः तत्कर्मार्हश्च वार्तिकादृत्विक् ॥३५४

अष्टौ धातवः । किदिति निवृत्तम् ॥

कमिमनिजनिगाभा-
यापाहिभ्यश्च ॥१-७०॥ कन्तुः कुसुले कन्दर्पे हृदये कामुके च ना ।
प्रागेर्वार्जिदृशीत्यादिनोप्रत्ययविधौ तुकि ॥ ३५५ ॥

सिद्धोऽपि कन्तुशब्दोऽत्र रीतिभेदेन साधितः ।
मन्तुः पुंस्यपराधे च मनुष्येऽपि प्रजापतौ ॥ ३५६ ॥

१. Pā. IV-iv-103.
२. Pā. VII-i-95.
३. Pā. IV-i-5.
४. Pā. V-i-105.
५. Pā. III-ii-59.
६. Pā. V-i-71.
७. Vā. V-i-71.
८. Un. I-25

सुमन्तुर्व्यासशिष्ये ना सुजने च प्रकीर्तितः ।
जन्तुः प्राणिनि गातुस्तु भृङ्गे पुंस्कोकिलेऽपि च ॥३५७॥

गन्धर्वे गायके चाथ भातुः सूर्याग्निदीप्तिषु ।
यातुर्ना पथिके काले यामे क्लीबं तु रक्षसि ॥ ३५८ ॥
त्रिषु स्याद्द्रक्षके पातुर्हेतुर्ना कारणे स्मृतः ॥

चायः किः ॥१-७१॥ केतुर्ध्वजे गृहे चिह्ने किरणोत्पातवह्निषु ॥ ३५९ ॥
सुकेतुर्यक्षभेदे स्यात्तालकेतुस्तु राक्षसे ॥

आप्नोतेर्ह्रस्वश्च ॥१-७२॥ अप्तुर्योनावभीष्टार्थे शरीरे च क्रतावपि ॥ ३६० ॥

अभीष्टार्थप्रापकत्वादप्तोर्यामो मखान्तरे ।
स्यादाप्तोर्यामिकी तस्य दक्षिणाठञ्विधानतः ॥ ३६१ ॥
यज्ञाख्येभ्य इतोऽन्यत्राप्येवमेवोह्यतां बुधैः ॥

वसेस्तुन् ॥ १-७३ ॥ वस्तु प्रमेयेऽप्याख्यातं परमार्थेऽपि न द्वयोः ॥ ३६२ ॥

अगारे णिच्च ॥ १-७४ ॥ पुंनपुंसकयोर्वास्तु सुरङ्गायां निकेतने ।
शाकभेदे पुरे सीम्नि गृहभूमौ च कथ्यते ॥ ३६३ ॥

वास्तोष्पतिर्देवतास्येत्यर्थेऽस्मिन् छयतोर्विधेः ।
वास्तोष्पतीयमिति च वास्तोष्पत्यमिति क्रमात् ॥३६४
चतुरर्थ्यां सुवास्त्वादिभ्योऽणि सौवास्तवो भवेत् ॥

कृञः कतुः ॥ १-७५ ॥ मुनिभेदे क्रतुः पुंसि संकल्पेऽप्यध्वरेऽपि च ॥ ३६५ ॥
पूतक्रतुस्तत्र पूतो यया वा येन वा क्रतुः ।
पुंयोगे तु भवेत्पूतक्रतायीत्वैत्वङीब्वशात् ॥ ३६६ ॥

एधिवह्योश्चतुः ॥१-७६॥ एधतुः पुरुषेऽथाग्नौ वहतुर्वृषपान्थयोः ।
विवाहकाले पित्राद्यालब्धे कन्याधनेऽपि च ॥ ३६७ ॥

जीवेरातुः ॥ १-७७ ॥ जीवातुरस्त्रियां धर्मे जीवनेऽन्ने कृषीवले ।

आतृकन् वृद्धिश्च ॥ १-७८ ॥ जैवातृकश्चन्द्रभिषगायुष्मत्सु कृषीवले ॥ ३६८ ॥

१. Pā. V-i-95. २. Pā. IV-ii-77.

कृषिचमितनिधनिसर्जि-खर्जिभ्य ऊः ॥१-७९॥ षड् धातवः ॥

कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्याल्पखातयोः।
नद्यौश्शेषस्येति सूत्रे कृन्नद्याः प्रतिषेधतः ॥ ३६९ ॥

धैरूपादौ परे नैव ह्रस्वः कर्षुतरादिषु ।
एवं लक्ष्मीतरादौ च ह्रस्वो नेत्यवगम्यताम् ॥ ३७० ॥

ओर्देशे ठञि नैषादकर्षुको दाक्षिकर्षुकः ।
इहस्यादिसु[?]सूक्तान्तात्को ह्रस्वः केऽर्ण इत्यपि ॥३७१॥

चमूः सेनाचमसयोः शरीरे तु तनूरिति ।
धनूर्धान्यादिनिचये नितम्बिन्यामपि स्त्रियाम् ॥ ३७२ ॥

कार्मुके चाथ कथिता सर्जूर्वणिजि विद्युति ।
स्त्रियां स्वर्गे विधौ रुद्रेऽप्यथ खर्जूर्निगद्यते ॥ ३७३ ॥

कीटान्तरे च पामायां खर्जूरीपादपेऽपि च ।

मृजेर्गुणश्च ॥ १-८० ॥ स्त्रियां मर्जूः स्मृता शुद्धौ धावके पुंसि कथ्यते ॥३७४॥

वहेर्धश्च ॥ १-८१ ॥ वधूः स्नुषा नवोढा स्त्री भार्यापृक्काङ्गनासु च ।

कषेश्छ च ॥ १-८२ ॥ कच्छूरिति स्त्रियां पामासमानार्थो निगद्यते ॥ ३७५ ॥

कच्छ्वाह्रस्वत्ववचनान्मत्वर्थीये तु कच्छुरः ।
ह्रस्वमध्यो भेद्यलिङ्गो रोदस्यां कच्छुरा स्त्रियाम् ॥३७६॥

णित्कसिपद्यर्तेः ॥ १-८३ ॥ कासूर्विकलवाचि स्यात्कुधीशक्त्यायुधामये ।
कासूतरा तु कथिता ह्रस्वा सैव ष्वरज्व[तरब्व]शात् ॥

पादूरुपानहि स्थाल्यामारूः पिङ्गलवृक्षयोः ॥

अणो डश्च ॥ १-८४ ॥ आडूस्तु कथ्यते धीरैः जलप्लवनसाधने ॥ ३७८ ॥

नञि लम्बेर्नलोपश्च ॥ १-८५ ॥ स्त्रियामलाबूशब्दोऽयं तुम्बिकायां निगद्यते ।
अलाबूनां रजो यत्तु तदलाबूकतं स्मृतम् ॥ ३७९ ॥

१. Pā. VI-iii-44.
२. Pā. VI-iii-43.
३. Pā. IV-ii-119.
४. Pā. VII-iv-13.

के भ्र एरक् चास्य ॥ १-८६ ॥

कशेरूर्ना विदर्या च तृणकन्देऽपि च स्त्रियाम् ।
उप्रत्ययाद्वाहुलकात्कशेरुर्नकुलेन्द्रयोः ॥ ३८० ॥

कर्णिकारे वसावेण्यां शक्रकोपे गणेऽपि च ॥

ओ डुट् च ॥ १-८७ ॥

डुक् चेति केचित् ॥
तर्डूर्दोणिप्लवे दर्व्यां डुक्पाठे सौत्रचाद्गुणः ॥ ३८१ ॥

दरिद्रातेर्यालोपश्च ॥ १-८८ ॥

भवेद्वाहुलकोक्तेर्वा डुट्पाठस्तु सुपेशलः ।
दद्रूर्दर्द्रूस्तथा दर्दूरिति कुष्ठे त्रयं स्मृतम् ॥ ३८२ ॥

व्याख्याभेदाद्दरिद्रातेर्यालोपश्चेति सूत्रजात् ।
मृगय्वादिषु पाठेन तत्र दद्रुरिति स्मृता ॥ ३८३ ॥

अत्र शाकीपलालीति पामादिगणसूत्रतः ।
ह्रस्वत्वे दीर्घभाजोऽपि दद्रुणो दर्द्रुरोगिणि ॥ ३८४ ॥

नृतिशृध्योः कूः ॥ १-८९ ॥

नृतूर्नटे क्रिमौ दीपे शृधूर्दीनोक्त्यपानयोः ।

ऋतेरम् च ॥ १-९० ॥

रतुः पान्थे सत्यवाचि देवनद्यां च कथ्यते ॥ ३८५ ॥

अन्दूहम्भूजम्बूकफेलू-कर्कन्धूदिधिषूः ॥ १-९१ ॥

षट् शब्दाः । "अन्दूहम्भूजम्बूकम्बूकफेलूकर्कन्धू-दिधिषूः" इति केचित्सप्त शब्दान् पठन्ति ॥

अन्दूः स्त्रियां स्यान्निगले प्रभेदे भूषणस्य च ।
केऽपि केऽर्णे इति ह्रस्वेऽप्यन्दुकोऽत्र निगद्यते ॥३८६॥

स्वार्थिकानां प्रकृतितः क्वचिल्लिङ्गातिवर्तनात् ।
स्त्रीलिङ्गादपि संज्ञायां कनि पुंलिङ्गता दृढा ॥ ३८७ ॥

अदि बन्धन इत्यस्मान्निष्पन्नार्थ ईदृशः ।
अमेर्दुगागमेऽप्याहुर्बुद्धिवाचक इत्यमुम् ॥ ३८८ ॥

१. Un. I-37.
२. Gaṇasūtra 12 under Pā. V-ii-100.
३. Pā. V-ii-100.
४. Pā. VII-iv-13.

दृम्भूशब्दो दृभी ग्रन्थ इति धातोस्तुदादिजात् ।
गुरुबाहुलके सिद्धः स तु सन्दर्भकर्तरि ॥ ३८९ ॥

कथके चास्य रूपाणि हूहूशब्दवदूचिरे ।
अन्ये तु दृढशब्दस्योपपदस्य सतो दृशम् ॥ ३९० ॥

आदेशयन्तो भूधातोराहुः कूप्रत्ययं बुधाः ।
यद्वा दृढार्थकं नान्तमव्ययं दृन्निति श्रिताः ॥ ३९१ ॥

भवतेरेव तस्यार्थान् तरुसर्पकपीन् विदुः ।
समं प्रकृत्युवर्णेन दीर्घोऽप्यत्र निपातनात् ॥ ३९२ ॥

अैचिश्नुधात्विति प्राप्तो न बाध्येतोवङन्यथा ।
अव्यये दृन्युपपदे हिंसार्थे भवतेः क्विपम् ॥ ३९३ ॥

मन्वानः श्रीपतिर्ब्रूते दृन्भूरहिरिति स्फुटम् ।
द्वितीयौष्ठ्यान्वितं पाठमत्र केचिद्वितेनिरे ॥ ३९४ ॥

मेदिन्यादिनिघण्टूक्तिविरोधान्नैतदादृतम् ।
दैन्करेति यणादेशे सति वार्तिकशासनात् ॥ ३९५ ॥

वैर्षाभूवदिदं रूपाण्युन्नेयानि स्वया धिया ।
जम्बूर्जनेर्जमेर्वा स्यात्कूप्रत्ययबुकोः सतोः ॥ ३९६ ॥

वृक्षभेदे बाहुलकादपि ह्रस्वान्तता क्वचित् ।
ओरैञा जाम्बवो ग्रामो जम्बुदूरभवः स्मृतः ॥ ३९७ ॥

ततो जौम्बवशालूकिन्याविति द्वन्द्वनैकता ।
विशिष्टैलिङ्गसूत्रे खल्वग्रामा इति वर्तते ॥ ३९८ ॥

जम्बा विकारे तु वाच्यवत्स्याट्टेरञि जाम्बवम् ।
फले तु कथितं धीरैर्जम्बावेत्यणि जाम्बवम् ॥ ३९९ ॥

१. Pā. VI-iv-77.
२. Vā. VI-iv.84.
३. Pā. VI-iv-84.
४. Pā. IV-iii-139.
५. Mahābhāṣya. II-iv-7.
६. Pā. II-iv-7.
७. Pā. IV-iii-165.

अणः फले लुकि त्वस्य जम्बुह्रस्वो नपुंसके ।
अप्राणिजातेश्चारज्ज्वादेरित्युक्तस्य वार्तिके ॥ ४०० ॥

लुक् तद्धितलुकीति स्त्रीप्रत्ययस्यात्र लुक् स्फुटः ।
लुप् चेत्यणो लुपि भवेज्जम्बूः स्त्रीयुक्तवद्विधेः ॥ ४०१ ॥

श्लेष्मातके कफेलुः स्यात् कर्कन्धूर्बदरे तरौ ।
दिधिषूस्तु द्विरूढायां कलत्रेऽपि कनीयसि ॥ ४०२ ॥

जम्बूकफेलुमध्येऽत्र कम्बूः कैश्चन पठ्यते ।
स च धीरैः प्रकथितः परद्रव्यापहारिणि ॥ ४०३ ॥

मृग्रोरुतिः ॥ १-९२ ॥ मरुद्भ्रातादिदेवेषु प्रज्ञाद्यणि तु मारुतः ।
अव्युत्पन्नो मरुत इत्यदन्तोऽप्येतदर्थकः ॥ ४०४ ॥

कविप्रयोगानुसारात् संसारावर्तदर्शितः ।
मरुतः पुंसि मत्वर्थे तः पर्वेत्यादि तद्विधेः ॥ ४०५ ॥

मरुत्वान् मतुपा चक्रे वत्वं तु ज्ञेय इत्यतः ।
भत्वाज्जश्त्वं च न भवेत्तसौ मत्वर्थ इत्यतः ॥ ४०६ ॥

द्यौवापृथिव्यादिसूत्राद्देवताच्छयतोरतः ।
भवेन्मरुत्वतीयं च मरुत्वत्यमिति क्रमात् ॥ ४०७ ॥

गरुत्पक्षे र्यवादित्वाद्गरुत्मानिति तु श्रुतिः ।

ग्रो मुट् च ॥ १-९३ ॥ गर्मुडुके खगे सूर्ये लताधान्यतृणान्तरे ॥ ४०८ ॥

हृषेरुलच् ॥ १-९४ ॥ मृगे च कामुके चैव हर्षुलः परिकीर्तितः ।
अत्र सूत्रे विपश्चिद्भिः साधितो बहुलोक्तिभिः ॥ ४०९ ॥

चटुलश्चञ्चले कान्ते दुराधर्षे भयानके ॥

१. Vā IV-i-66.
२. Pā. I-ii-49.
३. Pā. IV-iii-166.
४. Pā. V-iv-38.
५. Pā.VIII-ii-10.
६. Pā. I-iv-19.
७. Pā. IV-i-32.
८. Pā. VIII-ii-9.

इसृहृहियुषिभ्य इतिः ॥ १-९५ ॥

युषिः सौत्रः ॥

[1]हरिर्द्दिशि मृगे वायौ तृणे वर्णेऽर्कवाजिषु ॥ ४१० ॥
सरिन्नद्यां स्मृता रोहिन्मृग्यां वल्लीभिदि स्त्रियाम् ।
पुंसि त्वेष भवेत्सूर्ये स्मृता योषित्तु सुभ्रुवाम् ॥ ४११ ॥
युषिधातुरसौ सौत्रः प्रायेणोणादिगोचरः ॥

ताडेर्णिलुक् च ॥ १-९६ ॥

तृतीयमध्यस्तु तडिच्छब्दः स्याद्विद्युति स्त्रियाम् ॥४१२॥

शमेर्ढः ॥ १-९७ ॥

शण्ढस्तृतीयप्रकृतावाकृष्टाण्डे च गोपतौ ।
अपि वर्षवरे प्रोक्तो युतौ ना वन्ध्यपूरुषे ॥ ४१३ ॥
ढस्येत्संज्ञाथ वाप्येयादेश इड्डेह वर्तिनः ।
सर्वे बाहुलकादेव न प्राप्नोतीति निर्णयः ॥ ४१४ ॥
उत्तरत्राप्येवमेव [2]मन्ताङ्गादिषु स्थितिः ।
मूर्धन्यादिमिमं प्राह षणेर्दानार्थकात्परः ॥ ४१५ ॥

कमेरठः ॥ १-९८ ॥

सुन्दरे कच्छपे खर्वे कमठः पुंसि कथ्यते ।
भिक्षापात्रे तु कमठमिति प्राहुर्नपुंसकम् ॥ ४१६ ॥
जरठः कठिने पाण्डौ कर्कशेऽप्यभिधेयवत् ।
जीर्णेऽप्यसौ बाहुलकादठप्रत्ययतो भवेत् ॥ ४१७ ॥

रमेर्वृद्भिश्च ॥ १-९७ ॥

सहस्रवेधिनि प्रोक्तं रामठं न द्वयोर्बुधैः ॥

शमेः खः ॥ ९९ ॥

शङ्खः स्यान्निधिभेदेऽपि सर्पभेदे नखेऽपि च ॥ ४१८ ॥
ललाटास्थि च ना न स्त्री संख्यावलयकम्बुषु ।
ठकि शिल्पमिति प्रोक्तः शाङ्खिकः कम्बुधमापके[4] ॥

कणेष्ठः ॥ १-१०० ॥

कण्ठो गले समाधाने ध्वनौ मदनपादपे ।
कम्बुकण्ठीत्यादिसिद्ध्यै कठान्तात्स्वाङ्गलक्षणम् ॥४२०॥

१. The original here adds :—आखिरः क्षीरविकृतौ भाजनेऽन्यर्कयातुषु ॥ अजिरशिशिरशिथिलखदिराः । सप्त शब्दाः । अजिरं प्राङ्गणे काये विषये दर्दुरेऽनिले ।

२. Un. Sūtra. I-107.

३. Pā. IV-iv-55.

४. The original reads धावने.

ङीषमाहुर्वृत्तिकारा नैतद्वेद मुनित्रयी ।
एवमेव स्थितिर्वक्ष्यमाणयोरङ्गगात्रयोः ॥ ४२१ ॥

कलस्तृपश्च ॥१-१००॥ तृपला त्रिफलायां च लतायामपि कथ्यते ।
प्राङ्निर्देशात्प्रत्ययस्य ततोऽन्यत्रापि दृश्यते ॥ ४२२ ॥

कुण्डलं मण्डलं चेत्याद्यूह्यमेतेन कोविदैः ।
कुण्डलं पाशवलयकर्णभूषासु कथ्यते ॥
गलूच्यां काञ्चनालौ च कुण्डली समुदीरिता ॥ ४२३ ॥

स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च ।
कुष्ठप्रभेदेऽप्युपसूर्यके च भुजाप्रदेशेषु च मण्डलं स्यात् ॥

इतोऽन्येऽपि प्रयोगानुसारादूह्याः कलस्थले ।
शपेर्बश्च ॥१-१०१ ॥ शबलो वर्णभेदेऽपि मिश्रितेऽपि च वाच्यवत् ॥ ४२५ ॥

वृषादिभ्यश्चित् ॥ ॥ १-१०२ ॥ हये शूद्रेऽपि वृषलः कथितः पुंस्यथ स्त्रियाम् ।
वृषल्यृतुमती कन्या शूद्रा वन्ध्या मृतप्रजाः ॥ ४२६ ॥

पललं तिलचूर्णे च टङ्के मांसे नपुंसकम् ।
यातुधाने त्वयं पुंसि सरलस्तु द्रुमान्तरे ॥ ४२७ ॥

त्रिष्ववक्रेऽप्युदारे च देवलो देवजीवके ।
तरलश्चञ्चले स्निग्धे हारमध्यमणावपि ॥ ४२८ ॥

भासुरे चाथ तरला यवागूसुरयोर्मता ।
प्रत्ययस्यात्र कित्वेऽपि ज्ञेयो बाहुलकाद्गुणः ॥४२९ ॥

कम्बलो नागराजे स्यात्सात्त्वाप्रावारयोरपि ।
उत्तरीयेऽप्यथ क्लीबं कम्बलं सलिले स्मृतम् ॥ ४३० ॥

सुसिद्धोऽभूदयं बिम्बः कमेर्बाहुलके बुकि ।
ऊर्णापलशते प्राहुः कम्बल्यं सैांज्ञिके यति ॥ ४३१ ॥

१. Pā. V-i-3.

द्वाभ्यां कम्बल्याभ्यां क्रीता स्त्री स्यात् द्विकम्बल्या ।
द्विगोर्डीपोऽपैरिमाणेत्यादिनिषेधेन तद्धितस्य लुकि॥४३२॥

असंज्ञायां कम्बलीया स्यादूर्णौत्सर्गिकच्छतः ।
पैाण्डुकम्बलमुदिते रथे [लसंवीते रथे] स्यात्पाण्डुकम्बली॥

अयोऽग्रे पुंसि च क्लीबे मुसलं स्यात्स्त्रियां त्वसौ ।
तालमूल्यामाखुपर्णीगृहगोधिकयोरपि ॥ ४३४ ॥

दन्त्यमूर्धन्यतालव्यान्ततया मतभेदतः ।
मुस खण्डन इत्यस्य पाठाज्जातोऽप्ययं त्रिधा ॥ ४३५ ॥

मुसल्यो मुसलीयश्च पामा[श्वापूर्वा]दित्वेन यच्छयोः ।
प्राक्क्रीतीयेष्विहार्थेषु कथितावभिधेयवत् ॥ ४३६ ॥

लाङ्गली जलपिप्पल्यां लाङ्गलं कुसुमान्तरे ।
ताले हले तृणे राजगृहदारुभिदोर्जले ॥ ४३७ ॥

दीर्घो बाहुलकादन्यधातोरनुमतो बुधैः ।
ग्रहेरस्मिन्नुपपदेऽच्प्रत्ययाल्लाङ्गलग्रहः ॥ ४३८ ॥

कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे ।
तृतीयान्तात्कुड इत्येतेष्वर्थेषु परे जगुः ॥ ४३९ ॥

मूर्च्छायां कश्मलं क्लीबं कोमलं मृदुले जले ।
कुड्मलादिषु मुड्बाहुलकादस्मिन्गुणोऽप्यसौ ॥ ४४० ॥

देशभेदे बाहुलकात्स्यातां कोसलकोशलौ ।
अपत्ये कोसलस्यार्थे तात्स्थ्यात्क्षत्रियवाचिनः ॥ ४४१ ॥

स्याद्वृद्धेर्नकोसलाजादाञ्ञ्यङिति ञ्यङतो यदि ।
स्त्रीत्वे सिध्यति कौसल्या यैङश्चाबिति चाब्वशात्॥४४२॥

वृद्धेत्सूत्रे दन्त्यपाठः कोसले साम्प्रदायिकः ।
संबलोऽस्त्री शम्बलवत्कूलपाथेयमत्सरे ॥ ४४३ ॥

१. Pā. IV-i-21.
२. Pā. IV-i-22.
३. Pā. IV-ii-11.
४. Pā. V-i-4.
५. Pā. IV-i-171.
६. Pā. IV-i-74.

कदली वैजयन्त्यां च रम्भायां हरिणान्तरे ।
कदला शाम्बरीपुत्रीबिम्बिकासु च कथ्यते ॥ ४४४ ॥
आह्वानार्थकदेरत्र नलोपः प्राग्वदूह्यताम् ।
अजादिराकृतिगणः कदलायां ततोहि टाप् ॥ ४४५ ॥
गौरादिङीषि कदलीत्येवमत्र विचिन्त्यताम् ।
पिङ्गलः स्यान्मुनौ रुद्रे चण्डांशोः पारिपार्श्वके ॥४४६॥
विधिभेदे कपावह्नौ कपिले त्वभिधेयवत् ।
स्त्रियां वेश्याविशेषे च करिण्यां कुमुदस्य च ॥४४७॥
हिंसार्थपिञ्जेर्न्यङ्कादिपाठात्कुत्वमिहागतम् ।
सौत्रादत्र कुशेर्धातोः कुशलः शिक्षिते त्रिषु ॥ ४४८ ॥
क्षमे च सुकृते चाथ पर्याप्तौ स्यान्नपुंसकम् ।
कुशान् लातीति कुशलमित्यप्याहुरिमं बुधाः ॥४४९॥
तत्र रूढेर्यौगिकार्थापहारित्वं प्रचक्षते ।
ब्राह्मणादौ युवादौ च पाठादस्य गणद्वये ॥ ४५० ॥
कौशल्यं कौशलमिति द्विधा स्याद्भावकर्मणोः ।
धावेर्बाहुलकाद्ध्रस्वे स्यादत्र धवला गवि ॥ ४५१ ॥
वृषश्रेष्ठे पुमान् वाच्यलिङ्गः शुक्ले च सुन्दरे ।
कमलं सलिले ताम्रे जलजे व्योम्नि भेषजे ॥ ४५२ ॥
शस्त्राणां छुरिकादीनां हेमाद्यैश्चिह्नितेऽजिने ।
मृगभेदे तु कमलः कमला श्रीवरस्त्रियोः ॥ ४५३ ॥
पटलं नेत्ररोगे च तिलके च परिच्छदे ।
छदिष्वपि समूहे च मणीनामपि दूषणे ॥ ४५४ ॥

१. Pā. IV-i-4.
२. Pā. IV-i-41.
३. Kṣirasvāmin on Amara I-iii-26.
४. Pā. V-i-124.
५. Pā. V-i-130.

छलन्तु स्खलिते व्याजे छयतेरालोपसंभवात् ।
वृषादिभ्यश्चिदित्येवं स्वरभेदाय दर्शिते ॥ ४५५ ॥

गणेऽस्मिन् तादृशोऽन्येऽपि विज्ञेयाः प्रतिपत्तृभिः ।
मलोऽस्त्री पापविट्किट्टे कृपणेऽप्यभिधेयवत् ॥ ४५६ ॥

मृजेष्टिलोपश्च ॥ १-१०३ ॥

ज्योत्स्नातमिस्रासूत्रेण मत्वर्थीये निपातनात् ।
मलयुक्ते वाच्यलिङ्गं मलिनं च मलीमसम् ॥ ४५७ ॥

चुपेरुपधायाः ॥ १-१०४ ॥

चपलः पारदे मीने चोरके प्रस्तरान्तरे ।
चपला कमलाविद्युत्पुंश्चलीपिप्पलीषु च ॥ ४५८ ॥

नपुंसकं तु शीघ्रे स्याद्वाच्यवत्तरले स्मृतम् ।
चापल्यं चापलमिति स्यादस्मात्कुशलाद्यथा ॥ ४५९ ॥

शकिशम्योर्नित् ॥ १-१०५ ॥

शकलं त्वचि खण्डे च रागवस्तुनि वल्कले ।
शकलो मुनिभेदे स्याद्गर्गादिर्गणदर्शितः ॥ ४६० ॥

ष्फाणोश्च सिद्धये मध्ये पठितः कतकण्वयोः ।
सिद्धं द्वयमिदं शाकल्यायनिः शाकलश्च यत् ॥४६१॥

साधारणं यत्राद्यत्र गर्गशब्दे प्रवक्ष्यते ।
अस्मादिनौ त्वग्वचनात्पाठीने शकली स्मृतः ॥ ४६२ ॥

असौ तु यो रागवस्तुवचनो वर्तते ततः ।
तेन रक्ते शाकलिकः शाकलष्ठगणोः क्रमात् ॥४६३॥

शमलं पापशकृतोः क्लीबं स्यादशुकात्रिषु[?] ।

छो गुकूहूस्वञ्च ॥ १-१०६ ॥

छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके ॥ ४६४ ॥
छागमातरि भैषज्ये कैतवे तु पुमानयम् ।

१. Uṇ. sūtra I-102.
२. Pā. V-ii-114
३. Pā. IV-i-105.
४. Pā. IV-ii-1.

प्रज्ञादित्वादणि भवेदत्र छागल इत्यपि ॥ ४६५ ॥

मत्वर्थीय इनौ त्वत्र छगलाच्छागली मुनौ ।
एतत्प्रोक्तमधीयाना जनाः छागलिनेयिनः ॥ ४६६ ॥

विकर्णशुङ्गच्छगलादित्यत्र छागलोऽण्वशात् ॥

अमन्ताडुः ॥ १-१०७ ॥ अमन्तेभ्यस्तु धातुभ्यो डप्रत्ययविधानतः ॥ ४६७ ॥

शब्दाः स्युर्दण्डरण्डाद्याः ज्ञेयास्ते च प्रयोगतः ।
प्रत्ययादेर्डकारस्य नेत्त्वं बाहुलकादिह ॥ ४६८ ॥

षैः प्रत्ययस्येति योगाच्चुटू इति पृथक्कृतेः ।
प्रश्लेषाद्वा यकारस्य चुञ्चुपश्चणपो यथा ॥ ४६९ ॥

दण्डोऽस्त्री मदहिंसासेनालगुडेषु शासने राज्ञाम् ।
मण्डे मानविशेषे व्यूहे रविपारिपार्श्विके यष्टौ ॥४७०॥

दण्डमर्हति यस्तत्र दण्ड्यः स्यादभिधेयवत् ।
निपातनाट्टिलोपो न दाण्डिनायनसूत्रतः ॥ ४७१ ॥

नडादित्वात्फगेतस्मादथवोक्तनिपातनात् ।
दण्डः प्रहरणं तस्यां दण्डा क्रीडा हि सा णतः ॥४७२॥

दण्डपातः क्रियास्यां चेद्दाण्डपातेति जेस्त्रियाम् ।
द्वाभ्यां प्रवृत्तं दण्डाभ्यां द्विदण्डि तदुदाहृतम् ॥४७३॥

द्विदण्ड्यादिभ्यश्चसूत्रादिच्समासान्तवर्तकात् ।
दण्डयुक्ताजिनं दण्डाजिनं दम्भार्थकं ततः ॥ ४७४ ॥

स्याद्दाण्डाजिनिकस्तेनान्विच्छतीत्यर्थके ठञि ।

१. Pā V-iv-38.
२. Pā. IV-i-117.
३. Pā. I-iii-6.
४. Pā. I-iii-7.
५. Pā. VI-iv-174.
६. Pā. IV-i-99.
७. Pā. V-iv-128.
८. Pā. V-ii-76.

रण्डा मूषकपर्ण्यो च विधवायां च योषिति ॥ ४७५ ॥

खण्डोऽस्त्री शकलेनेक्षुविकारमणिभेदयोः ।
पूर्वान्वयेन वा पुंसीत्यस्यैामरनिबन्धने ॥ ४७६ ॥

व्याख्यातारः खण्डशब्दं द्विलिङ्गं शकले जगुः ।
मत्वर्थीये ठनि भवेत्खण्डिकः खण्डपाठके ॥ ४७७ ॥

हरेणौ खण्डिका स्त्री स्यात्खण्डा वा खण्डिका कनि ।
खैण्डिकादिभ्यश्च नषुञा[सूत्रादञा] खाण्डिकमुच्यते ॥४७८॥

तत्प्रोक्ताध्यायिनः खाण्डिकीयाश्छण्प्रत्यये स्मृताः ।
मण्डं मस्तुनि शाके च मण्डः स्यात्सारपिच्छयोः ॥ ४७९ ॥

एरण्डे भूषणे चाथ मण्डा धान्यामुदाहृता ।
मण्डा तु पांसुलायां स्त्री त्रिषु हस्तादिवर्जिते ॥ ४८० ॥

अण्डः खगादिकोशे स्यान्मुष्के वीर्येऽपि च क्वचित् ।
आण्डिरस्तद्युते काण्डीण्डादीरन्नीरचोर्विधेः ॥ ४८१ ॥

षण्डं पद्मादिसंघाते न स्त्री स्याद्गोपतौ पुमान् ।
दानार्थकः स्यात् त्र[कात् स्यात्तु] षणेः षस्य बाहुलकान्न षः[सः] ।
तालव्यादिमिमं प्राहुरपरे शमिधातुजम् ॥ ४८२ ॥

गण्डो व्रणे कपोले पिटके गर्वे मृगान्तरे योगे ।
मूलादिपृष्ठभागे हयभूषणबुद्बुदेऽप्युपाये च ॥ ४८३ ॥

चण्डो ना तिन्त्रिणीवृक्षे यमिकिङ्करदैत्ययोः ।
चण्डी कात्यायनीदेव्यां हिंस्राकोपनयोषितोः ॥ ४८४ ॥

चण्डा धनहरीशङ्खपुष्प्योस्त्विष्वतिकोपने ।
तीव्रेऽथ पण्डशण्डेऽपि बुद्धावेष स्त्रियां मतः ॥ ४८५ ॥

१. Amarakośa I-iii-16. Compare Bhānuji's commentary thereon.
२. Pā. IV-ii-45.
३. Pā. V-ii-111.

आद्यादपत्ये चाण्डाली[पाण्डारो]वक्किमादौ[?]प्रकीर्तितः ।
आरकोरकि वक्तव्ये वचनादन्यतोऽप्यसौ ॥ ४८६ ॥

गीर्धाया ढ्रञ्विधावारगुर्दीचामिति शासने ।
द्वितीयस्मात्तारकादेः पण्डितो विदुषि स्मृतः ॥४८७॥

गमनैकस्वभाव[भावेऽपि] द्रमिडो देशभेदजे ।
नेर्ड्रशितीण्णिनिषेधस्तु नात्र बाहुलकाद्भवेत् ॥ ४८८ ॥

द्रमहम्मेतिपठिताद्धातोरेष प्रसाधितः ।
गत्यर्थकाद्द्वितीयादेः फपन्दोऽपि [फणेः फण्डोऽपि] दृश्यते

अतः प्रज्ञाद्यणि भवेत्फाण्डमित्युदरार्थकम् ।
कादिभ्यः कित् ॥ १-१०८ ॥ किदयं कादिधातुभ्यः शिष्टोऽथप्रत्ययो यतः ॥ ४९० ॥

कुण्डकाण्डादयः शब्दा विज्ञेयास्तत्र कोविदैः ।
कुण्डमन्यालये मानभेदे देवजलाजशये ॥ ४९१ ॥

कुण्डी कमण्डलौ जारात्पतिवल्ली सुते पुमान् ।
पिठरे तु न नाशब्दो प्रकृत्यर्थात्कुणेरसौ ॥ ४९२ ॥

कुण्डं प्रकुण्डपूरं च णमुलन्ताव्यये इमे ।
वर्षप्रमाण ऊलोपश्चेत्यादेरनुशासनात् ॥ ४९३ ॥

काण्डं नाले तरुस्कन्धे बाणेऽवसरनीरयोः ।
कुत्सिते रहसि स्तम्बे बर्गेऽप्येतदुदाहृतम् ॥ ४९४ ॥

कान्त्यर्थकात्कमेरेष दीर्घप्राप्त्या निरूप्यते ।
काण्डीरः काण्डवत्युक्तो मत्वर्थीये सतीरनि ॥ ४९५ ॥

प्रकाण्डं न द्वयोः शस्ते तरुस्कन्धे तु न स्त्रियाम् ।
गोप्रकाण्डादयः प्रोक्ताः प्रशस्तेषु गवादिषु ॥ ४९६ ॥

१. Pā. IV-i-129.
२. Pā. IV-i-130.
३. Pā. V-ii-36.
४. Pā. VII-ii-8.
५. Pā. V-iv-38.
६. Pā. III-iv-32.

प्रशंसावचनैश्चेति जातिशब्दसमासतः ।
गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोः ॥ ४९७ ॥

गुडास्नुही च कथिता गुलिकायां च योषिति ।
स्नुहीसदृशकेशत्वाद्गुडाकेशश्शिवे स्मृतः ॥ ४९८ ॥

गुडे साधुर्गौडिकः स्यात् गुडादिभ्यष्ठञीरणात् ।
भ्रमणार्थाद्घुणेर्घुण्डशब्दोऽत्र भ्रमरार्थकः ॥ ४९९ ॥

अत्र कुण्डादयः शब्दाः कादिभ्यः किदितीरिताः ।
गण्डशब्दोऽस्य विषयेऽप्यभूत्प्रागेव दर्शितः ॥ ५०० ॥

अनुनासिकलोपादिकित्कार्याणामदर्शनात् ।
साम्राज्यमेतद्बहुलग्रहणेनेति चिन्त्यताम् ॥ ५०१ ॥

गडिधातुरिदित्कश्चिदस्ति तस्मात्तु वा भवेत् ।
अमन्तादित्यत्र सूत्रे पदं नैवानुवर्तते ॥ ५०२ ॥

अतो गुधातोरप्यासीद्गुडशब्दो न चेत्कथम् ।
एवमन्येऽपि धातुभ्यः कादिभ्यस्स्युर्यथोचितम् ॥५०३॥

स्थाचतिमृजेरालज्वा- उखायां पाटलायां च स्थाली स्थालं तु भाजने ।
लजालीयचः ॥१-१०९॥ बाधित्वा चित्स्वरं पक्षे भवेदस्याद्युदात्तता ॥ ५०४ ॥

इत्थमालच्प्रत्ययादिराकारस्स प्रयोजनः ।
पाकार्हत्वेन ये स्थालीबिलमर्हन्ति ते पुनः ॥ ५०५ ॥

स्थालीबिल्याः स्मृताः स्थालीबिलीया अपि तण्डुलाः ।
चात्वालो यज्ञकुण्डेऽपि दर्भेष्वपि च विश्रुतः ॥५०६॥

मार्जालीयोऽनले रुद्रे बिडाले कायशोधने ॥

१. Pā. II-i-66.
२. Pā. IV-iv-103.
३. Uṇ. I-107.
४. Pā. V-i-70.

पतिचण्डिभ्यामालञ् ॥ १-११० ॥

पातालं भोगिलोके स्याद्विवरे बडबानले ॥ ५०७ ॥
क्रूरकर्मणि चण्डालो ब्राह्मण्यां शूद्रजेऽपि च ।
ईदित्वान्नुम्यदुपधत्वाभाद्वृद्धिरत्र न ॥ ५०८ ॥
प्रज्ञाद्यणिति चाण्डालोऽप्यस्तीत्येके बभाषिरे ।
अन्ये त्वालनि पाताले वृद्धिं बाहुलकाज्जगुः ॥ ५०९ ॥
चण्डालात्स्वार्थकमणं छन्दस्याहुर्विचक्षणाः ।
स्त्रीत्वे शार्ङ्गरवादित्वाच्चण्डाली ङीनि कथ्यते ॥ ५१० ॥
चण्डालशब्दात्पुंलिङ्गादपत्येऽत्र विवक्षिते ।
चाण्डालकिरिति व्यासवरुडेत्यादिवार्तिकात् ॥ ५११ ॥
ढक्प्रत्यये तु स्त्रीलिङ्गाच्चाण्डालेय इति स्फुटम् ॥

तमिविशिबिडिमृणिकुलिकपिपल्यट्टपष्ठिभ्यः कालन् १-१११ ॥

नव धातवः ॥
तमालस्तिलके खड्गे तापिञ्छे वरणद्रुमे ॥ ५१२ ॥
विशाला त्विन्द्रवारुण्यामुज्जयिन्यां च कथ्यते ।
नृपवृक्षभिदोः पुंसि विशालं पृथुलेऽन्यवत् ॥ ५१३ ॥
बिडालो नेत्रपिण्डे स्यान्मार्जारे च खगान्तरे ।
मृणालं नलदे क्लीबं पुंनपुंसकयोर्बिसे ॥ ५१४ ॥
कुलालः कुम्भकारे स्यात्ककुभे कौशिकेऽञ्जने ।
कपालोऽस्त्री शिरोऽस्थि स्याद्घटादेश्शकले व्रजे ॥५१५॥
नलोपः सौत्रनिर्देशात्कपेश्चलनवाचकात् ।
व्रीह्यादीनां तृणे क्लीबं पलालमिति कथ्यते ॥ ५१६ ॥
पलाली विबुधैः प्रोक्ता पलाले महति स्त्रियाम् ।
तत्र शाकीपलालीति पामादिगणसूत्रः ॥ ५१७ ॥
मत्वर्थीये वाच्यलिङ्गं ह्रस्वत्वे स्यात्पलालिनम् ।

१. Pā. VII-i-58.
२. Pā. V-iv-38.
३. This अन्ये seems to be Mādhava.
४. Pā. IV-i-73.
५. Vā. IV-i-97.
६. Pā. V-ii-100.

अट्टालो ना दुर्गभूमिसन्निवेशे जनाश्रये ॥ ५१८ ॥

पाञ्चाली पुत्रिकागोत्र्योः स्त्रियां पुंभूम्नि नीवृति ।
पाञ्चाली द्रौपदी प्रोक्ता वल्लदन्तादिपुत्रिका ॥ ५१९ ॥

पाञ्चालिकापि सा काव्यरीतिभेदेऽपि कथ्यते ।
अत्र बाहुलकादस्ति शालशब्दोऽपि साधितः ॥ ५२० ॥

पुंलिङ्गः स्यादयं मत्स्यप्रभेदे सर्जपादपे ।
शालागृहे तरुस्कन्धे शाखागौरैकदेशयोः ॥ ५२१ ॥

न्यासकारस्तु शलतेश्चलनार्थात्कृते घञि ।
निपातनात्सुँराच्छायाशालेति स्त्रीत्वमभ्यधात् ॥ ५२२ ॥

शल्भ कत्थन इत्याह बोपदेवैस्तु धातुवित् ।
अँकर्तरि च सूत्रेण घञस्माद्वा विधीयताम् ॥ ५२३ ॥

शाडेरट्टादिषट्त्रिंशत्पठिताच्छलाघनार्थकात् ।
स्मरता लडयोरैक्यं मैत्रेयेणायमीरितः ॥ ५२४ ॥

शालाप्रवेशानार्हत्वे शालिको धृष्ट उच्यते ।
एतदन्तस्तत्पुँरुषो यस्त्वनञ्कर्मधारयः ॥ ५२५ ॥

असौ विभाँषा सेनेति वा नपुंसकतां भजेत् ।
गोशालमपि गोशाला तदुदाहरणं यतः ॥ ५२६ ॥

एवं सेनासुँराच्छायास्थलेऽप्यूह्यमितो बुधैः ।
गोशालखरशालाभ्यां जातार्थप्रत्ययस्य लुक् ॥ ५२७ ॥

गोशालः खरशालश्च तँत्र जातस्ततः स्मृतः ।
स्थानैँान्तगोशालखरशालाश्चेति हि सूत्रितम् ॥ ५२८ ॥

ह्रस्वपाठेऽपि सूत्रेऽत्र स्याच्च लिङ्गविशिष्टतः ।

१. Pā. II-iv-25.
२. Kavikalpadruma p. 170.
३. Pā. III-iii-19.
४. Pā. II-iv-19.
५. Pā. II-iv-25.
६. Pā. IV-iii-25.
७. Pā. IV-iii-35.

वत्सशालाभिजित्सूत्रे विकल्पेन लुगीरणात् ॥ ५२९ ॥

वत्सशालाद्वत्सशालो वात्सशाल इति द्विधा ।
स्त्रीनपुंसकयोरत्राप्युन्नेयं लुग्विकल्पनम् ॥ ५३० ॥

यदा ठगायस्थानेभ्यो विहितस्तत आगते ।
आगतः शुल्कशालायाः स्यात्तदा शौल्कशालिकः॥५३१

पतेरङ्गच्पक्षिणि॥ १-११२ ॥

पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः ।
बिडाले च भवेत्पुंसि पारदे तु नपुंसकम् ॥ ५३२ ॥

पतेरङ्गच्पक्षिणीति सूत्रकारेण यद्यपि ।
अर्थोऽप्युक्तस्तथाप्यर्थान्तरे बाहुलकादयम् ॥ ५३३ ॥

तरत्यादिभ्यश्च ॥ १-११३ ॥

तरङ्गस्तुरगादीनामुत्फाले वल्लभङ्गयोः ।
एवंविधस्तरत्यादिष्वन्येऽप्यूह्या विचक्षणैः ॥ ५३४ ॥

बिडादिभ्यः कित् ॥ १-११४ ॥

विडङ्गः क्रिमिसङ्घेन्ने नागराभिज्ञयोस्त्रिषु ।
मृदङ्गः पटहे घोषे कुरङ्गो हरिणे स्मृतः ॥ ५३५ ॥

कृञो बाहुलकादुत्वे कुरोतेर्वा यथाश्रुतात् ।
कुरङ्गः साधितः प्रायः कौ भूमौ रङ्गतीति वा ॥५३६॥

अन्यत्रापि बिडादिभ्यः किदित्युक्त्या विचिन्त्यताम् ।
सारङ्गश्चातके भृङ्गे कुरङ्गेऽपि मतङ्गजे ॥ ५३७ ॥

उक्तोऽयं वर्णभेदेऽपि वाच्यलिङ्गो विचक्षणैः ।
शैकन्ध्वादिषु पाठेनाप्येष्वर्थेष्वेष विश्रुतः ॥ ५३८ ॥

सृवृञोर्वृद्धिश्च ॥ १-११५ ॥

सैवर्णदीर्घेणान्यत्र साराङ्ग इति तद्धितः ।
वारङ्ग इति खङ्गादिमुष्टौ पुंसि प्रकीर्तितः ॥ ५३९॥

अत्र बाहुलकादस्ति नारङ्गः पिप्पलीरसे ।

१. Pā. IV-iii-36.
२. Pā. IV-iii-75.
३. Vā. VI-i-93.
४. Pā. VI-i-101.

यमजे प्राणिनि विटे नागरङ्गद्रुमेऽपि च ॥ ५४० ॥

गन्गम्यदोः॥ १-११६॥

गङ्गा स्त्री द्युसरित्यस्माच्छिवशुभ्रतिकादिगात् ।
अपत्ये गाङ्गगाङ्गेयगाङ्गायनय ईरिताः ॥ ५४१ ॥

कशेरुस्वर्णमुस्तेषु गाङ्गेयमिति कथ्यते ।
भवेदङ्गः पुरोडाशे शाखायामप्यसौ पुमान् ॥ ५४२ ॥

अङ्गं गात्र उपाये च प्रतीके चाप्रधानके ।
अङ्गो देशविशेषे स्यात् अङ्ग संबोधनेऽव्ययम् ॥५४३॥

अङ्गजो रुधिरेऽनङ्गे केशिपुत्रे मदेऽपि च ।
आङ्गविद्यस्त्वङ्गविद्यामधीते वेद वेत्यणि ॥ ५४४ ॥

विद्यान्तादङ्गधर्मत्रिक्षत्रपूर्वान्न ठग्यतः ।
विद्यालक्षणकल्पान्ताच्चेति वार्तिकदर्शितात् ॥ ५४५ ॥

आङ्गको वुञ्यणो बाधादवृद्धादपि बह्वृति ।

छापूखडिभ्यः कित्
॥ १-११७॥

छागो भवेदजे पुंसि पूगस्तु क्रमुके गणे ॥ ५४६ ॥
त्रिषु स्यात्पूरणे पूगतिथोढट्तिथुकोस्सतोः ।
खङ्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके ॥ ५४७ ॥

षिङ्गो बाहुलकादत्रानादरार्थषिटेर्विटे ।
धात्वादेष्षः स इति च सत्वं नोक्तेन हेतुना ॥ ५४८ ॥

भृञ्जः कित् नुष्ट् च
॥ १-११८ ॥

भृङ्गशब्दस्तु पुंलिङ्गो भवेद्भृम्याटषिङ्गयोः ।
मधुव्रते भृङ्गराजे भृङ्गं क्लीबे गुडत्वचि ॥ ५४९ ॥

शृणातेर्ह्रस्वश्च
॥ १-११९ ॥

शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके ।
विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके ॥ ५५० ॥

स्त्री विषायां स्वर्णमीनभेदयोर्ऋषभौषधौ ।

१. Pā. IV-ii-59.
२. Vā. IV-ii-60.
३. Vā. IV-ii-60.
४. Pā. IV-ii-125.
५. Pā. VI-i-64.

मत्वर्थीय इनौ शृङ्गी विषारामद्रुमादिषु ॥ ५५१ ॥
शृङ्गयुक्ते शृङ्गिणोऽपि ज्योत्स्नादिषु निपातनात् ।
शृङ्गारकस्तथा शृङ्गबृन्दाभ्यामारकन्विधेः ॥ ५५२ ॥

गण् शकुनौ ॥ १-१२० ॥ शार्ङ्गशब्दः पक्षिभेदे मुनिपुत्रे च कथ्यते ।
शृङ्गशब्दाद्विकाराणि प्राहुश्चापे त्विमं बुधाः ॥ ५५३ ॥

मुदिग्रोर्गग्गौ ॥ १-१२१ ॥ मुद्गो धान्यविशेषे स्यान्मौद्गो मौद्गादणित्यणि ।
अन्नादौ मुद्गसंसृष्टेमौद्गीनं तु भवेत् खञि ॥ ५५४ ॥
मुद्गानां भवने क्षेत्रे गर्गः स्यात्तापसान्तरे ।
गर्गादियञि गार्ग्यः स्यात् गोत्रे बहुषु तस्य लुक् ॥
गर्गाद्यञि स्त्रियां नैवं स्त्रियो गार्ग्य इतीह दिक् ।
श्लाघादाविह भावेन कर्मण्यपि कृते वुञि ॥ ५५६ ॥
श्लाघतेऽसौ गार्गिकयेत्यादि साधु समर्थ्यते ।
यून्यपत्ये गार्ग्यशब्दाद्यञिञोश्चेति फग्भवेत् ॥ ५५७ ॥
गार्ग्यायणस्तथा स्त्रीत्वे युवता नेति नैव फक् ।
प्राग्दीव्यतीयेऽजादौ वा फक्फिञोर्यूनि लुग्विधेः ॥५५८॥
गार्ग्यायणीया गार्गीयाश्चेत्यादिद्वैधमुच्यते ।
यञश्चेति स्त्रियां ङीपि गार्गी प्राचां ष्फतद्धिते ॥५५९॥
गार्ग्यायणी यलोपस्तु नात्रानातीति[नायनेयीति]दर्शनात् ।
गोत्रस्त्रियाः कुत्सने ण चेत्यत्र णठकोर्विधेः ॥ ५६० ॥
गार्गो वा गार्गिको वा स्यादन्यत्राप्येवमेव दिक् ।

१. Vā. V-ii-121.
२. Pā. IV-iv-25.
३. Pā. IV-i-101.
४. Pā. IV-i-91.
५. Pā. IV-i-16.
६. Pā. IV-i-17.
७. Pā. VII-i-2.
८. Pā. IV-i-147.

सैद्धान्तकौमुदीलक्षणेष्वज्यञिञामणिति शासनात् ॥ ५६१ ॥

घोषस्य[1] वार्तिकोक्तेश्च गार्ग एष्वभिधेयवत् ।
गोत्रादङ्कवदित्युक्तेः स्यादयं तत आगते ॥ ५६२ ॥

अण्डन् कसुम्भकुणम्भवृभ्रः ॥ १-१२२ ॥

करण्डः साङ्कवमदाद्युपधानार्थभाजने ।
सरण्डः सरटे धूर्ते विहङ्गे भूषणान्तरे ॥ ५६३ ॥

भरण्डशब्दः पुंस्येषः पोषके परिकीर्त्यते ।
वरण्डोऽप्यन्तरावेद्यां सन्दोहमुखरोगयोः ॥ ५६४ ॥

अत्र बाहुलकादण्डन्प्रत्ययस्तरतेरसौ ।
तरण्डो बडिशे सूत्रबद्धकाष्ठादिके प्लवे ॥ ५६५ ॥

शृदृभसोऽदिः॥१-१२३॥

ऋतुभेदे वत्सरे च स्त्रीलिङ्गः शरदुच्यते ।
अतः श्राद्धे[2] शरद इत्यृत्वणो बाधके ठञि ॥ ५६६ ॥

श्राद्धं शारदिकं रोगौतपयोरत्र वा सति ।
भवेच्छारदिको रोगः शारदो वा तथातपः ॥ ५६७ ॥

अन्यत्र त्वृत्वणा जाताद्यर्थेषु सति शारदः ।
शारदी देवता सास्य कालेभ्यो भवद्विधेः[3] ॥ ५६८ ॥

कार्यं वा दीयते वा यच्छरद्येतच्च शारदम् ।
प्राग्वतीयेषु कालादीत्युक्त्या भववदीरणात् ॥ ५६९ ॥

एवमन्यत्र कालेभ्य ऊह्यन्तां प्रत्यया बुधैः ।
दर्भमुद्गविशेषास्तु संज्ञायां शरदो वुञि ॥ ५७० ॥

उक्ताः शारदकास्तत्र जौत[4] इत्यर्थदर्शिताः ।
स्युरस्मादव्ययीभावे टचोपशरदादयः ॥ ५७१ ॥

१. Pā. IV-iii-127.
२. Vā. IV-iii-127.
३. Pā. IV-iii-80.
४. Pā. IV-i-12.
५. Pā. IV-iii-13.
६. Pā. IV-ii-34.
७. Pā IV-iii-25.

दरस्त्रियां प्रपाते च भयाद्रितिमिरेषु च ।
कूले च हृदये चाथ दरदेशेऽपि कथ्यते ॥ ५७२ ॥

[भैसत्त्वौ भास्वरे योनौ] भसज्जघनगुह्ययोः ।
पृषेर्बाहुलकादस्मिन् पर्षत्परिषदि स्त्रियाम् ॥ ५७३ ॥

रैजः कृषीति मत्त्वर्थे वले पर्षद्वलस्त्रिषु ।
तत्र सूत्रे परिषदः पाठे तु परिषद्वलः ॥ ५७४ ॥

दृणातेः षुक् ह्रस्वश्च ॥ १-१२४ ॥

दृषन्निष्पेषणशिलापट्टप्रस्तरयोः स्त्रियाम् ।

त्यजितनियजिभ्यो डित् ॥ १-१२५ ॥

त्यत्तद्यदस्त्रयः सर्वादिगणे पठिता अमी ॥ ५७५ ॥

तत्राद्यौ तु परोक्षार्थौ तृतीयस्तन्निरूपकः ।
आद्यस्य लोके न क्वापि प्रयोगः परिदृश्यते ॥ ५७६ ॥

वेदे त्वेषस्य वाजीति प्रभृतिष्वथ गम्यते ।
स्यश्छन्दसीति[1] सूत्रस्थच्छन्दोग्रहणलिङ्गतः[2] ॥ ५७७ ॥

लोकेऽप्यस्य प्रयोगोऽस्तीत्येतदभ्युपगम्यते ।
त्यदाद्यत्त्वादिकं कार्यं यथायोग्यं विचिन्त्यताम् ॥५७८॥

यत्तदित्यव्ययत्वे तु हेत्वर्थकमिदं द्वयम् ।
य इत्यनिर्धारितेऽर्थे स इत्यर्थे विनिश्चिते ॥ ५७९ ॥

सर्वत्र चैतावुद्देश्यविधेयैकत्वकल्पकौ ।
स्यातामपि च पर्यायात्तत्तल्लिङ्गानुभाविनौ ॥ ५८० ॥

सर्वभावे स[स्वस्वभावेन] चान्योन्यप्रयोगाकाङ्क्षिणावुभौ[3] ।
न प्रक्रान्तप्रसिद्धानुभूतार्थविषयः श्रुतः ॥ ५८१ ॥

तच्छब्दः क्वापि यच्छब्दोपादानं समपेक्षते ।
यच्छब्द उत्तरे वाक्ये स्थितस्तच्छब्दनिःस्पृहः ॥५८२॥

१. The first pāda is not found in either of mss; the second pāda alone is found in B.

२. Pā. V-ii-112.

३. Pā. VI-i-133.

प्रागुपात्तस्तु यच्छब्दस्तच्छब्दं न विमुञ्चति ।
प्रसिद्धमाह तच्छब्दो यच्छब्दनिकटे स्थितः ॥५८३॥

लिखितं यद्यदित्युक्त्यां तच्छब्दः सकृदीरितः ।
पारमृशति सामर्थ्याद्वीप्सां तत्रापि चेद्द्विता ॥ ५८४ ॥

त्यतस्त्यत्रततस्ततत्रयतोयत्रतसिल्त्रपोः ।
तदा यदेति सप्तम्याः कालार्थे तद्यदोर्भवेत् ॥ ५८५ ॥

तैदो दा चेति चाद्दानीं चेत्तदानीं तदार्थकम् ।
तद्यदोर्वा तर्हि यर्हि कालेऽनैद्यतनेर्हिला ॥ ५८६ ॥

पक्षे यदातदा स्यातां त्यदादित्रितयात्पुनः ।
प्रैकारवचने थालि स्युस्त्यथा च तथा यथा ॥ ५८७ ॥

यथा कथा च यत्कार्यं दीयतेऽनादरेण यत् ।
यँथा कथा चेति सङ्ख्यादव्ययानां णशासनात् ॥५८८॥

इत्येवं प्राग्दिशीयानां प्रकार इह दर्शितः ।
तैद्धितश्चासर्वसूत्रादेतेष्वव्ययता स्फुटा ॥ ५८९ ॥

तावान् यावानिति स्यातां तद्यदोरुभयोः क्रमात् ।
पैरिमाणे वतुब्यत्तदेतेभ्यो विहितो यतः ॥ ५९० ॥

साकल्यादर्थकं यावत् यावच्छादिष्वपि द्वयम् ।
यावती प्रकृतौ वेदिर्द्विस्तावा द्विगुणा ततः ॥ ५९१ ॥

प्रकीर्त्यतेऽश्वमेधादौ त्रिस्तावात्त्रिगुणा यदि ।
णमुल्यैावतिविन्देश्च जीवेरपि विधीयते ॥ ५९२ ॥

यावद्वेदं तथा यावज्जीवमित्यभिधीयते ।
द्वयसञ्मात्रचौ स्वार्थे वत्वन्ताद्विहितौ यदि ॥ ५९३ ॥

१. Pā. V-iii-19.
२. Pā. V-iii-21.
३. Pā. V-iii-33.
४. Pā. V-i-98.
५. Pā. I-i-38.
६. Pā. V-ii-39.

स्यात्तावद्वयसं तावन्मात्रमित्यादिरत्र दिक् ।
डकि[डटः] थुगागमे तावतिथ इत्यादि पूरणे ॥ ५९४ ॥

आर्हीयार्थे वैतोरिड्वा विहितः परतः कनि ।
स्युस्तावतिकतावत्कादयस्तेन प्रयोजिताः ॥ ५९५ ॥

निर्धारणे द्विविषये ततरो यतरोऽपि च ।
ततमो यतमो जातिप्रश्नेऽस्मिन् बहुगोचरे ॥ ५९६ ॥

पतेस्तुट् च ॥ १-१२४ ॥ एतदित्यपि सर्वादिः समीपतरवर्तिनि ।
अत्वसत्वादिकं सर्वं त्यदादित्वेन पूर्ववत् ॥ ५९७ ॥

एतदोऽनित्यन्विधानादतोऽत्रेति तसिल्त्रलोः ।
एतर्हिकाल एतस्मिन्नित्यनद्यतनेर्हिला ॥ ५९८ ॥

इत्थमित्येतदो वाक्यात्प्रकारवच थमौ [वचने थमुः] ।
प्राग्दिशीया इमे प्राग्वद्वतुप्रत्ययसंसृतिः ॥ ५९९ ॥

आत्वं तु दृग्दृशवतुष्विति तत्र विचिन्त्यताम् ॥

सर्तेरटः ॥ १-१२५ ॥ सरट् स्याद्धन्धवाहेऽपि सरघायां बलाहके ॥ ६०० ॥

लङ्घेर्नलोपश्च ॥ १-१२६ ॥ अप्सरस्सु च वायौ च लघड्धीरैर्निगद्यते ॥

पारयतेरजः ॥ १-१२७ ॥ पारक् छले सुवर्णे च रक्तवर्णे च सर्पिषि ॥ ६०१ ॥

प्रथेः कित्संप्रसारणं च ॥ १-१२८ ॥ पृथग्विनार्थः पाठेन स्वरादिष्वव्ययं स्मृतम् ॥

भियः षुग्घ्रस्वश्च ॥ १-१२९ ॥ भिषग्वैद्ये शैषिकेऽणि भेषजं स्मृतमौषधम् ॥ ६०२ ॥

एत्वं पृषोदरादित्वाद्धात्परस्यावगम्यताम् ।
अनन्तावसथेति ञ्ये स्वार्थे भैषज्यमप्यतः ॥ ६०३ ॥

भभेदे स्त्री शतभिषक् तत्र जाते तु शैषिके ।
अणि वा तस्य डिद्भावे वत्सशालेति वा लुकि ॥ ६०४ ॥

१. Pā. V-i-23.
२. Pā. V-iii-5. For a different reading of this Sūtra see the Kāśikā.
३. Pā. V-iv-23.
४. Pā. IV-iii-36.

स्याच्छातभिषजश्शातभिषश्शतभिषक् त्रिषु ॥

युष्यसिभ्यां मदिक् ॥ १-१३० ॥

प्रकीर्तितौ युष्मदस्मदित्येतौ सर्वनामसु ॥ ६०५ ॥

सौत्रो युषिरसौ[रसिः] दैवादिको भौवादिकोऽपि वा ।
संबोध्ये प्रथमः स्वात्मनिर्देशेऽन्यः प्रयुज्यते ॥ ६०६ ॥

त्वाहादिकार्यजातं तु सौपत्वान्नात्र चिन्त्यते ।
युष्मदीयास्मदीयौ छे शैषिके द्विबहुत्वयोः ॥ ६०७ ॥

एकत्वे तु त्वदीयश्च मदीयश्च प्रकीर्तितौ ।
यौष्माकीणो द्विबहोः खञ्यास्माकीनश्च कथ्यते ॥

अणप्रत्यये तु यौष्माकास्माकौ तत्र प्रदर्शितौ ।
खञ्येकत्वे तावकीनमामकीनौ क्रमादिह ॥ ६०९ ॥

अणन्तत्वे तु निर्दिष्टौ तत्र तावकमामकौ ।
स्त्रीत्वे तु मामिका छन्दस्येव ङीब्नियमश्रुतेः ॥ ६१० ॥

इत्वं त्वत्रोपसंख्यानात्तावकीति तु ङीप् भवेत् ।
अद्र्यादिभ्य इति प्राग्दिशीये तत्पर्युदासतः ॥ ६११ ॥

अपादाने चेति कनौ[तसौ] त्वत्तो मत्तस्तसिल् तु न ।
त्वत्का मत्का इति तु कन् स[3]एषां ग्रामणीरिति ॥ ६१२ ॥

अर्तिस्तुसुहुसृधृक्षिक्षु-भ्यावापदियक्षिनीभ्यो मन् ॥ १-१३१ ॥

चतुर्दश धातवः ॥

अर्मश्चाक्षुषरोगे स्यात् स्तोमः सामकुले गणे ॥ ६१३ ॥

सोमः कुबेरे पितृदेवतायां वसुप्रभेदे च निशाकरे च ।
दिव्यौषधिश्यामलताशरीरकर्पूरनीरानलवानरेषु ॥ ६१४ ॥

सोमोऽस्य देवतेत्यर्थे सौम्यं सोमाट्ट्यणि त्रिषु ।
पत्यन्तादिति वक्तव्ये पत्युत्तरपदादिति ॥ ६१५ ॥

१. Vā. V-iv-44.
२. Pā. V-iv-45.
३. Pā. V-ii-78.
४. Pā. IV-ii-30.
५. Pā. IV-i-85.

दित्यैदित्यादिसूत्रे यदुक्तं तदधिकाशये ।
तेन प्राग्दीव्यतीयेषु सौम्यः सर्वत्र दृश्यते ॥ ६१६ ॥

सौम्यो बुधे मनोज्ञे स्यादब्दे विप्रे स्त्रियां त्वसौ ।
इल्वलासु भवेन्नीचे संबोध्येऽपि च वाच्यवत् ॥६१७॥

स बहुच्कस्य मा ण्योभूत्पत्यन्तैस्येति सूत्रकृत् ।
तत्र पत्युत्तरपदादित्यवोचदिति स्थितिः ॥ ६१८ ॥

अतोऽगित्यन्तरेणैव सौम्यः साध्यो बुधादिषु ।
बहुव्रीहौ सोमजम्भासमासान्तेऽनिचि स्मृतः ॥ ६१९ ॥

हविःप्रक्षेपयोर्वक्ता होमः सर्मस्तु सर्पणे ।
धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ॥ ६२० ॥

उपमायामहिंसायां चापे चोपनिषद्यपि ।
धर्म्योऽस्मादनपेते स्यात्प्राप्ये चानेन वाच्यवत् ॥६२१॥

धार्मिकस्तु चरत्येनं भवेदाधर्मिकस्तु तम् ।
बहुव्रीहिसमासे तु धर्मादनिचि केवलात् ॥ ६२२ ॥

मनुष्यधर्मा कल्याणधर्मेत्यादिः प्रसिध्यति ।
सुधर्मा देवगोष्ठ्यां स्त्री टाबन्तोऽप्येष दृश्यते ॥ ६२३ ॥

धार्मविद्यो धर्मविद्यामधीते वेद वेत्यणि ।
क्षेमं स्यान्मङ्गले लब्धरक्षणे चोरकेऽपि च ॥ ६२४ ॥

क्षेमा धनहरीगौर्योः क्षेमः ख्यातः क्रमान्विते ।
अस्मिन्नुपपदे क्षेमप्रियमद्रेऽण्च खच्यणि ॥ ६२५ ॥

क्षेमंकरः क्षेमकार इति द्वेधा कृञो भवेत् ।
क्षोम एव क्षौम इति प्रज्ञाद्यणि भवेदयम् ॥ ६२६ ॥

१. Pā. IV-i-85.
२. Pā. V-iv-124.
३. Pā. IV-ii-59.
४. Pā. III-ii-44.

वल्कलाट्टदुकूलेषु पुंसि क्लीबे च विश्रुतः ।
भामः क्रोधे रवौ दीप्तौ भामा योषित्यपि स्त्रियाम् ॥६२७॥

यामस्तु पुंसि प्रहरे संयमेऽपि च कथ्यते ।
वामं धने पुंसि हरे कामदेवे पयोधरे ॥ ६२८ ॥

वल्गुप्रतीपभव्येषु त्रिषु नार्यां स्त्रियामथ ।
वामी सृगालीबडबारासभीकरभीषु च ॥ ६२९ ॥

वामरथ्यो वामरथात्कुर्वादिण्यविधानतः ।
अस्य कण्वादिवद्भावः स्वरवर्जं यतः स्मृतः ॥ ६३० ॥

कण्वादिभ्यो गोत्र इत्यण् शेषे वामरथास्ततः ।
तथा बहुत्वे ण्यलुका प्रोक्ता वामरथा इति ॥ ६३१ ॥

सैन्धवाङ्कलक्षणेष्वेवमणि वामरथो भवेत् ।
वामदेवो मुनेर्भेदे तेन दृष्टे तु सामनि ॥ ६३२ ॥

वामदेव्यं वामदेवाड्ड्यड्ड्यावित्यनयोर्विधेः ।
पद्मः स्यात्पन्नगे व्यूहे निधौ संख्यान्तरेऽम्बुजे ॥६३३॥

पद्मकं बिन्दुजालेऽपि पद्मा भार्गीश्रियोरपि ।
अन्तस्थादिः पुमान् यक्ष्मः क्षयरोगस्य वाचकः ॥६३४॥

धातोर्हि यक्षपूजायामित्यतोऽयमिति स्थितिः ।
चुतृतीयादिकाद्भक्षहननार्थपदादिकात् ॥ ६३५ ॥

साधयन्तो लोकवेदविरोधादिह नादृताः ।
कृते मनिन्प्रत्यये तु नान्तोऽप्येष विभाव्यते ॥ ६३६ ॥

राजयक्ष्मेव रोगाणामिति माघोक्तिदर्शनात् ।
पठित्वा दशपाद्यां तु पवर्गीयादमादिकम् ॥ ६३७ ॥

१. Pā. IV-i-151.
२. Pā. IV-ii-111.
३. Pā. IV-iii-127.
४. Pā. IV-ii-9.

उदाहार्यक्षिपक्ष्मेति गतार्थं मनिनैव तत् ।
नेमर्थे[नेमोऽर्धे] च वधौ गर्ते प्राकारे कैतवेऽपि च॥६३८॥

गणपाठेऽपि सत्यस्य जसि वा सर्वनामता ।
ज्ञेयाः सुधीभिः प्रथमचरमेत्यादिसूत्रतः[1] ॥ ६३९ ॥

जहातेः सम्वदालोपश्च ॥ १-१३२ ॥

जिह्मस्तु कुटिले मन्दे क्लीबे तगरपादपे ।
जिह्ममश्नाति जिह्माशी शुभ्रादिगणदर्शितः[2] ॥ ६४० ॥

जैह्माशिनेयोऽढक्यस्माद्[3]ण्डिनायनसूत्रतः ।
निपातनाट्टिलोपोऽत्र नेति ज्ञेयो विचक्षणैः ॥ ६४१ ॥

अवतेष्टिलोपश्च ॥ १-१३३ ॥

उपस्थिते मन्यवतेष्टिलोपश्चेति शासनात् ।
ओमित्यदोऽवतीत्यर्थे प्रत्ययस्य टिलोपतः ॥ ६४२ ॥

[4]ऊवरत्वरेति प्रकृतेरूठो दीर्घे ततो गुणे ।
रक्षकं सिद्धरूपत्वात्सत्वमर्थोऽस्य खल्वभूत् ॥ ६४३ ॥

अतोऽव्ययत्वं पाठेन स्वरादिषु न चादिषु ।
रक्षकं च परं ब्रह्म योगिध्येयं प्रचक्षते ॥ ६४४ ॥

स्वजापि[स्वज्ञाप्य]रक्षणात्स्वाख्या स्याद्वेयं शब्दशब्दवत् ।
उमया सहितः सोम इति निर्वर्त्य केचन ॥ ६४५ ॥

[5]पूषोदरादिष्वन्तादिलोपेनैवमिदं जगुः ।
अकारोकारयोस्सन्धौ मकारेऽपि शिरःस्थिते ॥ ६४६ ॥

ब्रह्मविष्णुमहेशाख्यां वदन्त्येतदिहापरे ।
अमी शब्दास्त्रयो यस्य वाचकास्त्र्यम्बको हि सः ॥६४७॥

अम्बेः शब्दार्थकादम्बशब्दः शब्दार्थको[6] यतः ।
एवं यद्यप्यनेके स्युरर्थाः प्रणवगोचराः ॥ ६४८ ॥

१. Pā. I-i-33.
२. Pā. IV-i-123.
३. Pā. VI-iv-174.
४. Pā. VI-iv-20.
५. Pā. VI-iii-109.
६. **गोचरः** is another reading found in the original.

तथाप्युपनिषत्सर्वा व्यक्षरीमवलम्बते ।
प्रश्नेऽप्यङ्गीकृतौ रोषेऽप्योम् वेदाद्यन्तयोरपि ॥६४९॥

ग्रसतेरा च ॥ १-१३४ ॥

ग्रामः स्वरे संवसथे बृन्दे शब्दादिपूर्वकः ।
संपूर्वः संयुगे प्रोक्तश्चुरादिष्वेव दर्शितः ।
ग्रामता तु स्त्रियां ग्रामबृन्दे विद्वद्भिरुच्यते ॥ ६५० ॥

शेषाधिकारविहिते ये खञिढकञिक्रमाद्विबुधैः ।
ग्राम्यश्च ग्रामीणो ग्रामेयक इत्यमी त्रयः कथिताः॥६५१॥

ग्राम्यधर्मस्तु विबुधैः स्मृतो निधुवनार्थकः ।
अव्ययीभावतो ग्रामाट्टञि पर्यनुपूर्वतः ॥ ६५२ ॥

स्यात्पारिग्रामिकश्चानुग्रामिकश्च भवार्थके ।
णत्वे स्याद्ग्रामणीरग्रग्रामाभ्यां नयतेरिति ॥ ६५३ ॥

नापिते पुंस्ययं श्रेष्ठे ग्रामाधीशेऽपि च त्रिषु ।
दाक्षिग्रामीयमिति तु छे कन्थापलदौदिना ॥ ६५४ ॥

अपवादष्ठञ्ञिठादेर्वृद्धाच्छो ह्यत्र संभवेत् ॥

अविसिविसिशुषिभ्यः कित् ॥ १-१३५ ॥

ऊमं खे नगरे क्लीबं स्यूमस्तु किरणे पुमान् ॥ ६५५ ॥

सिमः सर्वादिपठितस्त्रिलिङ्गः सर्ववाचकः ।
शुष्मस्तेजोऽर्कयोरग्नौ शुष्मं क्षीरे बलेऽपि च ॥ ६५६ ॥

इषियुधीन्धिदसिश्याधूसूभ्यो मक् ॥१-१३६॥

ईषीति पाठान्तरम् ॥

इष्मः कामे वसन्ते स्यादीष्मो वा पाठभेदतः ।
ह्रस्वादेरपि दीर्घादेर्धातोर्द्वेधापि संभवात् ॥ ६५७ ॥

युध्मो योद्धरि बाणे च संयुगे कार्मुकेऽपि च ।
इध्मः पुंसि प्रकथितः काष्ठे काले च सूरिभिः ॥६५८॥

१. Vā. III-ii-61. २. Pā. IV-ii-142.

[1][केचित्पुंसि वदन्त्येनं] काले काष्ठे तु न द्वयोः ।
दस्मस्तु यजमाने स्याच्चोरे हीने हुताशने ॥ ६५९ ॥

श्यामः स्यान्मेचके वृद्धदारके हरिते घने ।
वटद्रुमे प्रयागस्य श्यामा स्त्री वागुरा स्मृता ॥ ६६० ॥

अप्रसूताङ्गनायां च तथा सोमलतौषधौ ।
त्रिवृताशारिबागुन्द्रानिशाकृष्णाप्रियङ्गुषु ॥ ६६१ ॥

नील्यां चाथ पिके पुंसि मरीचे लवणान्तरे ।
उक्तो दमनके गन्धे त्वचि श्यामोऽभिधेयवत् ॥ ६६२ ॥

अग्निकेतौ देशभेदे धूमः पुंसि निगद्यते ।
धूम्या तु कथिता धीरैः स्त्रियां धूमकदम्बके ॥ ६६३ ॥

धूम्याटस्तु कलिङ्गेऽथ धूमलः कृष्णलोहिते ।
सूमो रवौ चन्द्रमसि विहायसि च कथ्यते ॥ ६६४ ॥

ईमं तु न द्वयोरुक्तं तृणवाचि विचक्षणैः ।
दक्षिणेर्मामृगे लुब्धयोगतो दक्षिणव्रणे ॥ ६६५ ॥

जन्मं जनेर्मे जनुषि उभे बाहुलकादमू ।
जन्मशब्दो मनिन्नन्तः प्रचुरोऽयमपि क्वचित् ॥ ६६६ ॥

व्रीह्यादित्वादिनावस्मादपि जन्मी शरीरिणि ॥

युजिरुचितिजां कुश्च ॥ १-१३७ ॥

द्वयेनौजेन युग्मं स्याद्रुक्मं काञ्चनलोहयोः ॥ ६६७ ॥

तिग्मं तु वाच्यवत्तीक्ष्णं पुंसि वह्नौ च भास्करे ॥

हन्तेर्हि च ॥ १-१३८ ॥

हिमं स्यात्तुहिने क्लीबं चन्दने शीतले त्रिषु ॥ ६६८ ॥

हिमे महति विद्वद्भिर्हिमानी कथिता स्त्रियाम् ।
हिमात्तु यपि मत्वर्थे हिम्यो हिमवति स्मृतः ॥ ६६९ ॥

1. The pāda within brackets is not found in the ms.

हिमं न सहते यस्तु स हिमेलुः प्रकीर्तितः ।
हिमे पादस्य पद्भावे [1]हिमकाषीतिवद्भिमम् ॥ ६७० ॥

भियः षुग्वा ॥१-१३९॥ भीमोऽम्लवेतसे शंभौ घोरे चापि वृकोदरे ।
भीष्मस्तु भीषणे रुद्रे गाङ्गेये च निशाकरे ॥ ६७१ ॥

घर्मः ॥ १-१४० ॥ घर्मः स्यादातपे ग्रीष्मेऽप्यूष्मस्वेदाम्भसोरपि ॥

ग्रीष्मः ॥ १-१४१ ॥ ग्रीष्मः स्यादूष्मणि पुमान्वसन्तानन्तरेऽप्यृतौ ॥ ६७२ ॥

अर्थे प्राग्दीव्यतीयेऽस्माद्ग्रीष्मेऽछन्दस्यञि त्रिषु ।
ऋत्वण्वुञोस्सतोरुसे ग्रैष्मश्च ग्रैष्मकस्तथा ।
स्याद्ग्रैष्मकमृणं ग्रीष्मे देयं वुञ्प्रत्यये सति ॥ ६७३ ॥

प्रथेः षिवन् संप्रसारणं च ॥ १-१४२ ॥ षवन्नित्येके ॥
षिवन्षवन्पाठभेदात्पृथिवी पृथवी क्षितौ ।
पृथिव्याः पार्थिवो ञोरर्थे प्राग्दीव्यतीयके ॥ ६७४ ॥

स्त्रियां ञे पार्थिवाः स्याद्ञ्प्रत्यये पार्थिवीति ङीप् ।
अपत्येऽर्थे शार्ङ्गरवाद्यञो ङीनिति जातिङीन् ॥ ६७५ ॥

अञ्प्रत्यये पार्थिव इह सूत्रात्सर्वभूमिपृथ्वीति ।
संयोगोत्पातात्मनि भवति पृथिव्या निमित्तभूतेऽर्थे॥६७६॥

पृथिव्या ईश्वरेऽप्येवं पृथिव्यां विदितेऽपि च ।
दिवसश्च पृथिव्यामित्युक्तेरत्र प्रकीर्तिते ॥ ६७७ ॥

दिवस्पृथिव्यौ तु द्यावापृथिव्यावपि रोदसोः ।
दिवसश्चेत्यकारेण सकारपरिरक्षणात् ॥
दिवस्पृथिव्यावित्यत्र रुप्रवृत्तिर्न कल्पते ॥ ६७८ ॥

१. Pā. VI-iii-54.
२. Pā. IV-i-73.
३. Pā. V-i-41.
४. Pā. VI-iii-30.

मिलिते तु देवतैका यस्य द्यावापृथिव्यौ तत् ।
स्याद्द्यावापृथिवीयं छयतोर्द्यावापृथिव्यं च ॥ ६७९ ॥

भश्नुप्रुषिलटिकणिखटि-विशिभ्यः कन् ॥ १-१४३ ॥

केचित् प्युषीत्युकारवन्तं[१]द्वितीयधातुं पठन्ति ॥
हयपुंभेदयोरश्वः स्त्र्यश्वाजौदिषु टाब्विधेः ।
भवेदाश्वायनो गोत्रापत्येऽर्थे फञ्विधानतः ॥ ६८० ॥

बृन्दे त्वश्वीयमाश्वं च च्छाणोः स्यातां क्रमादिह ।
असंख्यापरिमाणाश्वादेर्द्वयचो यद्विधानतः ॥ ६८१ ॥

संयोगोत्पातयोः स्याट्टक्यश्विकोऽश्वनिमित्तयोः ।
अश्विकोऽश्वेन चरति पर्पादिभ्यश्च ठन्विधेः ॥ ६८२ ॥

आश्वीन इति खञ्यश्वस्यैकाहगमवर्त्मनि ।
तनुत्वेऽश्वतरो वैत्सोक्षाश्वेति ष्टरचि स्मृतः ॥ ६८३ ॥

कृशाश्वो नटसूत्रस्य प्रवक्तरि महामुनौ ।
कृशाश्विन इह प्रोक्ते तत्प्रोक्ताध्यायि तद्विदः ॥ ६८४ ॥

कार्शाश्वीयो वुञ्छणादिछणि स्याच्चातुरर्थिके ।
स्थाधातोरश्वपूर्वात्तु सुपि स्थ इति के सति ॥ ६८५ ॥

तत्त्वे पृषोदरादित्वात्सकारस्य च साधिते ।
अश्वत्थो गर्दभाण्डे स्यात् पिप्पले पूर्णमातिथौ ॥६८६॥

लुबणोऽश्वत्थयुक्तायां पौर्णमास्यामिहाश्रितः ।
निपातनादाम्रहायण्यश्वत्थाट्ठगिति स्मृतौ ॥ ६८७ ॥

अतः सोऽस्मिन्पौर्णमासीत्यर्थे त्वाश्वत्थिकः स्मृतः ।
ऋणन्तु देयमश्वत्थे भवेदश्वत्थकं वुनि ॥ ६८८ ॥

१. Pā. IV-i-4.
२. Pā. IV iv-10.
३. Pā. V-iii-91.
४. Pā. III-ii-4.
५. Pā. IV-ii-22.
६. Pā. IV-ii-21.

अश्वत्थामा द्रोणसुते तत्त्वं प्राग्वदिहोच्यते ।
प्राग्दीव्यतीयेष्वर्थेषु स्थौम्नोऽकारविधानतः ॥ ६८९ ॥

अश्वत्थामो भवार्थे स्यादश्वत्थामा लुगीरणात् ।
अश्विन्यामश्वयुक् तस्यां जातेण्वाडित्तथैव लुक् ॥६९०॥

भवेयुरत्राश्वयुजोऽप्याश्वयश्चाश्वयुक्तथा ।
पौर्णमास्यश्वयुग्युक्ता बुधैराश्वयुजी स्मृता ॥ ६९१ ॥

विभाषा फाल्गुनीत्यादिसौत्रनिर्देशदर्शनात् ।
नक्षत्राणां पौर्णमास्यामविशेषेऽपि नैव लुक् ॥ ६९२ ॥

तत्रोक्तास्त्वाश्वयुजका माषाद्या वुञ्विधानतः ।
अश्वस्य रूपयोगेन संज्ञामप्यश्विनीं विदुः ॥ ६९३ ॥

स्वर्वैद्यौ तदपत्यत्वादाश्विनेयौ ढकि स्मृतौ ।
नैक्षत्रेभ्यो बहुलमित्युक्तं बहुलशब्दनात् ॥ ६९४ ॥

अन्यार्थादश्विनीशब्दात्स्याज्जातप्रत्ययस्य लुक् ।
लुक्[1] तद्धितलुकीति स्त्रीप्रत्ययस्यापि लुग्विधेः ॥ ६९५ ॥

अश्विनौ कथितौ दस्रावत्र ह्रस्वादिता स्फुटा ।
द्वन्द्वेऽश्वबडबावश्वबडबं च द्विधा·····[स्मृतम्] ॥६९६॥

अतन्त्रं हि द्विवचनमित्यश्वबडबानपि ।
ऋतौ सूर्ये च प्रुष्वः स्यादसौ जलकणेष्वपि ॥ ६९७ ॥

वाहार्थकात्पृषेरन्यः प्राह·····मतो नले ।
लट्वा करञ्जभेदे स्यात्फले वध्ये खगान्तरे ॥ ६९८ ॥

१. Vā. IV-i-85.
२. Pā. IV-ii-23.
३. Pā. IV-iii-37.
४. Pā. I-ii-49.

कण्वं पापे मुनौ पुंसि काण्व्यस्तु यञि गार्ग्यवत् ।
कैण्वादिभ्यो गोत्र इति यञन्तादणि शैषिके ॥ ६९९ ॥

काण्वः काण्व्यस्य शिष्यादावित्वं चेद्बहुलोक्तितः ।
कण्वशब्दे किण्वमपि भवेद्बीजाघशीधुषु ॥ ७०० ॥

अतः स्त्रियां भवेत् खट्वाशब्दः पर्यङ्कवाचकः ।
खट्वारूढो जाल्म इति क्षेपे तत्पुरुषः स्मृतः ॥ ७०१ ॥

विश्वा त्वतिविषायां स्त्री जगति स्यान्नपुंसकम् ।
न ना शुण्ठ्यां पुंसि देवप्रभेदेष्वखिले त्रिषु ॥ ७०२ ॥

सर्वादिगणपाठेन स्यादयं तसिलादिभाक् ।
हितं विश्वं जनेभ्यो यैत्तत्रात्मन्विश्वसूत्रतः ॥ ७०३ ॥

खः स्याद्विश्वजनाद्विश्वजनीनं कर्मधारयात् ।
अकर्मधारयाद्विश्वजनीयं छे निगद्यते ॥ ७०४ ॥

खञि प्रतिजैनादित्वात्साधुर्विश्वजनेषु यः ।
तत्र वैश्वजनीनः स्याद्विष्णौ विश्वंभरः पुमान् ॥ ७०५ ॥

विश्वंभरा तु भूमौ स्त्री संज्ञायां भृतृवृज्विधेः ।
विश्वावसुस्तु गन्धर्वे दीर्घाद्विश्वस्य वस्विति ॥ ७०६ ॥

विश्वाराडिति राड्रूपे दीर्घोऽस्य परतो भवेत् ।
विश्वराजौ विश्वराज इत्याद्यन्यत्र न त्वसौ ॥ ७०७ ॥

विश्वानरस्त्विह नरे संज्ञायामिति दीर्घतः ।
वैश्वानरो विदादित्वादञ्यस्माज्जातवेदसि ॥ ७०८ ॥

१. Pā. IV-ii-111.
२. Pā. V-i-9.
३. Pā. IV-iv-99.
४. Pā. III-ii-46.
५. Pā. VI-iii-128.
६. Pā. VI-iii-129.
७. Pā. IV-i-104.

विश्वामित्र ऋषौ मित्रे च ऋषाविति दीर्घतः ।
ऋष्यैन्धकेत्यपत्येऽस्माद्वैश्वामित्रो भवेदणि ॥ ७०९ ॥

इण्शीभ्यां वन्
॥ १-१४४ ॥

एव इत्येष शब्दस्तु गन्तरि स्यात्त्रिलिङ्गकः ।
एवेति त्वव्ययं चादिपाठाद्वस्त्ववधारणे ॥ ७१० ॥

भवेदनवकॢप्तौ च यदाहुः केव भोक्ष्यसे ।
पररूपमिहैवे चैनियोग इति शासनात् ॥ ७११ ॥

पदात्परमपादादौ स्थितयोर्युष्मदस्मदोः ।
त्वामेव मामेवेत्यादौ वांनावादेरसंभवः ॥ ७१२ ॥

नॄं च वाहाहैव युक्त इति शास्त्रस्य दर्शनात् ।
शेवं पुंसां लाञ्छने च सुखे च क्वचिदिष्यते ॥७१३॥

सर्वनिघृष्वरिष्वलष्व-
शिषपद्मप्रहेष्वा भतन्त्रे
॥ १-१४५ ॥

अष्टौ शब्दाः । अतन्त्रे अकर्तरि निपात्यन्ते । लिष्वेत्येके । अन्त्य इषु ईष्वो वा ॥

त्रिषु सर्वं भवेत्कृत्स्ने हितार्थे णछयोगतः ।
भवेत्सार्वं च सर्वीयं प्राग्दिशीयतसिल्त्रलोः ॥ ७१४ ॥

स्यात्सर्वतश्च सर्वत्र पञ्चमीसप्तमीस्थले ।
सर्वैकान्येति सप्तम्याः काले दा यदि सर्वदा ॥ ७१५ ॥

विकल्पेन सभावस्य सदेत्यपि विदुर्बुधाः ।
वहन् सर्वधुरं सर्वधुरीणः खे सति स्मृतः ॥ ७१६ ॥

हिते सर्वजनार्हुञ्त्यतष्ठञि च खे क्रमात् ।
स्यात्सार्वजनिकं सर्वजनीनमिति च द्वयम् ॥ ७१७ ॥

१. Pā. VI-iii-130.
२. Pā. IV-i-114.
३. Vā. VI-i-94.
४. Pā. VIII-i-24.
५. Pā. V-iii-15.
६. Vā. VI-iv-169.

छोऽकर्मधारयात्सर्वजनाद्विश्वजनाद्यथा ।
साधौ सार्वजनीनः खञ्वशाद्वैश्वजनीनवत् ॥ ७१८ ॥

अणि निमित्ते संयोगोत्पातरूपे तथेश्वरे ।
सार्वभौमः सर्वभूमौ विदितेऽपि च कथ्यते ॥ ७१९ ॥

सर्वलोकेति शब्देऽस्मिन् ठञि स्यात्सार्वलौकिकः ।
वृद्धिः पदद्वयेऽत्रानुशतिकादिषु पाठतः ॥ ७२० ॥

यस्तु सर्वश्चर्मणैव कृतस्तत्र ख खञ्वशात् ।
कथ्यते सर्वचर्मीणं सार्वचर्मीण इत्यपि ॥ ७२१ ॥

प्राप्नोतिवध्यक्रक्का[व्याप्नोति पथ्यक्रकर्म]पत्रपात्राणि सर्वतः ।
पराणि यदि खे सर्वपथीनाद्याः स्मृताः क्रमात् ॥ ७२२ ॥

सर्वान्नीनो भक्षयति सर्वान्नानीति कथ्यते ।
संज्ञायां भ्रितिखच्यत्र क्षितौ····[सर्व]सहोच्यते ॥७२३॥

पूर्वः सर्वयोर्दारिसहोरित्यन्यत्राव्ययं त्रिषु ।
सर्वकषः सर्वकूलेत्यादिना खचि निश्चितः ॥ ७२४ ॥

अन्तात्यन्तेति डविधेः सर्वगः परिकीर्तितः ।
सर्वत्रगश्च सर्वत्रपन्नयोरिति वार्तिकात् ॥ ७२५ ॥

सर्ववेदः सर्ववेदानधीते वेद वा यदि ।
प्रत्ययस्यात्र लुक् सर्वा····[देः सादेर्लुक] ईरणात् ॥

चतुर्वर्णादिपाठेन स्वार्थे ष्यञनुशासनात् ।
स एव सार्ववेद्योऽपि निघृष्वस्तु खुरे पुमान् ॥ ७२७ ॥

१. Pā. VII-iii-20.
२. Pā. V-ii.7.
३. Pā. III-ii-46.
४. Pā. III-ii-41.
५. Pā. III-ii-42.
६. Pā. III-ii-48.
७. Vā. III-ii-48.

रिष्वो हिंस्रे कश्चिदिहर्दुपधादेर्नमभ्यधात् ।
पङ्क्तौ च नर्तके चैव लष्वो लिष्वोऽप्यसौ भवेत् ॥
पाठभेदादिहेत्वं च निपातेनैव लभ्यते ॥ ७२८ ॥

क्लीबे शिवं भद्रमुखोदकेषु द्रव्ये त्रिषु स्याद्गिरिशे तु पुंसि ।
शिवा भवेदामलकी भवानी हरीतकी सक्तुफला सृगालः ॥

शैवः शिवोद्यण्यपत्ये शेषेऽणि तु तदन्विते ।
पद्वो रये च भूलोके प्रह्वस्तु विनयान्विते ॥ ७३० ॥

आचार्ये त्विष्व ईष्वो वा व्याख्याभेदान्निगद्यते ।
यतो गुणे कृते सिद्धं सामान्यं ह्रस्वदीर्घयोः ॥ ७३१ ॥

अत्र बाहुलकाद्ध्रस्वशब्दःस्यादल्पखर्वयोः ।
उक्तो ह्रसिष्ठो ह्रसिमा ह्रसीयानिष्ठनादिषु ॥ ७३२ ॥

स्थूलदूरेति सूत्रेण यणादिपरलोपतः ॥

शेवायह्वाजिह्मग्रीवाप्वामीवाः ॥ १-१४६ ॥

मीवा अमीवा इत्युभयथा व्याख्यानम् ॥
व्याख्यातः शेवशब्दोऽत्र देश[स्वर]भेदाय शिष्यते ॥

यानस्य साधने यह्वे महत्यपि मतौ स्त्रियाम् ।
जिह्वा तु रसनायां स्यात् द्विजिह्वः सूचकेऽप्यसौ ॥७३४॥

गोत्रान्तत्वाज्जिह्वाछनिमित्तवृद्धसंज्ञायाः ।
प्रतिषिद्धा सा जेह्वाकाता इति तेन शैषिकाणि स्यात् ॥

जिह्वामूले भवं जिह्वामूलीयं छे निगद्यते ।
ग्रीवागलसिरासु स्यात् गलेऽपि परिकीर्तिता ॥ ७३६ ॥

कुलकुक्षी····सु····[कुक्षीति सूत्रेण कृ]ते ढकञि शैषिके ।
ग्रैवेयकं बुधैः कण्ठभूषायामभिधीयते ॥ ७३७ ॥

१. Pā. III-i-110.
२. Pā. IV-i-112.
३. Pā. VI-iv-156.
४. Pā. IV-ii-96.

प्रैवं प्रैवेयमिति च भवार्थे विदुरण्ठञोः ।
आप्वास्तु वायौ मीवा स्यादुदरक्रिमिवातयोः ॥७३८॥

व्याख्याभेदादमीवोऽपि रोगवाच्येष दृश्यते ।
केशादिसूत्रे[शेवादिसूत्रे] स्त्रीलिङ्गनिर्देशोऽत्राविवक्षितः ॥

अन्यथापि प्रयोगाणामाप्वादिष्ववलोकनात् ॥

कृगृशदभ्यो वः ॥ ॥ १-१४७ ॥

कर्वः कामे मूषके च गर्वो वा स्यादङ्कृतौ ॥ ७४० ॥

शर्वः शिवे स्यात्पुंयोगे स्त्रियां ङीषानुगागमौ ।
शर्वाणी तेन पार्वत्यां दर्वो रात्रिंचरे पुमान् ॥ ७४१ ॥

कानन्युकवृषितक्षिरा-जिधन्विद्युप्रतिदिवः ॥ ॥ १-१४८ ॥

युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालिनि ।
संप्रसारणभागेष भसंज्ञायामतद्धिते ॥ ७४२ ॥

युवतिस्तु तरुण्यां स्त्री यौतेश्शतरि ङीपि तु ।
युवतीत्यपि तत्राद्यात्समूहार्थेऽपि यौवनम् ॥ ७४३ ॥

पुंवद्भावस्तु भैस्याढ इति वार्तिकशासनात् ।
द्वितीयादनुदात्तादेरञि यौवतमिष्यते ॥ ७४४ ॥

पूर्वस्मादपि भिक्षादिपाठाद्वृत्तिकृतो मते ।
तत्सामर्थ्येन पुंवत्वाभावे यौवतमूचिरे ॥ ७४५ ॥

हायनान्तयुवादिभ्योऽणित्यण् यदि विधीयते ।
तदापि यौवनं यूनो भावे कर्मणि च स्मृतम् ॥ ७४६ ॥

युवाखलतिसूत्रेण खलत्याद्यैस्समस्यते ।
युवा च युवतिर्लिङ्गविशिष्टपरिभाषया ॥ ७४७ ॥

युवखलतिर्युवखलती युवपलितश्चापि युवपलिता ।
युववलिनो युववलिना च युवजरन्युवजरत्यपि प्रोक्ताः ॥

१. Vā. VI-iii-35.
२. Pā. V-i-130.
३. Pā. II-i-67.
४. Pāribhāṣā 72.

कर्मधारयजातीयदेशीये पुंवदुक्तितः ।
स्त्रियो युवखलत्याद्याः साधनीया मनीषिभिः ॥ ७४९ ॥

युवाल्पयोर्यदि कनादेश इष्ठेयसोर्भवेत् ।
स्थूलैदूरेऽति चेल्लुप्तं पक्षे परयणाद्यपि ॥ ७५० ॥

गुणः पूर्वस्य च तदा स्यातां युवतमे क्रमात् ।
कनिष्ठश्च यविष्ठश्चेत्युभौ युवतरे त्वमू ॥ ७५१ ॥

कनीयांश्च यवीयांश्च वृषा कर्णमहेन्द्रयोः ।
वस्वश्वयोरस्य भत्वे वृषण्वस्वश्वयोरपि[रिति] ॥ ७५२ ॥

भवेद्वृषण्वसुरिति वृषणश्च इति द्वयम् ।
तक्षा स्याद्वर्धकौ पुंसि ण्ये त्वस्मात्कारिलक्षणे ॥७५३॥

ताक्षण्योऽण्युपसंख्यानात्ताक्ष्णोऽप्येतत्सुते स्मृतौ ।
नडाद्यन्तर्गणे तैक्षन्नलोपश्चेति कुञ्विधेः ॥ ७५४ ॥

छप्रत्यये तक्षकीयः कथितश्चातुरर्थिके ।
ग्रामकौटाभ्यां च तक्ष्ण इति तत्पुरुषे टचि ॥ ७५५ ॥

ग्रामतक्षो ग्रामनिघ्ने कौटतक्षः स्वतन्त्रके ।
राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः ॥ ७५६ ॥

राजकं राजवृन्दे स्याद्राजन्यः क्षत्रिये स्मृतः ।
राजन्यकं तत्समूहे राजपुत्रे गणे त्विह ॥ ७५७ ॥

स्याद्राजपुत्रकं गोत्रोक्षोष्ट्रोरभ्रेति वुञ्विधेः ।
राजन्यानां च विषयो देशो राजन्यकः स्मृतः ॥७५८॥

१. Pā. VI-iv-150.
२. Pā. IV-ii-91. Gaṇasūtra 2
३. Pā. V-iv-95.
४. Pā. IV-ii-39.

सुराज्ञि त्रिषु राजन्वान् देशादौ परिकीर्तितः ।
असमासे यका राज्यं राज्ञो भावे च कर्मणि ॥ ७५९ ॥

सौराज्यमाधिराज्यादिब्राह्मणादिष्यञि स्मृतम् ।
छे शैषिके राजकीयो राज्ञः कैचविधानतः ॥ ७६० ॥

राजान्तादिहराजाहरिति तत्पुरुषाट्टचि ।
महाराजप्रभृतयोऽदन्ताः शब्दाः प्रसाधिताः ॥ ७६१ ॥

स्यान्माहाराजिको भक्तिः महाराजोऽस्य चेट्टञि ।
राजसूयः क्रतौ राजोपपदात् क्यब्विधेस्युङः[धेः सुञः] ॥

ईदृशाट्टग्विधेर्हन्तेः राजघो राजहन्तरि ।
राजयुध्वा राजकृत्वा स्याच्चेद्युधिकृञोः क्विप् ॥७६३॥

वसोश्चेति [वनो रैं चेति] स्त्रीराजकृत्वरीङीब्रयोस्स्मृता ।
वैनो न हश इत्येतौ न स्यातां राजयुध्वनि ॥ ७६४ ॥

धन्व क्लीबे शरासे स्यान्मरुदेशे पुमानयम् ।
ऑष्टकं नाम धन्वेति भाष्ये ह्रस्वान्तदर्शनात् ॥ ७६५ ॥

मरुदेशे क्लीबमपि धन्वशब्दं प्रचक्षते ।
व्रीह्यादित्वादिना तस्माद्धन्वी धानुष्कवाचकः ॥७६६॥

गत्यर्थोऽयं धविर्धातुरिति[धन्विधातुरिह] सूत्रैकगोचरः ।
द्युवा त्वभिगते सूर्ये द्रुत्वा मरुति सारसे ॥ ७६७ ॥

दिवसेन्धे द्युतिकरे बुधैः प्रतिदिवा स्मृतः ॥
सप्ताष्ट चेति षट् संज्ञावेतौ संख्याभिधायकौ ॥ ७६८ ॥

सप्यशूभ्यां तुट् च ॥ १-१४९ ॥

१. Pā. IV-ii-140.
२. Pā. IV-i-7.
३. Vā. IV-i-7.
४. Mahābhāṣya under IV-ii-104, Vār. 31.

अपत्ये पुंसि शब्दानां[सप्तानां] साप्तिबार्हादिजादिञः ।
सख्ये साप्तपदीनं स्यादाप्त्यत्वात्सप्तभिः पदैः ॥ ७६९॥

पूरणे डटि नान्तादसंख्यादेर्मटि चानयोः ।
सप्तमोऽष्टम इत्येतौ क्रमेण कथिताविह ॥ ७७० ॥

भागे प्रागेकादशभ्योऽछन्दसीत्यनि सप्तमः ।
पञ्चभक्त्वे तु भागस्य आनोर्लुक्यष्टमो मतः ॥ ७७१ ॥

आनावपि यथाप्राप्तं कन्लुकौ चेति चोक्तितः ।
लुक्पूरणस्य वै तावतिथं ग्रहणमित्यतः ॥ ७७२ ॥

कन्प्रत्यये[ये त्व]ष्टमकमष्टकं ग्रहणं द्विधा ।
गृह्णात्यसौ तावतिथेनेति कन्नित्यमेव लुक् ॥ ७७३ ॥

पूरणस्याष्टकस्तेन ग्रहीतरि निरूपितः ।
अन्येषु पूरणेष्वेवमूह्यतां सूक्ष्मदर्शिभिः ॥ ७७४ ॥

अस्य परिमाणमष्टावध्यायाः सूत्रमष्टकं तेन ।
संख्यायाः संज्ञेत्याद्युक्त्या कनि पाणिनीयमिह कथितम् ॥

सूत्राच्च कोपधादित्यध्येतरि वेदितर्युपात्तस्य ।
लुक् प्रत्ययस्य यस्माद्वैयाकरणोऽष्टकः स्मृतस्तस्मात् ॥

अनशीतिः प्राक्शतगा संख्या यद्यष्टनः पराभवति ।
अबहुव्रीहिसमासे भवेदष्टादशाद्यात्वे ॥ ७७७ ॥

युक्ते तु गोभिरष्टाभिः शकटेऽष्टागवं स्मृतम् ।
अष्टाकपालमष्टासु स्यात्कपालेषु संस्कृते ॥ ७७८ ॥

१. Pā. V-ii-48.
२. Pā. V-ii-49.
३. Pā. V-ii-77.
४. Pā. V-i-58.
५. Pā. IV-iii-137.

हविष्यष्टापदं तु स्यात् स्वर्णे शारिफलेऽपि च ।
अष्टापदस्तु शरभे संज्ञायां दीर्घशासनात् ॥ ७७९ ॥

नञि जहातेः ॥ १-१५० ॥

अहश्शब्दो नकारान्तो दिवसस्यैष वाचकः ।
अह्नां समूह इत्यर्थे स्यादाह्नं खण्डिकाद्यैञि ॥ ७८० ॥

टिलोपो न भवेदह्नैष्टखोरेवेति शासनात् ।
अहर्गणेन साध्ये स्यादहीनः खे सति क्रतौ ॥ ७८१ ॥

दिवौविभेत्यादिनास्मिन् कृञष्टे स्यादहस्करः ।
अँतः कृकमिसूत्रेण विसर्गस्यायमत्र सः ॥ ७८२ ॥

द्व्यहऽह्नोत्तमाहाद्याः पुंस्यदन्ताष्टिपि[ष्टचि] स्मृताः ।
सर्वैकदेशसंख्यातपुण्यसंख्याव्ययादिकः ॥ ७८३ ॥

अहादेशमहन् [देशो ह्यहः] शब्दस्समासान्तपरो भवेत् ।
तेन सर्वाह्णपूर्वाह्णसंख्याताह्नादयः स्मृताः ॥ ७८४ ॥

पुंलिङ्गा एव रात्राह्नाँहाः पुंसीत्यनुशासनात् ।
सर्वाह्णादिषु णत्वोक्तिरह्नोदन्तौदिति स्मृतेः ॥ ७८५ ॥

नँ सङ्ख्यादेस्समाहार इति तु प्रतिषेधतः ।
द्व्यहऽह्न्यहादौ नाह्नोक्तिः स्यात्तु द्व्यह्नप्रियादिषु ॥७८६॥

द्व्योरह्नोर्भवेद्व्यह्नो लुकि कार्लाट्टञो द्विगोः ।
निर्वृत्तादिष्विहन्नन्तात् द्विगोरर्थेषु ठञ्खयोः ॥ ७८७ ॥

द्वैयह्निको द्व्यहीनश्च रात्र्यहःसूत्रतः स्मृतौ ।
अनित्यत्वात्समासान्तविधेर्नात्र टजादितः ॥ ७८८ ॥

१. Pā. IV-ii.45.
२. Pā. VI.iv-145.
३. Pā. III-ii-21.
४. Pā. VIII-iii-46.
५. Pā. II-iv-29.
६. Pā. VIII-iv-7.
७. Pā. V-iv-89.
८. Pā. IV-iii-11.
९. Pā. V-i-87.

प्राग्वतीयेषु कालाद्धि तेनै निर्वृत्तमित्यपि ।
तैमधीष्टो भृतो भूतो भावीत्यर्था इहाश्रिताः ॥ ७८९ ॥

एष्वेवार्थेष्वद्विगौ तु ठञ्वशादाह्निकं भवेत् ।
द्वादशाहादयः काले मुख्या लाक्षणिकाः क्रतौ ॥७९०॥

द्वादशाहिक्यादिरेषां दक्षिणाप्राग्वतेष्ठञि ।
यैज्ञाख्येभ्य इति ह्याख्याग्रहणं तत्र यत्कृतम् ॥ ७९१ ॥

अकालादपि तेन स्यादुक्तात्तोर्यामिकी ततः ।
सौयं चिरमिति प्राह्णेशब्दादेदन्ततां गतात् ॥ ७९२ ॥

निपातनेन ट्युटयुल्भ्यां तुटि प्राह्णेतनं विदुः ।
पूर्वाह्णेतनपूर्वाह्णतनपौर्वाह्णिकाख्यः ॥ ७९३ ॥

उक्ता विभाषा पूर्वाह्णेत्यादिना ट्युटयुलोष्ठञि ।
स्युरेवमेवापराह्णेतनाद्याः शैषिकार्थकाः ॥ ७९४ ॥

सप्तम्यलुग्विकल्पस्तु धैकालतनसूत्रतः ।
कौलात्तदस्य सोढं चेत्प्रत्ययः प्रथमान्ततः ॥ ७९५ ॥

पूर्वाह्णेतनपौर्वाह्णिकावेवमपराह्णतः ।
धकालयोरपि प्राग्वदूह्यः सप्तम्यलुग्विधिः ॥
सुबन्तात्तद्धितोत्पत्तिरिति ज्ञाप्यमिहालुका ॥ ७९६ ॥

पूर्वाह्णिकोऽपराह्णिक इति पूर्वाह्णापराह्णसूत्रेण ।
पूर्वाह्णेऽप्यपराह्णे जातो वुन्प्रत्यये क्रमात् कथितः ॥ ७९७

एते त्रयोदश कनिन्प्रत्ययान्ताः ॥

श्वन्नुक्षन् पूषन् शुनके श्वा भसंज्ञायां संप्रसारण्यतद्धिते ।
प्लीहन् क्लेदन् स्नेहन्

१. Pā. V-i-79.
२. Pā. V-i-80.
३. Pā. V-i-95.
४. Pā. IV-iii-23.
५. Pā. IV-iii-24.
६. Pā. VI-iii-17.
७. Pā. IV-iii-52.
८. Pā. IV-iii-28.

मूर्धन् मज्जन् अर्यमन्
विश्वप्सन् परिज्मन्
मातरिश्वन् मघवन्निति
॥ १-१५१ ॥

स्त्रियां शुनीति गौरादिगणेऽष्टाठेन ङीषिह ॥ ७९८ ॥

ङीषु नास्मिन्नुपपदे धेटः खशि शुनिन्धयः ।
प्रकृतेष्टित्वसामर्थ्यात् स्त्रीत्वे ङीपि शुनिन्धयी ॥७९९ ॥

खशः खित्वाद्ध्रस्वमुभौ तत्रोत्तरपदे कृतौ ।
शुने हिते गवाद्युक्त्या शून्यं शुन्यमिति द्विधा ॥८००॥

शुनः समीपेऽञ्चतुरेत्यादिनोपशुनं स्मृतम् ।
गोष्ठे तु वर्तमानः श्वा गोष्ठश्व इति कथ्यते ॥ ८०१ ॥

स्यादतिश्वः श्वानमतिक्रान्ते टचि कृते सति ।
अप्राणिषूपमानार्थादाकर्षे श्वादिकेऽपि टच् ॥ ८०२ ॥

किर्वैन्तोऽवधृताश्वाविछल्ये न हि वृतीत्यतः ।
दीर्घत्वेनोत्तरपदाधिकारोक्तेन....तः[दीर्घतः] ॥ ८०३ ॥

दन्तदंष्ट्राकर्णकुन्दवराहेषु परेष्विह ।
दीर्घत्वं पुच्छपदयोरपि व्याचक्षते शुनः ॥ ८०४ ॥

तेन श्वादन्त इत्यादिरूपाण्यूह्यानि कोविदैः ।
श्वापदो मृगभेदे स्यात्पदान्तस्यादिना त्विह ।
शौवापदः श्वापदश्चेत्यैजागमविकल्पनात् ॥ ८०५ ॥

श्वगणेन चरत्यर्थे श्वगणाट्ठञ् चेति ठञ्ठनोरुक्त्या ।
श्वागणिकः श्वगणिक इत्यनयोः स्त्रीत्वे तु ङीङ्ङीषौ ॥

श्वनिशं श्वनिशेत्येतच्चतुर्दश्यां द्वयं स्मृतम् ।
सूत्रे विभाषा सेनेति क्लीबत्वस्य विकल्पनात् ॥ ८०७ ॥

१. Pā. IV-i-41.
२. Pā. V-i-2.
३. Pā. V-iv-77.
४. The reading in both the mss. is :—**किवन्ते विधृताश्वाचि छल्ये न हि कृतीत्यतः ।**
५. Pā. VI-iii-116.
६. Vā-iii-130.
७. Pā. VII-iii-9.
८. Pā. IV-iv-11.
९. Pā. II-iv-25.

उक्षा वृषे तत्समूहे वुञ्यौक्षकमुदाहृतम् ।
औक्षं स्यादनपत्येऽणि स्यादौक्षणोऽपत्यवाचिनि ॥८०८॥

उक्षण्युक्षतरः स्वल्पेष्टरचाश्वतरो यथा ।
जातोक्षश्च महोक्षश्च वृद्धोक्षश्चेत्यमी त्रयः ॥ ८०९ ॥

जाते महति वृद्धे च क्रमेण वृषभे स्मृताः ।
सूत्रादचैतुरेत्यादेः पूषा दिनकरे पुमान् ॥ ८१० ॥

ष्ठीहा तु कुक्षिरोगे ना गत्यर्थात् ष्ठिहतेरिह ।
निपात्य उपधादीर्घः क्लेदौषधिशशाङ्कयोः ॥ ८११ ॥

स्नेहा सुहृदि चन्द्रेऽर्के मूर्धा स्यान्मस्तके पुमान् ।
बहुव्रीहौ द्विमूर्धत्रिमूर्धौ षप्रत्यये स्मृतौ ॥ ८१२ ॥

मज्जा पुमानस्थिसारे टाबन्तोऽप्ययमिष्यते ।
अर्यमा तु पुमान् सूर्ये पितृदेवान्तरेऽपि च ॥ ८१३ ॥

पूषार्यम्णोः सर्वनामस्थाने यद्दीर्घशासनम् ।
शिस्वोर्नियमितं तेन न तदन्यत्र कल्पते ॥ ८१४ ॥

विश्वप्सा वीतिहोत्रे ना परिज्मा वह्निचन्द्रयोः ।
उत्पाद्याज्ञेरिमं प्राहुः परितो गन्तरीतरे ॥ ८१५ ॥

केचित्तु जोर्यणादेशे परिज्वेति बभाषिरे ।
न तत्साधु यतो लक्ष्यविरोधः सर्वतः स्फुटः ॥ ८१६ ॥

मातरिश्वा पुमान् वायौ मघवान् वज्रिणीति दिक् ।
मघवा बहुलं सूत्रे तृभावस्य विकल्पनात् ॥ ८१७ ॥

तकारान्तनकारान्तवुभावेताविति स्थितम् ।
नकारान्तः पुनरसौ युववत्संप्रसारणे ॥ ८१८ ॥

१. Pā. V-iv-77.

श्वन्नुक्षन्निति सूत्रान्त इतिशब्दो ह्ययं कृतः ।
आद्यर्थत्वात्परत्रापि कनिनः कल्पने क्षमः ॥ ८१९ ॥

पञ्चेति षट्चतुर्मध्यसंख्यावाचीति दृश्यते ।
हञ्श्विस्तु [पाञ्श्विस्तु] तदपत्ये स्याद्ढाढादीञः प्रवर्तनात् ॥

पूरणे पञ्चमः स्त्रीत्वे टित्वान्ङीपीह पञ्चमी ।
पुंवद्भावनिषेधेन पूरण्यामब्विधेरपि ॥ ८२१ ॥

बहुव्रीहौ हि कल्याणी पञ्चमा रात्रयः स्मृताः ।
अप्राधान्ये तदुभयाभाव इत्यवधारणात् ॥ ८२२ ॥

कप्यह्स्वे च कल्याणपञ्चमीकोऽन्य एव सः ।
पक्षस्तिरोहिताङ्गत्वाद्रात्रिरत्रोपसर्जनम् ॥ ८२३ ॥

पञ्चपरिमाणमस्य स्यात्पञ्चकोऽत्र सङ्घादौ ।
वर्गे तान्तः पञ्चत् पञ्चक इत्याद्यसौ भवति ॥ ८२४ ॥

दिक्संख्ये संज्ञायामिति सूत्रप्राप्तकर्मधारयतः ।
पञ्चजनाश्चत्वारः कथिता रथकारपञ्चमा वर्णाः ॥ ८२५ ॥

पञ्चजनीनं तेभ्यो हितमिति खस्योपसंख्यानात् ।
पञ्चभिरेतैर्भूतैः जायन्ते तेन पञ्चजनाः ॥ ८२६ ॥

करणेऽपि शेषषष्ठ्या सह भवति समाससंपत्तिः ।
जनयन्तीति ण्यन्तादचि जनशब्देऽभिनिर्वृत्ते ॥ ८२७ ॥

भूतानि पञ्च येषां जनानि तेष्वेव पञ्चजनशब्दः ।
छे पञ्चजनीयः स्यात्पञ्चजनादिष्वकर्मधारयतः ॥ ८२८ ॥

स्मृतः पञ्चजनो रक्षोविशेषे तद्भवो हरेः ।
शङ्खस्तु पाञ्चजन्यः स्यादौपसंख्यानिकञ्यतः ॥ ८२९ ॥

१. Pā. II-i-50.

पैङ्क्तविंशतिसूत्रेण पङ्क्तिशब्दो निपातितः ।
पञ्चच्छब्दाद्वूढ एष इति नावयवादरः ॥ ८३० ॥

छन्दोविशेषं क्रमसन्निवेशं दशाख्यसंख्यामपि वक्ति पङ्क्तिः ।
पञ्चाक्षरा पङ्क्तिरिह द्विजानां पङ्क्तिस्तथा पङ्क्तिरथो यथेति॥

युक्तायुक्तादिगणनापर्यालोचनया पुनः ।
पङ्क्तिर्हि दशमं छन्दः तेन केचिदशिक्षिताः ॥ ८३२ ॥

लक्षणां दशसंख्यायां पङ्क्तिशब्दस्य चक्षते ।
पराकृतमनेनैव दूरतस्तदपि स्मृतः ॥ ८३३ ॥

विंशत्यादिपदस्यापि शक्तिरेवोचिता यतः ।
अब्धिभूतरसाद्यास्तु साक्षात्तत्संख्ययान्विताः ॥ ८३४ ॥

लोके प्रसिद्धाः शब्दाश्च नेति संख्यानुलक्षकाः ।
दशानां पूरणी पङ्क्तिरिति तद्विदितं कथम् ॥८३५॥

दूरतो दूरतो गत्वा किं प्रमाणं तदाश्रये ।
प्रमाणज्ञानशून्योक्तिस्ततः सा नाहतेति दिक् ॥ ८३६ ॥

इति श्रीधरवंश्येन रचिते पेरुशास्त्रिणा ।
आद्यः पादः समाप्तोऽयमौणादिकपदार्णवे ॥ ८३७ ॥

अस्मिन् पादे "सप्यशूभ्यां तुट् च" इत्यनन्तरम् "नुदंशोर्गुणश्च" इति "सहेः षष् लुक् च" इति च सूत्रद्वयं नवन् दशन् षट् [षडिति] शब्दव्युत्पादक-मुज्ज्वलदत्तेन व्याख्यातम् । एवम् "मृजेश्च" इत्यनन्तरम् "खण्डेश्च" इति सूत्रम् । एवमन्यैरपि तैस्तैर्वृत्तिकारैः कानिचित्सूत्राणि अधिकानि व्याख्यातानि । सूत्रक्रमभेदश्च तत्र भूयान् परिदृश्यते । पाठभेदांश्च भूयांस इति सांप्रदायिक एवाश्रित इत्यलं बहुना ॥

कामिनि कामद्विषतः कामितफलदायिनि प्रपत्तिजुषाम् ।
कामिह शरणयिताहे कामाक्षि विना दयावतीं भवतीम् ॥

१. Pā. V-i-59.

अम्ब कामाक्षि कल्याणि शम्बरारातिजीविके ।
बिम्बशोणाधरे चन्द्रबिम्बकान्तातने नमः ॥
आद्ये पादेऽत्र सूत्राणि गिरिबाणेन्दुसंख्यया ।
उणादिषु प्रसिद्धानि मतेऽस्मिन् संप्रदायिनाम् ॥

"कृवापाजि" "यो द्वे च" "मद्गुरादयः" "कृषिचमितनि" "रमेर्वृद्धिः" "चापूखडिभ्यः" "सिविसिशुषिभ्यः" सप्तदश [?] ।

पादेऽस्मिन्नुक्ताः श्लोकास्त्विन्दुबाणवसुसंख्यया ।
अर्थेनापि समायुक्ताः श्रीमता पेरुशल्लिणा ॥

इत्युणादिषु प्रथमः पादः ॥

अथ द्वितीयः पादः

कृहृभ्यामेणुः ॥ २-१ ॥ करेणुः स्त्री करिण्यां स्यात्कर्णिकारे गजे च ना ।
हरेणुः स्त्रीसतीने स्याद्रेणुकाकुलयोषितोः ॥ १ ॥

हनिकुषिनीरमिकाशि-भ्यस्थक्[कथन्] ॥२-२॥ हथो विषण्णे कुष्ठं स्यादस्त्री रोगसुगन्धयोः ।
नीथो नेतरि च स्तोत्रे रथः स्यन्दनकाययोः ॥ २ ॥

चरणे वेतसेऽप्येष विपश्चिद्भिः प्रयुज्यते ।
संज्ञायां भृतिखेच्यत्र सामभेदे रथन्तरम् ॥ ३ ॥

कुर्वादे रथकाराण्ये राथकार्यस्तदात्मजे ।
द्विजकल्पादयं कारिलक्षणो ण्यस्तु तादृशात्[4] ॥ ४ ॥

रथ्या च रथकट्या च रथबृन्देयकट्यचोः ।
रथस्येदमितीत्यर्थे रथ्यं चक्रे रथाद्यैति[5] ॥ ५ ॥

द्वयोस्तु रथयोरङ्गमित्युक्तौ द्विरथं स्मृतम् ।
रथैसीताहलेभ्यो यद्विधानं हि तदन्ततः[6] ॥ ६ ॥

रथोक्तेस्तद्वहत्यादौ वनजारपीह[द्विगोरिति न हीह] लुक् ।
भवेदाश्वरथं पैत्रपूर्वादञनुशासनात् ॥ ७ ॥

रथं वहति रथ्यः स्याच्चद्वहत्यादिना यति ।
प्राग्दीव्यतीयो नेत्यस्माद्विरथ्यादौ न लुग्भवेत्[7] ॥ ८ ॥

---

१. Pā. III-ii-46.
२. Both the mss. add **रभवेत् प्रायस्मृतेः.**
३. Pā. IV-iii-121.
४. Vā. IV-iii-121.
५. Pā. IV-iv-76.
६. Pā. IV-iii-122.
७. Both the mss. add **रथेन चरतिष्ठति [ष्ठलि].**

सूत्रे खैलयवेत्यादौ चकारेण रथोद्यति ।
स्याद्रथाय हिता रथ्या विशिखायामिति स्मृता ॥ ९ ॥

रथेन चरति प्रोक्तो रथिकोऽध्विकवत् ष्ठलि ।
कोः कैद्भावो यदि रैथवदयोश्चेति कद्रथः ॥ १० ॥

भवेत्प्रात्यग्रथिः साल्वावैयवेत्यादिसूत्रतः ।
तस्य राजन्यपत्ये च तद्राजञ्प्रत्ययस्मृतेः ॥ ११ ॥

संज्ञायां भ्रितिखच्यत्र सामभेदे रथन्तरम् ।
काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः ॥ १२ ॥

स्याद्दिशि स्थानमात्रे स्त्री काष्ठमाख्यातमिन्धने ।
अधे भृञः ॥ २-३ ॥ इष्टिं दीक्षान्तकर्तव्यां पुंलिङ्गेऽवभृथं विदुः ॥ १३ ॥

उषिकुषिगार्तिभ्यस्थन् ॥ २-४ ॥ रदच्छदे पुमानोष्ठः सामासे तु विकल्पनात् ।
पररूपस्य बिम्बोष्ठो बिम्बौष्ठ इति च द्विधा ॥ १४ ॥

प्रोष्ठीशफर्यो ङीषत्र नासिकोदैरसूत्रतः ।
प्रोष्ठो गवि प्रोष्ठपदाः स्युर्नक्षत्रे निपातनात् ॥ १५ ॥

सुप्रातसुश्वादिसूत्रे पौर्णमास्येतदन्विता ।
भवेत्प्रौष्ठपदी नक्षत्राणां मासे तु यत्र सा ॥ १६ ॥

स स्यात्प्रौष्ठपदः प्रोष्ठपदाः स्युर्देवतास्य चेत् ।
महाराजप्रोष्ठपदाट्ठञित्युक्तानुशासनात् ॥ १७ ॥

ठञि स्यात्प्रौष्ठपदिकं कोष्ठः कुक्षिकुसूलयोः ।
अन्तर्गृहेऽपि गाथा तु स्यादाभाणकवृत्तयोः ॥ १८ ॥

१. Pā. V-i-7.
२. Pā. IV-iii-121.
३. Pā. VI-iii-101.
४. Pā. VI-iii-102.
५. Pā. IV-ii-171.
६. Pā. III-ii-46.
७. Pā. IV-i-35.
८. Pā. V-iv-120.
९. Pā. IV-ii-35.

गाथाकारो नशब्देति टनिषेधादणा कृञः ।
अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने ॥ १९ ॥

व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु ।
यदर्थादनपेतं तदर्थ्यं स्याद्वाच्यलिङ्गकम् ॥ २० ॥

अर्थे विभाषेत्यन्यस्य दुगागमविकल्पनात् ।
अन्यदर्थस्तथान्यार्थ इति द्वेधा स्मृतं बुधैः ॥ २१ ॥

अर्थान्नञ इति ह्येतदुरःप्रभृतिषु स्थितम् ।
अनर्थकं बहुव्रीहौ समासान्तकपाततः ॥ २२ ॥

शु गताविति धातोस्तु शोथ इत्यत्र कश्चन ।
निर्वर्तितो बाहुलकादस्ति श्वयथुवाचकः ॥ २३ ॥

सर्तेर्णित् ॥ २-५ ॥ सार्थो वणिक्समूहे स्यादपि सङ्घातमात्रके ।

जृवृञ्भ्यामूथन् ॥२-६॥ क्लीबे जरूथं मांसे स्याद्विशेषे त्वनुशासनात् ॥ २४ ॥

वरूथं स्यात्तनुत्राणे रथगोपनवेश्मनोः ।
अतो वरूथिनी सेनेत्यपि स्यादिनि कल्पिते ॥ २५ ॥

पातृतुदिवचिरिचिसि-सिभ्यस्थक् ॥ २-७ ॥ षड्धातवः ॥
नवनीते जले पीथं पुमान् पीथो दिवाकरे ।
तीर्थं शास्त्रा[ध्वरक्षेत्रोपा]योपाध्यायमन्त्रिषु ॥ २६ ॥

अवतारर्षिजुष्टाम्भःस्त्रीरजस्सु च विश्रुतम् ।
परस्परं सतीर्थ्यास्ते य एकगुरुमन्त्रिताः ॥ २७ ॥

समानतीर्थे वासीति प्राग्घितीयोऽत्र यत्कृतः ।
समानस्य सभावोऽत्र तीर्थे[4] य इति शिष्यते ॥ २८ ॥

१. Pā. VI-iii-100.
२. Pā. V-iv-151. See the gaṇasūtra.
३. Pā. IV-iv-107.
४. Pā. VI-iii-87.

तुत्थमञ्जनभेदे स्यात् [तुत्थोऽमावञ्जने] तुत्था नीली-
सूक्ष्मैलयोरपि ।
उक्थं सामविशेषे तल्लक्षणे त्वस्य लक्षणात् ॥ २९ ॥

तेदधीते वेद वेति स्यादस्मादौक्थिकष्ठकि ।
धर्माम्नायावौक्थिकानामौक्थिकक्ये टचे प्रकीर्तिते ॥३०॥

चैरणेभ्यो धर्मवदित्यतिदेशाद्गणेऽप्यदः ।
मुख्योक्थाङ्गगणौ नेष्टौ रिक्थं तु द्रविणे स्मृतम् ॥३१॥

रुचेः स्तुत्यर्थकाद्रुक्थमपि बाहुलकादिह ।
सिक्थो भक्तपलापेन [भक्तपुलोके ना] मधूच्छिष्टे
नपुंसकम् ॥ ३२ ॥

अर्तेर्निरि ॥ २-८ ॥ निरृथं साग्नि हिंसायां निरृथः पुंसि कुत्रचित् ।

निशीथगोपीथाघ-गथाः ॥ २-९ ॥ निशीथस्तु पुमार्थेत्तेस्याद[पुमानर्धरात्रे स्याद्रा]त्रिमात्रके ॥
अर्धरात्रार्थकादस्मादिनौ निशि निशीथिनी ।
गोपीथो यजमाने ना तीर्थे स्यादेष न द्वयोः ॥ ३४ ॥

प्रातःस्नायिन्यवगथः प्रातस्सवनसोमयोः ॥

गश्रोदि ॥ २-१० ॥ सामभागविशेषे तु बुधै····[रुद्गीथ उ]च्यते ॥ ३५ ॥

समीणः ॥ २-११ ॥ समिथोऽस्त्री रणे वह्नौ दृष्टो वेदनिघण्टुषु ॥

तिथपृष्ठगूथयूथप्रोथाः ॥ २-१२ ॥ पञ्च शब्दाः ॥
तिथः पुंस्यलकेशालेवे[पुंस्यनले कामे] पृष्ठं तु चरमे तनोः॥
देहावयवभेदेऽपि····[क्वचित्स्तोत्रे च] दृश्यते ।
पृष्ठानां निकुरुम्बेऽपि पृष्ठ्यमाहुर्नपुंसकम् ॥ ३७ ॥

विष्ठायां तु भवेद्गूथं दीर्घोऽत्रैव निपातनात् ।
यूथी····[पुष्प]प्रभेदे स्यान्मागध्यां च कुरण्टके ॥३८॥

१. Pā. IV-ii-59. २. Pā. IV-ii-46.

यूथं तिर्यक्समूहे च प्रथमान्तेऽपि [वृन्दमात्रेऽपि] भाषितम् ।
यूथ्यो यूथभवे प्रोक्तो दिगादिभ्यो यदीरणात् ॥ ३९ ॥

प्रोथोऽश्ववेगे घोणायां नटस्त्रीगर्भयोरपि [नाकटच्या-मध्वगे त्रिषु] ।
प्रस्थि····[ते च] भवेदेष वाच्यलिङ्गो बुधैः स्मृतः॥ ४०॥

निपातनात्प्रोथशब्दे गुण इत्यवबुध्यते ॥

स्फायितञ्चिवञ्चिशकि-
क्षिपिक्षुदिस्तृपितृपि-
डपिवन्धुन्दिभ्वितिवृ-
त्यजिनीपदिमदिमुदि-
खिदिछिदिभिदिमन्दि-
चन्दिदहिदसिदम्भिव-
सिवाशिशीङ्हसिसि-
धिशुभिभ्यो रक्॥२-१३॥

द्वात्रिंशद्धातवः । दम्भिवहिवसि इति ऊह्यादिकं[१] केचित्पेठुः ॥

स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे ॥ ४१ ॥

तक्रं तु गोरसे क्लीबं पादमात्राम्बुमिश्रिते ।
त्रिषु वक्रोऽनृजौ भौमे पुटभेदे शनैश्चरे ॥ ४२ ॥

न्यङ्क्वादिपाठतः कुत्वं तञ्चिवञ्च्योर्विभाव्यताम् ।
शक्रो महेन्द्रे कुटजार्जुनभूरुहयोरपि ॥ ४३ ॥

क्षिप्रं तु त्वरिते क्लीबं भेद्यगामि त्विदं त्रिषु ।
क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत् ॥ ४४ ॥

क्षुद्रा व्यङ्गानटीकम्पि[कण्ट]कारिकासरघासु च ।
चाक्रेरीवेश्ययोर्हिंस्रामक्षिकामात्रयोरपि ॥ ४५ ॥

स्थूलैर्दूरेति लुप्येत यणादीह परं यदि ।
गुणः पूर्वस्य च क्षिप्रक्षुद्रयोरिष्ठनादिषु[२] ॥ ४६ ॥

क्षोदिष्ठः क्षोदिमा क्षुद्रात् क्षोदीयानिति च त्रयम् ।
सृप्रश्चन्द्रेऽथ तृप्रो ना पुराडाशे द्वयोर्न चेत् ॥ ४७ ॥

आज्ये काष्ठे च दुःखे चेत्याहुरर्थविशारदाः ।
इ····[ष्ठन्नादौ त्रपि]ष्ठश्च त्रपीयानिति च द्वयम् ॥४८॥

१. Pā. IV-iii-54. २. Pā. VI-iv-156.

प्रियस्थिरेत्यादिसूत्रे त्रपादेशविधानतः ।
त्रपुं न सहते यस्तु स तुप्रालुरिति स्मृतः ॥ ४९ ॥

चालुः शीतोष्णतृप्रेभ्यैः[1] स्यात्तस्यासहने यतः ।
दृप्रः पुमान् बलवति भवेद्वन्द्रस्तु पूजके ॥ ५० ॥

उद्रो जलचरेऽब्धौ संपूर्वः श्वित्रं रुजाभिदि ।
वृत्रो रिपौ घनद्वाण्डे [ध्वनौ ध्वान्ते] शैले चक्रे च दानवे ॥

वृत्रहा वज्रिणि ब्रह्महभ्रूणवृत्रेष्विति क्विपि[2] ।
पूषार्यमवदस्यापि दीर्घः शिस्वोः परत्र न ॥ ५२ ॥

वीरस्तु सुभटे श्रेष्ठे राहौ स्कन्दकुबेरयोः ।
पुरुहूते च शंभौ च वीरं शृङ्गान्तरेऽपि च ॥ ५३ ॥

वीरयोधादयः पूर्वापरप्रथमसूत्रतः[3] ।
एकवीरो बाहुलकात्साधनीयो मनीषिभिः ॥ ५४ ॥

वीरस्य कर्मभावो वा वैरमित्यभिधीयते ।
वैरकारो नैशब्देति टनिषेधादणा कृञः[4] ॥ ५५ ॥

क्लीबे नीरं पुंसि पद्रः सलिलग्रामयोः क्रमात् ।
देशभेदे च सन्तोषे मद्रः पुंसि निगद्यते ॥ ५६ ॥

मद्रेभ्योऽञिति[5] दिक्पूर्वपदाज्जनपदार्थकात् ।
अञि शेषे पौर्वमद्रापरमद्रौ स्मृतावतः ॥ ५७ ॥

अमद्राणामिति[6] ह्युक्त्या वृद्धिर्मद्रे न संभवेत् ।
नगरत्वेऽपि दिक्शब्दादादिवृद्धिरियं ततः ॥ ५८ ॥

मद्रंकरो मद्रकार इति खच्यणि च क्रमात् ।
मद्राकृतस्तु डाजुक्त्या मुण्डिते स्याद्विशेषवत् ॥ ५९ ॥

१. Pā. VI-iv-157.
२. Vā. V-ii-122, 6.
३. Pā. III-ii-78.
४. Pā. II-i-58.
५. Pā. III-ii-23.
६. Pā. IV-ii-108.
७. Pā. VII-iii-13.

मुद्रा प्रत्ययकारिण्यां खिद्रो रोगदरिद्रयोः।
छिद्रं रन्ध्रे दूषणे च भिद्रं वज्रे प्रकीर्तितम् ॥ ६० ॥

मन्द्रः स्वरविशेषे ना चन्द्रो····[ऽम्बुनि हिमद्यु]तौ।
कर्पूरे शोचरूप्ये [मेचरूपे च] सुधायामपि न द्वयोः ॥

चन्देः पचाद्यचि भवेत्सुधांशौ चन्द इत्यपि।
दह्रो वैश्वानरे दस्रः खरस्वर्लोकवैद्ययोः ॥ ६२ ॥

दभ्रः स्वल्पे समुद्रेऽपि स्यादुस्रः किरणे तरौ।
अर्जुन्यामुपचित्रायामप्युस्रा परिकीर्तिता ॥ ६३ ॥

अत्र शासिवैसीत्यादिषत्वं नरैपरेति न।
वाश्रो ना दिवसे वाश्रं मन्दिरेऽपि चतुष्पथे ॥ ६४ ॥

पुंस्येष राक्षसे [रासभे] पक्षिण्यपिशब्दान्विते त्रिषु।
शीरस्त्वजगरे हस्रो मूर्खे सिध्रस्तु सज्जने ॥ ६५ ॥

शुभ्रं स्यादभ्रके क्लीबं त्रिषु शुक्लप्रदीप्तयोः।
शुभ्राव [शुभ्रापत्ये] तु शौभ्रेयः शुभ्रादिभ्यश्च दम्भिधेः ॥
दम्भेः पश्चाद्वहिं पेठुः केचिदुष्ट्रे वृषे तथा ॥

मुसेररक् ॥२-१४ ॥ मुसरो मुसले मुस्रेऽप्येष बाहुलकात्क्वचित् ॥ ६७ ॥

चकिरम्योरुच्चोपधायाः ॥ २-१५ ॥ "चकिचम्योः" इति केचित् ॥
चुक्रुरित्येष कथितः तथाम्लेऽप्यम्लवेतसे।
चुक्री चाङ्गेरिकायां च वृक्षाम्ले चुक्रमिष्यते ॥ ६८ ॥

रुभ्रोऽरुणे पाठभेदाच्चुभ्रो नाशविषण्णयोः ॥

वौ कसेः ॥ २-१६ ॥ विकुस्रः पुंसि चन्द्रे स्यात्कमले तु नपुंसकम् ॥ ६९ ॥

१. Pā. VIII-iii-60.
२. Pā. VIII-iii-110.
३. Pā. IV-i-123.

अमितम्योर्दीर्घश्च॥२-१७॥ आम्रः पुंसि रसाले स्यात्ताम्रं शुल्बेऽरुणे त्रिषु ॥

निन्देर्नलोपश्च ॥२-१८॥ निद्रा बाह्येन्द्रियज्ञानविरामे परिकीर्तिता ॥ ७० ॥

अर्देर्दीर्घश्च ॥ २-१९ ॥ आर्द्रा नक्षत्रभेदे स्त्री क्लिन्ने स्यादभिधेयवत् ।
आर्द्राज्जातस्त्वार्द्रकः स्यात्पूर्वाह्णेत्यादिना वुनि ॥ ७१ ॥

शुचेर्दश्च ॥ २-२० ॥ शूद्रस्तु वृषले गोपे त्वयं महदनन्तरः ।
स्त्रियां शूद्री तु पुंयोगे जातौ शूद्रेति टाब्वशात् ॥७२॥
आभीर्यो तु महाशूद्री जातिपुंयोगयोः समा ॥

दुरीणो लोपश्च॥२-२१॥ क्लीबे दूरं विप्रकर्षे विप्रकृष्टे तु वाच्यवत् ॥ ७३ ॥
इदमत्यन्तवचनेऽप्यनुभूतमितस्ततः ।
शैषिकार्थेषु दूरेत्यो दूरादेत्यैं इति त्रिषु ॥ ७४ ॥
स्थूलदूरेति लुप्येत यणादीह परं यदि ।
गुणः पूर्वस्य च भवेत्क्रमादिष्ठेयसोस्तथा ॥ ७५ ॥
दविष्ठश्च दवीयांश्च विबुधैः कथितावुभौ ।
अन्तात्यन्तेति सूत्रेण गमेर्डे दूरगस्त्रिषु ॥ ७६ ॥
विदूरात्तु प्रभवतीत्यर्थे वैदूर्यमुच्यते ।
विदूराञ्ञ्य इति ञ्येन मध्यदन्त्यो मणाविह ॥ ७७ ॥
प्रकृत्यन्तरतापक्ष एतदुक्तं समञ्जसम् ।
अन्ये त्विमं वालवायशब्दस्यादेशमूचिरे ॥ ७८ ॥

कृतेश्छः क्रूरश्च॥२-२२॥ कृच्छ्रमाख्यातमाभीले पापसान्तपनादिनोः ।
क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवत् ॥ ७९ ॥

रोदेर्णिलुक् च ॥२-२३॥ रुद्रः शिवे शैषिकेऽणि रौद्रो नाट्यरसान्तरे ।
उक्तोऽतिभीषणे तीव्रे रौद्री स्कन्दस्य मातरि ॥ ८० ॥

१. Pā. IV-iii-24.
२. Vā. VIII-iii.101.
३. Pā. VI-iv-156.
४. Pā. III-ii-48.
५. Pā. IV-iii-84.

शतं रुद्रा देवता स्युः यस्य तत्कथ्यते हविः ।
शतरुद्रियमेवं हि शतरुद्रीयमित्यपि ॥ ८१ ॥

शैतरुद्राद्घश्च सूत्रे घश्छयोरनुशासनात् ।
अनयोर्विधिसामर्थ्यात् द्विगोर्लुगिति नात्र लुक् ॥ ८२ ॥

बहुलमन्यत्रापि संज्ञाछन्दसोः ॥२-२४॥

अत्र रोदेर्णिलुक् चेति वर्तमाने णिलुक्पदे ।
उक्तं बहुलमन्यत्रापि संज्ञाछन्दसोरिति ॥ ८३ ॥

संज्ञायां शंभुरीशाने शं भावयति यत्ततः ।
वर्धन्तु त्वा सुष्टुतय इति तु छन्दसीति दिक् ॥ ८४ ॥

भवेदेवं बाहुलकादसंज्ञाछन्दसोरपि ।
वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे ॥ ८५ ॥

इति तस्योदाहरणं प्रेक्षावद्भिर्विमृश्यताम् ॥

जोरी च ॥२-२५॥

जुःसौत्रो धातुः । ज्यश्चेत्येके ॥
जीरः खड्गे वणिग्द्रव्ये जोरी चेत्यनुशासनात् ॥ ८६ ॥
भौष्यकारवचोरीत्या जिनातेरप्यसौ भवेत् ॥

सुसूधाम्गृधिभ्यः क्रन् ॥ २- २६ ॥

सुरो देवे सुरा मद्ये चषकेऽपि सुरा क्वचित् ॥ ८७ ॥
कन्प्रत्यये सुरावर्णः सुरकोऽहिर्निगद्यते ।
सुराशीध्वोष्टकि ष्टत्वात्सुरापी मद्यपायिनी ॥ ८८ ॥

सूरः पुंसि प्रकथितो विबुधैरुष्णदीधितौ ।
धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे ॥ ८९ ॥

सिन्धौ च गृध्रस्तु भवेत्खगभेदातिलुब्धयोः ॥

शुसिचिमीनां दीर्घश्च ॥ २-२७ ॥

चत्वारो धातवः । शुस्तालव्यादिर्गत्यर्थः ॥
शूरो ना कुक्कुटे वीरे तपने यादवे भटे ॥ ९० ॥

१. This occurs as Vārtika under IV-ii-28.
२. ṚV. VII-99-7.
३. Mahābhāṣya on I-i-4, 6.

नाड्यादित्वादिञा शौरिर्निर्णिष्यैन्धकसूत्रतः ।
सीरोऽर्केहलयोः पुंसि सीरस्येदन्तु सैरिकम् ॥ ९१ ॥

तस्येदमित्यतः पश्चाद्धलेसीराट्ठगित्यतः ।
सूत्रादेताद्दशन्यासात्तद्वहत्यधिकारणात् ॥ ९२ ॥

प्राग्वत्सीरं वहत्यर्थे सैरिकं वाच्यलिङ्गकम् ।
ठका प्राग्वहतीयेन तेन दीव्यतिसूत्रतः ॥ ९३ ॥

सीरेण खनतीत्यर्थे सैरिकः कथितो नरः ।
एवं प्राग्वहतीयेषु युक्तेष्वर्थेषु चिन्त्यताम् ॥ ९४ ॥

तिरस्करिण्यां स्त्रीलिङ्गे प्रतिसीरा निगद्यते ।
वाग्वर्थस्य शुनस्योत्थे सीरेणादित्यवाचिना ॥ ९५ ॥

द्वन्द्वेऽत्र देवताद्वन्द्वे चेत्यानङि निरूपितौ ।
शुनासीरौ देवतास्येत्यर्थे छे यति च क्रमात् ॥
शुनासीरीयमपि च शुनासीर्यं द्विधा भवेत् । ९६ ॥

चीरन्तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च ।
रेखालेखनभेदेऽपि चीरी झिल्यां स्त्रियां मता ॥ ९७ ॥

भवेत्कृच्छ्राटिकायां च मीरस्तु जलधौ पुमान् ।
वाविन्धेः ॥ २-२८ ॥ वीध्रं तु विमले वाच्यलिङ्गकं परिकीर्तितम् ॥ ९८ ॥

अग्नौ वायौ च पुंसि स्यात्क्लीबं पूर्णेन्दुमण्डले ।
इन्धेश्च व्यपसर्गस्य सन्धितो दीर्घभागिदम् ॥ ९९ ॥

वृषिवपिभ्यां रन् ॥ २-२९ ॥ वर्ध्रं चर्मण्याद्युदात्तं रपरत्वाद्गुणे द्विरम् ।
एधत्यर्थाद्वृधेरेतदत्र सूत्रे रनि स्मृतम् ॥ १०० ॥

१. Pā. IV-i-96.
२. Pā. IV-i-114.
३. Pā. IV-iii-120.
४. Pā. IV-iii.124.
५. Pā. IV-iv-2.
६. Pā. I-i-31.

रज्ञावण्प्रत्यये तस्यै विकार इति सूत्रतः ।
वार्ध्री दीर्घादिका टिड्ढाणञित्याद्युक्तङीब्वशात् ॥
वध्रीति त्वेकरेफा स्याद्वक्ष्यमाणे वधेष्ट्रनि ।
ह्रस्वादिका वरत्रायां चैर्मणोऽञित्यञित्वतः ॥ १०२ ॥

विकृत्यर्थाच्चतुर्थ्यन्तात्तदर्थप्रकृतौ कृते ।
वध्र्या इदमिति ह्यर्थे वार्ध्रं चर्मेति चक्षते ॥ १०३ ॥

वप्रस्तु स्यात्तीरतातप्राकारक्षेत्रसेतुषु ।
स्कन्दे प्रजापतौ चापि प्रपातेऽपि च कथ्यते ॥१०४॥

ऋज्रेन्द्राग्रवज्र-
विप्रकुब्रचुब्रक्षुरखुर-
भद्रोग्रभेरभेलशुक्र-
शुक्लगौरवब्रेरा-
मालाः ॥ २-३० ॥

रन्नन्ता एकोनविंशतिः ॥

ऋज्रो नेतरि नेन्द्रस्तु वासवार्कवृषात्मसु ।
शब्दान्तरात्परस्त्वेष भवेदीश्वरवाचकः ॥ १०५ ॥

ईन्द्रियं तु यदिन्द्रस्य लिङ्गं तत्र निगद्यते ।
इन्द्रेणैवं दृष्टसृष्टजुष्टोदत्तादिकेष्वपि ॥ १०६ ॥

महेन्द्रो देवतास्येति त्वर्थे घाण्छे क्रमादिह ।
शब्दास्त्रयोऽमी महेन्द्राद्घाणौ चेत्यनुशासनात् ॥१०७॥

महेन्द्रीयं च माहेन्द्रं महेन्द्रियमिति स्मृताः ।
ग्रन्थेऽधिकृत्य स्यादिन्द्रजननीयं कृते छतः ॥ १०८ ॥

सूत्राच्छिशुन्क्रदयमसंभद्रन्द्रेति दर्शितात् ।
उपेन्द्रः पुंसि विबुधैर्नारायण इति स्मृतः ॥ १०९ ॥

उपेन्द्रदत्त इत्यतो मनुष्यनामतो यदा ।
क उच्यतेऽनुशंसितान्नयेन तद्युतादपि ॥ ११० ॥

१. Pā. IV-iii-134.
२. Pā. V-i-15.
३. Pa. V-ii-93.
४. Pā. IV-ii-29.
५. Pā. IV-iii-87.
६. Pā. IV-iii-88.

ठजेकदा च बैह्वचो मनुष्यनाम्न इत्यतः ।
तथैव घन्निलज्द्वयं भवेदिहास्य सूत्रतः ॥ १११ ॥

प्राचामुपादेरित्यस्मादपि स्यातामडज्बुचौ ।
ठाजादावूर्ध्वमित्युक्त्या द्वितीयादूर्ध्वलोपतः ॥ ११२ ॥

उपेन्द्रदत्तकोपिकोपिलोपियोवडोपकाः[?] ।
षडीरिता बुधैरिवाधिकारपूर्वदर्शिताः ॥ ११३ ॥

अग्रं पुरस्तादुपरि परिमाणे पलस्य च ।
आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम् ॥११४॥

अधिके च प्रधाने च प्रथमे चाभिधेयवत् ।
शैशिकेषु डिमन्यस्माज्जातादिष्वग्रिमं त्रिषु ॥ ११५ ॥

अग्रे साधु यदग्र्यं तत्प्राग्घितीये यति स्मृतम् ।
अग्र्यमग्रमिवेत्यर्थे शार्खादिभ्यो य इत्यतः ॥ ११६ ॥

अग्र्यमग्र्यमग्रीयमित्यग्रभववाचिनः ।
छान्दसाः स्युस्त्रयोग्रीयद्घ्यच्छा चेति तथा स्मृतेः ॥११७॥

अधिकृत्य भवे छन्दसीति खल्विदमुच्यते ।
कुशाग्राच्छ इतीवार्थे कुशाग्रीयं विशेष्यवत् ॥ ११८ ॥

अग्रे हायनमस्या इत्यर्थे स्यादाग्रहायणी ।
प्रज्ञाद्यणा पूर्वपदात्संज्ञायामिति णत्वतः ॥ ११९ ॥

मासे सास्मिन् पौर्णमासीत्याग्रहाणि....[हायणिको मतः]।
ठक्प्रत्ययादाग्रहायण्यैश्वत्थाट्ठगिति स्मृतात् ॥ १२० ॥

१. Pā. V-iii-78.
२. Pā. V-iii-80.
३. Pā. V-iii-83.
४. Pā. V-iii-103.
५. Pā. IV-iv-116.
६. Pā. IV-iv-117.
७. Pā. IV-iv-110.
८. Pā. V-iii-105.
९. Pā. VIII-iv-3.
१०. Pā. IV-ii-21.
११. Pā. IV-iii-22.

देयर्णेत्यैाग्रहायण्यां प्रत्यये वुञि ठञ्यपि ।
आग्रहायणकं प्रोक्तमाग्रहायणिकं तथा ॥ १२१ ॥

अग्रेवणं वनस्याग्र इत्यर्थे परिकीर्तितम् ।
णत्वं भवेदत्र वनं पुरगामिश्रसूत्रतः ॥ १२२ ॥

सप्तम्यलुग्राजदन्तादिष्वेतस्य निपातनात् ।
नयतेः क्विपि णत्वोक्तेरग्रणीर्ग्रामणीरिव ॥ १२३ ॥

आद्यादित्वादग्रतः स्यादग्रशब्दात्ततसिर्यदि ।
पुरोऽग्रतोऽग्रेषु सर्तेरिति टेरग्रतस्सरः ॥ १२४ ॥

एदन्तताग्रशब्दस्य सूत्रेऽत्रैव निपात्यते ।
अग्रेसरोऽपि तेन स्याच्चिन्त्यस्त्वग्रसरः क्वचित् ॥१२५॥

अग्रे भोजं व्रजत्यग्रे भुङ्क्त्वा[भुक्त्वा] व्रजति वेति दिक् ।
क्त्वा णमुल् च विभाँषाग्रेप्रथमेत्यादिनात्र वा ॥१२६॥

वज्रं हीरकदम्भोलिवालुकामलकेषु च ।
वज्रा तु स्याद्वल्लूच्यां स्त्री विप्रः पुंसि द्विजे स्मृतः ॥

वज्रं वने च पुण्ये च चुन्नं तु वदने स्मृतम् ।
क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे ॥ १२८ ॥

खुरः पुमान् कोलदले शफे च परिकीर्तितः ।
खुरणा स्यात्खुरणसी नासिकान्तस्य वा नसि ॥१२९॥

बहुव्रीहेरिह खुँरखराभ्यां वेति वार्तिकात् ।
पक्षे त्वत्राङ्नसादेशाविति द्वैरूप्यसङ्गतिः ॥ १३० ॥

१. Pā. IV-iii-47.
२. Pā. VIII-iv-4.
३. Pā. III-ii-18.
४. Pā. III-iv-24.
५. Pā. VIII-iv-3.

भद्रं स्यान्मङ्गले हेम्नि मुस्तके करणान्तरे ।
भद्रो रुद्रे वृषे ताम्रचूडे मरुकदम्बके ॥ १३१ ॥

हस्तिजात्यन्तरे चैव वाच्यवच्छ्रेष्ठसाधुनोः ।
भद्रा मन्दाकिनी रास्नाकृष्णानन्तानकट्फले ॥ १३२ ॥

भद्रंकरणमित्युष्णभैद्रयोः करणे मुमि ।
भद्राकृतो डाचि मद्राकृतवन्मुण्डिते स्मृतः ॥ १३३ ॥

शूद्रायां क्षत्रजः शंभुश्चोग्रो घोरे त्वयं त्रिषु ।
उग्रं यथा तथा पश्यन्नुग्रंपश्यो दृशेः खशि ॥ १३४ ॥

भेरः स्यात्कातरे पुंसि भेरी स्याद्दुन्दुभौ स्त्रियाम् ।
भेलः प्लवे भीरुके च निर्बुद्धिमलि[मुनि]भेदयोः ॥१३५॥

शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् ।
शुक्रोऽस्य देवतेत्यर्थे स्याच्छुक्राद्धनि शुक्रियम् ॥१३६॥

योगान्तरे सिते शुक्रः क्लीबं रेतोऽक्षिरुच्छिदोः[रुग्भिदोः]।
शुद्धद्रव्येऽपि रजते कैश्चिदेतन्निगद्यते ॥ १३७ ॥

गौरः पीतेऽरुणे श्वेते विशुद्धे चाभिधेयवत् ।
गौरं तु विशदे पद्मकेसरे सितसर्षपे ॥ १३८ ॥

गौरश्शशिनि गौरी तु नग्नकन्योमयोर्मता ।
रोचनीरजनीपिङ्गाप्रियङ्गुवसुधासु च ॥ १३९ ॥

नदीभेदे च गौरी स्याद्गुरुणस्य च योषिति ।
षिद्गौरादिभ्यश्चसूत्रात् स्त्रीत्वे ङीषीह दर्शितः ॥१४०॥

१. Both the mss. omit भद्रं ... कट्फले. The verses have been inserted on the basis of lexicons.
२. Vā. VI-iii-70.
३. Pā. IV-ii-26.
४. Pā. IV-i-41.

वज्रस्त्रिषु विभक्तौ स्यादिरा भूवाक्सुराम्बुषु ।
इरावान् सागरस्तत्र भवे त्वैरावतः स्मृतः ॥ १४१ ॥

पृषोदरादिणत्वे स्यात्तस्मिन्नैरावणोऽपि च ।
इरावतो घनस्येयमित्यण्यैरावती तडित् ॥ १४२ ॥

ऐरावतं धन्व धन्वयोपधाद्वुञ् ततो यदि ।
स्यादैरावतकं धन्व क्लीबं भाष्यप्रयोगतः ॥ १४३ ॥

इरस्मादस्तु वज्राम्बावुग्रंपश्येति शासनात् ।
मालमुन्नतभूमीलापङ्क्तौ पुष्पादिदामनि ॥ १४४ ॥

मणिमाला त्वसौ हारे स्त्रीणां दन्तक्षतान्तरे ।
तूलभारेष्टकेषीकामालानामिति शासनात् ॥ १४५ ॥

पूर्वे सत्युत्तरपदाधिकारोक्तादुदाहृतम् ।
वुञ्[वुञि] प्रस्थपुरेत्यादेर्मालाप्रस्थक उच्यते ॥ १४६ ॥

तीव्रमत्युष्णकटुकनितान्तेष्वन्यवत्स्मृतम् ।
तीव्रा च कटुरोहिण्यां दूर्वायामपि दृश्यते ॥ १४७ ॥

जन्यवत्त्वेन दीर्घेण ठना बाहुलकादिह ।
निशातनार्थकतिजेस्तीव्रशब्दोऽवगम्यताम् ॥ १४८ ॥

समि कस उकन्॥२-३१॥ दुर्जनास्थिरयोर्मालाकारे संकसुकः स्मृतः ॥

पचिनश्योर्णुकन्कनुमौ च ॥ २-३२ ॥ पाकुकः पाचके द्रुक्यौ[?]नश्वः व्योस्तु[नशेः कनुमि]नंशुकः ॥

भियः क्रुकन् ॥ २-३३ ॥ भीरुकस्तु प्रकथितः कातरे वाच्यलिङ्गकः ॥

क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि ॥ २-३४ ॥ क्वुन्नित्यत्र प्रकरणे प्रत्ययः शिल्पिसंज्ञयोः ॥ १५० ॥

१. Pā. IV-ii-121.
२. Pā. III-ii-37.
३. Pā. VI-iii-65.
४. Pā. IV-ii-122.

धातोरुपपदे सत्यप्यसत्यपि विधीयते ।
निर्णेजके शुके चापि रजकः परिकीर्तितः ॥ १५१ ॥

इक्षुखण्डनकर्ता तु शिल्पी स्यादिक्षुकुट्टकः ।
चरकः स्यान्मद्यपात्रे मद्यतत्पानयोरपि ॥ १५२ ॥
जनकः पितरि क्ष्मापे चषकः पानभाजने ।
शुनको भषकश्चेति कथ्येते द्वाविमौ शुनि ॥
यथोदाहरणं योज्या एवमन्येऽपि सूरिभिः ॥ १५३ ॥

रमे रश्च लो वा ॥२-३५॥ रमको लमकश्चेति ख्यातावेतौ विलासिनि ॥
जहातेर्ह्रें च ॥ २-३६ ॥ त्यागैकशीले जहकः काले च परिकीर्तितः ॥ १५४ ॥

ध्मो धमश्च ॥ २-३७ ॥ धमकः स्वर्णकारे च व्याधौ मृत्यौ च कथ्यते ॥
हनो वध च ॥ २-३८ ॥ वधको वाच्यवल्लिङ्गो मारके कथितो बुधैः ॥ १५५ ॥

बहुलमन्यत्रापि ॥ २-३९ ॥ पृथक्सूत्रस्य बहुलमन्यत्रापीति दर्शनात् ।
अन्यत्र शिल्पिसंज्ञाभ्यामपि क्वुन्नवधार्यते ॥ १५६ ॥

विस्मापके तु कुहकः कृतकश्छेत्तृवाचकः ।
एवमाद्या बुधैरन्येऽप्यूह्यास्तत्तत्प्रयोगतः ॥ १५७ ॥

कृषेर्वृद्धिश्चोदीचाम् ॥ २-४० ॥ कृषीवले कार्षकः स्यात्कृषकोऽप्यभिधेयवत् ।
यदा तु कृषकः फालवाची पुंसि तदा स्मृतः॥ १५८ ॥

उदकं च ॥ २-४१ ॥ प्रपञ्चार्थम् । केचिच्चकारं न पठन्ति ॥

उदकं सलिले क्लीबं क्वुन्प्रपञ्चोऽयमीरितः ।
उदन्शस्प्रभृतिष्वस्य पैद्वन्निति विकल्प्यते ॥ १५९ ॥

संज्ञायामुदमेघादिरुदकस्योदभावतः ।
क्षीरोदलवणोदादौ स्यादुत्तरपदस्य सः ॥ १६० ॥

१. Pā. VI-i-63. २ Pā. VI-iii-27.

उदपेषं पिनष्टीति णमुलन्ते पिषावपि ।
वासवाहनधिष्वेवमुदवासादयः स्मृताः ॥ १६१ ॥
अत्रोदधिर्घटाद्यर्थः संज्ञामर्णवे भवेत् ।
उदसुक[असंयुक्त]हलादौ तु पूरणीये विकल्पतः ॥१६२

अस्मिन् स्यादुदकुम्भश्चोदककुम्भ इति द्विधा ।
स्यात्संयुक्तहलादौ तूदकस्थालीति न द्विधा ॥ १६३ ॥

मन्थौदनसक्तुष्वपि बिन्दावपि वज्रभारहारेषु ।
अपि वीवधे च गाहे स्यादुदकस्योदभावो वा ॥१६४॥

तेनोदमन्थ उदकमन्थ इत्यादयः परे ।
गन्था[गाहा]न्तेष्विह शब्देषु शब्दा ऊह्या बुधैर्द्विधा ॥

उदकेन श्वयत्यस्मादुदश्वित्तक्रमुच्यते ।
क्विप्तुकौ श्वयतेरत्र यत्प्राप्तं संप्रसारणम् ॥ १६६ ॥

स्यादेतन्नोदश्वितोऽन्यतरस्यामिति सूत्रतः ।
निपातनादत्र सूत्रे ठका पक्षेऽप्यणा पुनः ॥ १६७ ॥

औदश्वित्कं भवेदौदश्वितमप्यत्र संस्कृतम् ।
सप्तम्यन्तात्प्रत्ययोऽयं संस्कारो लवणादिभिः ॥ १६८ ॥

यस्तु प्राग्वहतीयोऽस्ति संस्कृतार्थे ठगेष तु ।
तृतीयान्तात्तदापि स्यादौदश्वित्क इतीहनात् ॥ १६९ ॥

उदन्या तु पिपासायां क्यजन्तस्य निपातनात् ।
उदक्या त्वृतुमत्यां स्यादुदन्वानुदधौ स्मृतः ॥ १७० ॥

वृश्चिकृषोः किकन् ॥ २-४२ ॥

वृश्चिको राशिभेदेऽपि शूककीटे च कथ्यते ।
कृषिकः पुंसि फाले स्यात्कर्षके त्वभिधेयवत् ॥ १७१ ॥

१. Pā. VI-iii-58.
२. Pā. VI-iii-59.
३. Pā. VI-iii-60.
४. Pā. IV-ii-19.

प्राङि पणिकषः ॥ २-४३ ॥

आगन्तुके प्रापणिकः पण्यविक्रयणि त्रिषु ।
मालाकारे प्राकषिकः परदारोपजीविनि ॥ १७२ ॥

मुषेर्दीर्घश्च ॥ २-४४ ॥
स्यमेः संप्रसारणं च ॥ २-४५ ॥

आखौ ना मूषिकः प्रोक्तो मूषिकाजादिटाब्वशात् ॥
सीमिकस्तरुभेदेऽपि वल्मीकेऽपि च कथ्यते ॥ १७३ ॥

क्रिय इकन् ॥ २-४६ ॥

क्रेतरि क्रयिको वाच्यलिङ्गकः परिकीर्तितः ।

आङि पणिपनिपति-स्वनिभ्यश्च ॥ २-४७ ॥

वणिजः[वणिजि] स्यादापणिकोऽर्धरात्रेन्द्रनीलयोः॥१७४
स्तावकेऽप्यापनिक इत्युच्यते सूक्ष्मदर्शिभिः ।
श्येने च दैवायत्ते च कालेऽप्यापतिकः स्मृतः ॥१७५॥

श्यास्त्याहृञविभ्य इनच् ॥ २-४८ ॥

भवेदाखनिको व्याधौ वराहे मूषिकेऽपि च ॥
चत्वारो धातवः ॥
पाण्डरे पत्रिणि श्येनो घञैः सास्यां क्रियेति ञे ॥१७६॥
श्यैनंपातेति मृगयावाची स्त्रीलिङ्ग उच्यते ।
मुमि श्येनैतिलस्येति स्त्येनश्चोरे यकारवान् ॥ १७७ ॥
यकाररहितं धातुं वदद्भिर्माधवादिभिः ।
उक्तस्तदर्थ एवासौ सिद्धिश्चौरादिकादचि ॥ १७८ ॥
हरिणः पुंसि सारङ्गे विशदे त्वभिधेयवत् ।
हरिणी हरितायां च नारीभिद्वृत्तभेदयोः ॥ १७९ ॥
सुवर्णप्रतिमायां च शक्या पक्षिणि चाविनः ॥

वृजेः किच्च ॥ २-४९ ॥

वृजिनं कल्मषे क्लीबं क्लिन्ने[केशे] ना कुटिलेऽन्यवत् ॥

अजेरजि च ॥ २-५० ॥

न द्वयोश्चर्मणि बुधैरजिनं परिकीर्तितम् ॥

बहुलमन्यत्रापि ॥ २-५१ ॥

अत्रत्यसूत्राद्बहुलमन्यत्रापीति दर्शितात् ॥ १८१ ॥
ईदृक्प्रकाराः कठिनमलिनाद्याः प्रसाधिताः ।
तथा हि कठिनं क्रूरे स्तब्धे त्रिष्वथ न द्वयोः ॥

१. Pā. IV-ii-58. २. Pā. VI-iii-71.

स्थाल्यां कठिनिकायान्तु कठिनी कठिना सिता ।
मलिनं दूषिते कृष्णे ऋतुमत्यां च योषिति ॥ १८३ ॥
ज्योत्स्नातमिस्रवि[स्रेति] मलान्मत्वर्थीयो निरूपितः ।
नलिनी पद्मिनीपद्मव्योमसिन्धुसरोवरे ॥ १८४ ॥
नलिकायां च कथिता नलिनं कमले जले ।
कुण्डिनं नगरे क्लीबं कुण्डिनस्तापसे पुमान् ॥ १८५ ॥
दिनं तु दिवसे क्लीबं खण्डिते त्रिष्वितीह दिक् ॥

द्रुदक्षिभ्यामिनन् ॥ २-५२ ॥

द्रविणं न द्वयोर्द्वित्वे[योर्वित्ते] काञ्चने च पराक्रमे ॥ १८६
पक्षेण[दक्षिणः] सरलोदारपरच्छन्दानुवर्तिषु ।
वाच्यवद्दक्षिणा वाचि यज्ञदानप्रतिष्ठयोः ॥ १८७ ॥
व्यैवस्थायामसंज्ञायां या प्राप्ता गणपाठतः ।
स्याद्दक्षिणस्य सा सर्वनामसंज्ञापि वा जसि ॥ १८८ ॥
ङसिङ्योः स्मास्मिनौ चास्मात्परयोर्वा स्थितं हि तत् ।
दक्षिणार्हे दक्षिणीयदक्षिण्यौ छयतोस्त्रिषु ॥ १८९ ॥
भवेद्दक्षिणतोऽस्तातिविषयादतसुच्यतः ।
स्यादुत्तराधरेत्यादौ दक्षिणादिति चाव्ययम् ॥ १९० ॥
एनप्यस्मादपञ्चम्या दक्षिणेनेत्यदूरके ।
अपञ्चम्या एव कृते दक्षिणादाचि दक्षिणा ॥ १९१ ॥
दूरेऽस्माद्वनराद्याचो दक्षिणाहि च दक्षिणा ।
दाक्षिणात्यः शैषिके त्यक्त्वाजन्तात् त्रिष्वतो भवेत् ॥

१. Pā. V-ii-114.
२. Pā. I-i-34.
३. Pā. V-iii-34.
४. Pā. V-iii-35
५. Pā. V-iii-36.
६. Pā. V-iii-37.

वा तारभावकथनाद्दिक्शब्देभ्यः परस्य तीरस्य ।
दक्षिणतीरं दक्षिणतारमिति द्वैधमुच्यते रूपम् ॥१९३॥

समास इह दिङ्नामान्यन्तराल इति स्मृतेः ।
भवेद्दक्षिणपूर्वा स्त्री सर्वनामत्वमत्र वा ॥ १९४ ॥

अर्तेः किदिच्च ॥ २-५३ ॥ इरिणं तु स्मृतं शून्येऽप्यूषरेऽप्येतदुच्यते ॥

वेपितुह्योर्ह्रस्वश्च ॥ २-५४ ॥ विपिनं तु वने क्लीबं तुहिनं तिमिरे हिमे ॥ १९५ ॥

तलिपुलिभ्यां च ॥ २-५५ ॥ तलिनं विरले स्तोके स्यात्तुच्छे[स्यात्स्वच्छे]ऽप्यभिधेयवत् ।
पुलिनं तु बुधैः प्रोक्तं न द्वयोः सिकतोच्चये ॥ १९६ ॥

गर्वेरत उच्च ॥ २-५६ ॥ गुर्विण्यापन्नसत्त्वायां गौरादित्वेन ङीषिह ॥

रुहेश्च ॥ २-५७ ॥ रोहिणीति स्त्रियामुक्तश्शब्दो गोवाचको बुधैः ॥१९७॥

महेरिनण् च ॥ २-५८ ॥ माहिनो वाच्यवत्पूज्ये वाच्ये[राज्ये] तु स्यान्नपुंसकम् ।
इनण् चेति चकारेण महिनं चेति हीष्यते ॥ १९८ ॥

किब्वचिप्रच्छिश्रिस्रुद्रु-प्रुज्वां दीर्घोऽप्रसारणं च ॥ २-५९ ॥ वाग्वाण्यां व्याहृतार्थायां त्वस्यां स्याट्टकि वाचिकम् ।
प्रशंसायां भूम्नि वा स्याद्वाग्मी वाचो ग्मिनौ सिति ॥

वाचामपि[वाचालोऽपि]च वाचाटः कुत्सायां बहुभाषिणि।
वागेव वाचा यदि टाबस्माद्वागुरिदर्शने ॥ २०० ॥

लातेरस्मिन् कर्मणि के वाचालः स्यादकुत्सने ।
एकाचो नित्यमिति चेन्मयड्वाड्मय उच्यते ॥ २०१ ॥

त्वङ्मयाद्या एवमेव द्रष्टव्याः सूक्ष्मदर्शिभिः ।
मनुष्यनामतष्ठच्चेद्वागाशीर्दत्तशब्दतः ॥ २०२ ॥

१. Verses 193-198a are written in B after 213
२. Pā. II-ii-26.
३. Pā. V-ii-124.
४. Vā. IV-iii-144

एकाक्षरप्राक्पदानामुदक्पदविलोपतः ।
वाचिकोऽत्रानुकम्पायां नीतौ चेत्यत्र दर्शितः ॥ २०३ ॥

वाचोयुक्तिस्तु षष्ठ्याश्च वैाग्दिक्पश्यद्भ्य इत्यलुक् ।
वाचंयमो वाचियमो व्रत इत्युक्तखञ्वशात् ॥ २०४ ॥

निपातनादमन्तत्वं वाग्यमस्त्वव्रते भवेत् ।
वाच्यवत्पृच्छतेः प्राट् स्यात् च्छ्वोः शूँडिति शकारवान् ॥

एतत्पूर्वो विवाकस्तु नीत्यनीतिविचारके ।
श्रीर्वेषरचनाशोभाभारतीसरलद्रुमे ॥ २०६ ॥

लक्ष्मीत्रिवर्गसंपत्तिविधोपकरणेषु च ।
विभूतौ च मतौ च स्त्री श्रीलं तद्वति वाच्यवत् ॥२०७॥

श्लीलः कपिलकादित्वात् सेनायमुदीरितः[१] ।
खश्प्रत्यये त्वात्मर्मीने खश्चेत्यस्मिन् मनःकृते ॥ २०८ ॥

ईँच एकाचोऽम्प्रत्ययवच्चेत्यस्याप्रवर्तनाद्भाष्ये ।
ह्रस्वे सति श्रिमन्यं मुमोऽप्यभावेन वर्णयन्ति बुधाः ॥

माल्वे श्रीफलः पुंसि स्त्रस्तु स्याद्यज्ञसाधने ।
द्रूः सुवर्णे कामरूपिण्यपि विद्वद्भिरुच्यते ॥ २१० ॥

कटप्रूः कीटके घूके कामरूपिण्यपि स्मृतः ।
जूराकाशे सरस्वत्यां पिशाचे जवने स्त्रियाम् ॥ २११ ॥

आप्नोतेर्ह्रस्वश्च ॥२-६०॥ अप्शब्दस्तु पकारान्तः स्त्रियां भूम्नि जलार्थकः ।
एकाचो मयटा नित्यमब्विकारेऽम्मयं स्मृतम् ॥ २१२ ॥

१. Pā. V-iii-76.
२. Pā V-iii-77.
३. Vā. VI-iii-21.
४. Pā. III-ii-40.
५. Pā. VI-iv-19.
६. Pā. III-ii-83.
७. Pā. VI-iii-68.

आप्यं तु शैषिकाणान्तात्स्वार्थे प्यञि विदुर्बुधाः ।
समासे विमलापादावृक्पूःसूत्राददन्तता ॥ २१३ ॥

द्वीपान्तरीपे द्वे स्यातामन्तर्वारि स्थिते तटे ।
प्रतीपं प्रतिकूले स्यात्समीपं निकटे स्मृतम् ॥ २१४ ॥

ईकारस्य द्व्यन्तरुपसर्गेभ्योऽत इति स्मृतेः ।
द्वीपादनुसमुद्रं यञिति सूत्रेण शैषिके ॥ २१५ ॥

यञि द्वीपे भवं द्वैप्यं स्त्रियां द्वैप्या निगद्यते ।
यञश्चेति न ङीबस्मादपत्यग्रहणं कृतम् ॥ २१६ ॥

द्वीपो नौनुसमुद्रं यस्तस्मात्तुद्वैपमुच्यते ।
कर्च्छादिभ्यश्चेत्यणुक्तेर्मनुष्ये द्वैपिकः स्मृतः ॥ २१७ ॥

तत्स्थे च वुञ्विधानेन मनुष्येत्यादिसूत्रतः ।
अन्वीतमनुकूले स्यात्प्राग्वदीकारशासनात् ॥ २१८ ॥

प्रतीपं वर्ततेऽन्वीपं वर्तते चेति विग्रहे ।
द्वितीयान्ताद्वुका तत्प्रत्यनुपूर्वमिति स्मृतेः ॥ २१९ ॥

क्रियाविशेषणात्प्रातीपिकश्चान्वीपिकस्तथा ।
अवर्णान्तोपसर्गात्तु विकल्पेनेत्वशासनात् ॥ २२० ॥

प्रेपं प्रापं परेपं च परापमिति चेह दिक् ।
ऊदनोर्देश इत्येवमूकारस्य विधानतः ॥ २२१ ॥

जलप्रायप्रदेशे स्यादनूपं वाच्यलिङ्गकम् ।
अदेशत्वेन नान्वीपे स्यादूत्वं प्राङ्निरूपिते ॥ २२२ ॥

१. Pā. V-iv-74.
२. Pā. VI-iii-97.
३. Pā. IV-iii-10.
४. Pā. IV-i-16.
५. Pā. IV-i-13.
६. Pā. IV-ii-133.
७. Pā. IV-ii-134.
८. Pā. IV-iv-28.
९. Pā. VI-iii-98.

अपो नपादित्यपांनपादित्यपि च देवते ।
अपोनप्त्रीयमित्येतदपांनप्त्रीयमित्यपि । ॥ २२३ ॥
आभ्यां क्रमादपोनप्त्रपांनप्तृभ्यां घ इत्यतः ।
घनं[घे सं]नियोगशिष्टोक्तरूपाभ्यां देवतायके[तार्थके] ॥
उत्पत्तिरप्सु यस्यासावप्सुयोनिरुदाहृतः ।
अप्सव्यस्त्रिष्वप्सु भवे मन्त्रभेदेऽप्सुमान् स्मृतः ॥२२५
अप्सुयोन्याद्यैपोयोनियन्मतुष्य[तुष्वि]त्यलुग्विधेः ॥

परौ व्रजेः षश्च पदान्ते ॥ २-६१ ॥

क्विब्दीर्घयोः प्रकृतयोः षः पदान्ते परौ व्रजेः ॥ २२६ ॥
परित्यज्य व्रजन् सर्वं परिव्राट् तेन मस्करी ।
अपदान्ते तु जान्तोऽयमिति ज्ञातो हि धातुतः ॥२२७

हुवः श्लुवच्च ॥ २-६२ ॥ जुहूर्यज्ञोपकरणे स्त्रियां विद्वद्भिरुच्यते ।

स्रुवः कः ॥ २-६३ ॥ स्रुवः पुंस्ययमप्युक्तस्तस्मिन्नेव विचक्षणैः ॥ २२८ ॥

चिक् च ॥ २-६४ ॥ स्त्रीलिङ्गः स्रुक् चकारान्तो होमाङ्गे च गतौ स्मृतः ।

तनोतेरनश्च वः ॥ २-६१ ॥

त्वक्शब्दस्तु स्त्रियां धीरैः प्रोक्तो भूरुहवल्कले ॥ २२९ ॥
इन्द्रियेऽसृग्धरायां च धान्याद्याच्छादिचर्मणि ।
हलदन्तात्तु सप्तम्यास्संज्ञायामलुगीरणात् ॥ २३० ॥
त्वचिसारः क्वचित्संज्ञा नेति त्वक्सार इत्यपि ।

ग्लानुदिभ्यां डौ ॥ २-६६ ॥

ग्लातेर्डौग्लौः स्त्रियां कद्रूः काले च परिकीर्तिता ॥२३१॥
ग्लावंमन्यः खशि सत्यावादेशेनमन्यतेरस्मिन् ।
ईच एकाचोऽम्प्रत्ययवच्चेत्यमि सति सुबम्यतिदेशे ॥
रायंमन्यादिकेऽप्येवं तत्तदादेशयोजनौ ।
नावा तार्ये तु नाव्यं स्यान्नौवयोधर्मसूत्रतः ॥ २३३ ॥

१. Pā. IV-ii-27.
२. Vā. VI iii-18.
३. Pā. VI-iii-9.
४. Pā. VI-iii-68.
५. Both the manuscripts here add **नावा तार्ये इत्यादि**
६. Pā. IV-iv-91.

वैान्तो यि प्रत्यय इति नावादेशोऽत्र शिष्यते ।
नावा तरति यस्तत्र नौ द्व्यचष्ठञ्निनाविकः ॥ २३४ ॥

स्त्रियां तु नाविका नात्र यदीकारः प्रवर्तते ।
द्विगोरतद्धितलुकि नौशब्दान्ताब्बजीरणात् [?] ॥२३५॥

द्वाभ्यां नौभ्यामागते द्विनावरूप्यं हि कथ्यते ।
द्विगोर्लुगिति[3] सूत्रेऽचीत्यपकर्षान्न रूप्यलुक् ॥ २३६॥

पञ्चनावप्रियेत्येवं स्यादुत्तरपदे द्विगौ ।
स्याद्द्विनावत्रिनावादौ समाहारद्विगावपि ॥ २३७ ॥

अर्धनावं तु नावार्धे स्यादर्धाच्चेति टञ्विधिः ।
पञ्चनौ पञ्चभिर्नौभिः श्रिते तद्धितलुग्वशात् ॥ २३८ ॥

स्यादेकवचनान्तोऽयंमुरःप्रभृतिषु श्रितः ।
बहुव्रीहेर्वा द्विबहुवचनान्तावतोऽत्र कप् ॥ २३९ ॥

च्विरव्ययम् ॥ २-६७ ॥ च्विरव्ययमितीहोक्तं नियमार्थगिरा मुनेः ।
एजन्तानामुणादीनां नाव्ययत्वं च्विमन्तरा ॥ २४० ॥

रातेर्डै ॥ २-६८ ॥ रैशब्दस्तु द्वयोर्वित्ते हलादावात्मभाक् पुपि ॥

गमेर्डो ॥ २-६९ ॥ गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः ॥ २४१ ॥

स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि ।
स्वस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु ॥ २४२ ॥

सर्वत्र गोरजादीनां प्रसङ्गे यद्विधीयते ।
तेन स्यात्तदपत्यादि गव्यं यच्च गवे हितम् ॥ २४३ ॥

गोर्विकारश्च गव्यं तत् तत्तदर्थे यदुक्तितः ।
वैान्तो यि प्रत्यय इति वान्तादेशो विचिन्त्यताम् ॥

१. Pā. VI-i-79.
२. Pā. IV-iv-7.
३. Pā. IV-i-88.
४. Pā. V- iv-100.
५. Pā. V-iv-151.
६. Pā. VI-i-79.

पुरीषे गोमयं गोश्च[1] पुरीष इति शासनात् ।
गव्या गोत्रा गवां वृन्दे यत्रयोरनुशासनात् ॥ २४५ ॥

गौपुच्छिकस्तु तरति गोपुच्छेनेति ठञ्विधेः ।
गौपुच्छिकः प्राग्द्वितीये ठञौहीयार्थवाच्यपि ॥ २४६ ॥

असङ्ख्यापरिमाणाश्वादेर्गोर्यत्प्रत्ययस्मृतेः ।
संयोगोत्पादयोर्गव्यः[?] कथितो गोनिमित्तयोः ॥२४७॥

गोः प्रत्यर्पणपर्यन्तमागवीनः परार्थकृत् ।
भवेदनुगरीको[?] गौः पश्चात्पर्यागगन्तरि ॥ २४८ ॥

कप्रत्ययान्ते स्थाधातौ गोष्ठं गोस्थानके स्मृतम् ।
षत्वं त्वम्बाम्बगोभूमिसव्यापद्व्यादिसूत्रतः ॥ २४९ ॥

भूतपूर्वे[2] तु गोष्ठे स्याद्गोष्ठीनमिति खञ्वशात् ।
हैयङ्गवीनं संज्ञायां द्व्योगोदोहविकारके ॥ २५० ॥

तदाशितं गवीनं स्याद्गावो यत्र पुराशिताः ।
अँषडक्षेति सूत्रेण खप्रत्ययविधौ सति ॥ २५१ ॥

उपसर्जनगोशब्दान्तस्य ह्रस्वेन चित्रगुः ।
एवमेवोपगुस्तस्यापत्येऽप्यौपगवस्त्रिषु ॥ २५२ ॥

गोत्रेऽप्येवं युवापत्ये स्यादौपगविरिञ्वशात् ।
पञ्च गावः प्रिया यस्य स स्यात्पञ्चगवप्रियः ॥ २५३ ॥

टचो गोऽन्तात्तत्पुरुषादतद्धितलुकि स्मृतेः ।
द्वन्द्वतत्पुरुषौ नित्यौ यदुत्तरपदे स्मृतौ ॥ २५४ ॥

त्रिपदेऽस्मिन् तत्पुरुषो बहुव्रीहौ न पाक्षिकः ।
समाहारस्तु पञ्चानां गवां पञ्चगवं स्मृतम् ॥ २५५ ॥

१. Pā. IV-iii-145.
२. Pā. VII-iii-97.
३. Pā. V-ii-18.
४. Pā. V-ii-23.
५. Pā. V-iv-7.

द्विगवर्थे हि समाहार एकवत्वान्नपुंसकम् ।
क्रीते तु पञ्चभिर्गोभिः पञ्चभिर्वाच्यवद्भवेत् ॥ २५६ ॥

आर्हीयेऽस्य लुका नात्र समासान्तणिजाश्रयः ।
द्वन्द्वे दाराश्च गावश्चेत्यचि दारगवं स्मृतम् ॥ २५७ ॥

तिष्ठन्ति गावो यस्मिन् स कालः तिष्ठद्गु कथ्यते ।
आयान्ति गावो यस्मिन् स कालः स्यादायतीगवम् ॥

तिष्ठद्गुप्रभृतित्वेन[1] स्मृते क्लीबेऽव्यये इमे ।
आयते स्यादनुगवं क्लीबाव्ययमिदं तथा ॥ २५९ ॥

गोः पदान्तस्य सर्वत्रै[2] विभाषा गोरिति[3] यति ।
गोअग्रं प्रकृतित्वेन गोऽग्रं स्यात्पूर्वरूपतः ॥ २६० ॥

अँवङ्स्फोटायनस्येति[4] वाचि गोरवङादेशः ।
गवाग्रमपि तेन स्याद्विभाषेयं व्यवस्थिता ॥ २६१ ॥

गवाक्षशब्दे तेनावङ् नित्य एव प्रवर्तते ।
गवेन्द्र इति नित्योऽवङिन्द्रे चेति[5] विधानतः ॥२६२ ॥

गोविन्दश्शस्यसंज्ञायां उक्ते विन्दे गवादिषु ।
गोनर्द इति देशाख्या गोनर्दीयः पतञ्जलिः ॥ २६३ ॥

एङ् प्राचां देशे[6] इत्यत्र वृद्धत्वाच्छः प्रवर्तते ।
गावश्चाश्वाश्च मिलिता गवाश्वमिति कथ्यते ॥ २६४ ॥

गोअश्वा अपि गोऽश्वाश्च यदा नावङ् भवेत्तदा ।
आवादेशे तु गोर्यूतौ परिमाणेऽध्वनः कृते ॥ २६५ ॥

द्वाभ्यां धनुःसहस्राभ्यां गव्यूतिः पुंसि च स्त्रियाम् ।
मत्वर्थ एँकगोपूर्वाद्ठञ्नित्यमिति सूत्रतः ॥ २६६ ॥

१. Pā. II-i-17.
२. Pā. VI-i-122.
३. Pā. VI-i-123.
४. Pā. VI-i-124.
५. Pā. I-i-75.
६. Pā. V-ii-118.

उक्तस्तद्वति धीरैर्गोशतिको गोसहस्रिकः ।
गां मन्य इच[1] एकाचोऽमित्यमौतोंशसोरिति[2] ॥ २६७॥

धमि[?] द्युतेर्बाहुलकात् द्यौः स्त्री स्वर्गान्तरिक्षयोः ।
द्यांमन्योऽपि च गांमन्य इव खश्यम्विधानतः॥ २६८ ॥

भ्रमेश्च डुः ॥ २-७० ॥ भ्रुवोः स्त्रीत्वे लोचनोर्ध्वतिर्यक्प्रसृतरेखयोः ।
धातूत्तरचकारेण त्वग्रगूवग्रगामिनी ॥ २६९ ॥

उवङ्वेतदुवर्णस्य धातोनवयवो[?] नयत् ।
दब्शस्भ्रूप्रतिपदग्रहणात्तद्विधौ[?] भवेत् ॥ २७० ॥

अस्ति किपि गवादीनामूकारोऽङ्गाधिकारजः ।
तथा निर्वर्तिते त्वस्मिन् स्यादेवोवङ्वारितः ॥ २७१ ॥

किबाङ्वानुपपदाद्भमेश्चेदिति चिन्तनम् ।
ङ्प्रत्ययश्चेदुवङा न बाध इति वार्णयण् ॥ २७२ ॥

अक्षिभ्रुवं समाहारे च तदेत्या[हारेऽचतुरेर्यो]दिसूत्रतः
ह्रस्वोऽयमुत्तरपद इकोऽह्रस्वोऽङ्य इत्यतः ॥ २७३ ॥

नान्यथायमियङुवँङ् भाविनां च भवेदसौ ।
तस्मान्न श्रमदो ह्रस्वो भ्रूभङ्गेऽपि प्रवर्तते ॥ २७४ ॥

भ्रूकुंसश्च भ्रुकुंसश्च पुंसि स्त्रीवेषधारिणि ।
आकारविधिपक्षेऽस्मिन्नभ्रुकुंसादिर्वार्तिके[6] ॥ २७५ ॥

विद्वद्भिरुक्त एवार्थो भ्रकुंस इति दर्शितः ।
भ्रूकौटिल्ये भ्रूकुटिश्च भ्रुकुटिभ्रकुटिस्तथा ॥ २७६ ॥

१. Pā. VI-iii-68.
२. Pā. VI-i-93.
३. Pā. V-iv-77.
४. Pā.VI-iii-61.
५. Vā. VI-iii-61.
६. Vā. VI-iii-61.

वार्तिकस्यादिशब्देन संगृहीता मनीषिभिः ।
सुभ्रूशब्दादिषु क्विप्चेदप्यङ्गाद्यूविधानतः ॥ २७७ ॥
धातुसंयोगपूर्वत्वाद्दोः सुपिर्न प्रवर्तते ।
न कर्तव्यस्तथा चोवङ्सूत्रे भ्रूशब्दसंग्रहः ॥ २७८ ॥
आगूः स्त्रियां प्रतिज्ञायामग्रगूवदिहोच्यते ॥

दमेर्दोसिः ॥ २-७१ ॥ भुजे बुधैः प्रकथितो दोः पुंसि च नपुंसके ॥ २७९ ॥
दोषन्नादेश एतस्य शसादिषु विकल्प्यते ।
दोषा तरति यस्सोयं तरतीति ठको विधेः ॥ २८० ॥
औपसंख्यानिके ठस्य कादेशे दौष्क उच्यते ॥

पणेरिज्यादेश्च वः ॥ २-७२ ॥ वणिक्करणभेदेऽपि वणिज्या वैश्ययोरपि ॥ २८१ ॥
प्रज्ञाद्यणि भवेदस्माद्वाणिजो वैश्यवाचकः ।
वाणिज्यं च वणिज्या च वणिजो भावकर्मणोः ॥२८२॥

वशः कित् ॥ २-७३ ॥ उशिग्वीरणमूलेऽपि घृतेऽप्यग्नावपीष्यते ॥

भृञि उच्च ॥ २-७४ ॥ भुरिग्वसुन्धरायां स्त्री पुंसि राजनि कथ्यते ॥ २८३ ॥

जसिसहोरुरिन् ॥ २-७५ ॥ जसुरिस्तु स्त्रियां श्रान्तौ क्षुधिते त्रिषु ना तमौ ।
सहुरिस्सहने सूर्ये स्वदिव्वामनडुद्यपि[?] ॥ २८४ ॥

सुयुरुवृञो युच् ॥ २-७६ ॥ सवनं यजने स्नाने सोमनिर्दलनेऽपि च ।
कालचन्द्रमसोः पुंसि तुरुष्के यवनः पुमान् ॥२८५॥
यवनानां लिपिर्या सा यवनानी निगद्यते ।
[रैवणः शब्दने प्रोक्तं रवणः कोकिलेऽपि च ॥
वरणस्तिक्तशाकेऽपि प्रकारे वरणं वृतौ ॥]

अशो रश्च ॥ २-७७ ॥ काञ्चीयूपपरिव्याणरज्जुजिह्वाश्वबन्धनीः ॥ २८७ ॥
आहायं रशनाशब्दो व्याप्तिभुज्यर्थकाशिजः ।
वक्ष्यमाणात्तु बहुलमन्यत्रापीति सूत्रतः ॥ २८८ ॥

1. This and the next line are missing in the mss. They have been inserted on the basis of other works.

स्यात्काञ्चिजिह्वयोश्शब्दास्वादनार्थरसे रसौ ।
तथा च काञ्चीजिह्वार्थो दन्त्यतालव्यभेदतः ॥ २८९ ॥

द्वेधापि रशनाशब्दः साधितोऽत्र मनीषिभिः ॥

उन्देर्नलोपश्च ॥२-७८॥ ओदनं न स्त्रियां भक्ते बलायामोदने स्त्रियाम् ॥२९०॥

नियतं[नियुक्तं] दीयतेऽस्मै तदित्यौदनिकमुच्यते ।
यतः प्राग्वहतीयेषु श्रौणामांसौदनाट्ठिठन् ॥ २९१ ॥

ठिड्ढाणञित्यादिङीपि पित्त्वादौदनिकी स्त्रियाम् ।
संभूतविगृहीतार्थो मांसौदनपरिग्रहः ॥ २९२ ॥

तथा च मांसौदनिकः स्यान्मांसौदनिकी स्त्रियाम् ।
एवं मांसिकमांसिक्यौ विज्ञेये मांसशब्दतः ॥ २९३ ॥

गमेर्गश्च ॥ २-७९ ॥ गगनं तु बुधैरुक्तं न द्वयोस्सुरवर्त्मनि ॥

बहुलमन्यत्रापि सूत्रं बहुलमन्यत्रापीत्युक्तं येन तद्बशात् ॥ २९४ ॥

॥ २-८० ॥ स्यन्दनं रोचन इति प्रमुखाः केऽपि साधिताः ।
स्यन्दनं तु स्रुतौ नीरे तिनिशे नारयेऽस्त्रियाम् ॥२९५॥

रोचना रक्तकल्हारे गोपित्तवरयोषितोः ।
रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचने त्रिषु ॥ २९६ ॥

चन्दनं स्यान्मलयजे भद्रकाल्यां च न द्वयोः ।
चन्दनः कपिभेदे स्यान्नदीभेदेऽपि चन्दनी ॥ २९७ ॥

आसनं क्षिपणे क्लीबं पुंसि स्याज्जीवकद्रुमे ।
राजातनः क्षीरिकायां प्रियालौ किंशुकेऽपि च ॥२९८॥

अत सातत्यगमन इत्यतो राजपूर्वकात् ।
युचि राजातनस्सिद्ध इत्थमेवान्यदूह्यताम् ॥ २९९ ॥

१. Pā. IV-iv-67. २. Pā. IV-i-15.

रञ्जेः क्युन् ॥२-८१॥

रागे कुसुम्भादिभवे रजनं परिकीर्त्यते ।
रजनी नीलिकारासाहरिद्रायामिनीषु च ॥ ३०० ॥

क्युन्प्रत्यये बाहुलकाल्लत्वाभावे च कल्पते ।
सिद्धः कृपणशब्दोऽयमतिशोच्ये च लोभिनि ॥ ३०१ ॥

भूसूधूभ्रस्जिभ्यः छन्दसि ॥ २-८२ ॥

चत्वारो धातवः ॥

भुवनं विष्टपेऽपि स्यात्सलिले गगने बिले ।
सुवनः स्यात्पुंसि सोमे सूर्याचन्द्रमसोरपि ॥ ३०२ ॥

क्लीबे पुंसुवनं गर्भसंस्कारे परिकीर्तितम् ।
धुवनस्तु स्मृतो वह्नौ धूपेऽपि परिकीर्तितः ॥ ३०३ ॥

उक्तं निधुवनं क्लीबे ग्राम्यधर्मे विचक्षणैः ।
भृज्जनं स्यादम्बरीषे छान्दसा भुवकादयः ॥ ३०४ ॥

बहुलोक्त्या क्वचिल्लोकेऽप्यमीषामस्ति संभवः ॥

कृपृवृजिमन्दिनि-धाञ्भ्यः क्युः ॥२-८३॥

निपूर्वो दधातिः । तथा च पञ्च धातवः ॥

मयूखे किरणः पुंसि पूरणः सागरे पुमान् ॥ ३०५ ॥

वृजिनं स्यादन्तरिक्षे मन्दनं न द्वयोः स्तुतौ ।
गतौ तु मन्दना नाशे कुले तु निधनं स्मृतम् ॥३०६॥

धृषेर्धिष च संज्ञायाम् ॥ २-८४ ॥

धिषणो गीष्पतौ पुंसि गौर्यो बुद्धावपि स्त्रियाम् ॥

वर्तमाने पृषद्बृहन् महज्जगच्छतृवच्च ॥ २-८५ ॥

चत्वार शब्दा अतिप्रत्ययान्ता निपात्यन्ते ।
शतृवच्चैषां कार्यम् ॥

पृषन्मृगे स्यात्पुँल्लिङ्गो बिन्दुवाचि तु न द्वयोः ॥३०७॥

न श्वेतबिन्दुके वाच्यलिङ्गकः परिकीर्तितः ।
पृषोदरन्तु पृषत उदरे परिकीर्तितम् ॥ ३०८ ॥

बृहती क्षुद्रवार्ताक्यां कण्टकार्यां च वाचि च ।
वारिधान्यां महत्यां च छन्दोवसनभेदयोः ॥ ३०९ ॥

बृहत्प्रवृद्धे विबुधैः कथितं वाच्यलिङ्गकम् ।
विश्वावसोश्च वीणायां बृहती स्त्री निगद्यते ॥ ३१० ॥

बृहत्कः स्यात्तत्र बृहत्प्रकारो यो विभाव्यते ।
स्थूलादिभ्यः प्रकारार्थे कन्विधावस्य वार्तिकात्[1] ॥३११॥

आच्छादने बृहतिकेत्येव नित्यं कनो विधेः ।
महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम् ॥ ३१२ ॥

तत्त्वभेदे पुमान् श्रेष्ठे विकारेऽपि च वाच्यवत् ।
आत्समानाधिकरणे जातीये चास्य शिष्यते ॥ ३१३ ॥

महादेवादयस्तेन साधनीया विचक्षणैः ।
सन्महत्परमेत्येवं समानस्यानुशासनात्[2] ॥ ३१४ ॥

महाकुलादञ्खञावित्यञ्खञोर्वाचने सति ।
पूर्वसूत्रादन्यतरस्यामित्यस्यानुवर्तनात्[3] ॥ ३१५ ॥

माहाकुलो भवेन्माहाकुलीनश्च तथापरः ।
महाकुलीन एवं च रूपत्रयमिह स्मृतम् ॥ ३१६ ॥

महाजनाय हितमित्यर्थे वार्तिकचोदनात्[4] ।
महाजनात्तत्पुरुषात्स्यान्महाजनिकष्ठञि ॥ ३१७ ॥

चेत्स्यान्महाजनीयस्तु बहुव्रीहेर्महाजनात् ।
कर्मधारयजातीयदेशीये पुंवदुक्तितः ॥ ३१८ ॥

आत्वेन त्वत्र च महाजातीया स्त्री निगद्यते ।
घासे करे विशिष्टे च महस्यपरे[?] सति ॥ ३१९ ॥

१. Pā. V-iv-3.
२. Vā. V-iv-3.
३. Pā. II-i-61.
४. Pā. IV-i-141.
५. Vā. V-i-9.

स्याद्वैय्यधिकरण्येऽपि पुंवद्भावात्त्वयोर्विधिः ।
महाघासो महत्या वा महतो वा तृणे स्मृतः ॥ ३२० ॥
जगत् स्याद्विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु ।
जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च ॥ ३२१ ॥
शिष्टो द्युतिर्गमीति कौ जगदस्त्येतदर्थकः ।
न सर्वनामस्थाने स्यादनुषङ्गोऽस्य नापि ङीप् [स्यादस्य नुं नापि ङीप् स्त्रियाम्] ॥ ३२२ ॥

संश्वत्तृपद्वेहत् ॥२-८६॥

अत्रत्यस्य सूत्रस्य [स्य तु सूत्रोक्त]शतृवद्भावतो भवेत् ॥
चिनोतेः कुहके संश्वदिति संपूर्वकात्स्मृतः ॥ ३२३ ॥
श्वयतेः संश्वदित्येवमाह कश्चिदिह स्थितम् ।
तृपच्छत्रे चन्द्रमसि रूढस्तृप्यति यौगिकः ॥ ३२४ ॥
वेहद्भर्भोपघातिन्यां गवि व्युपपदाद्धनेः ।
जातेस्सरूपाद्धोहत्यो [गोवेहत्]वाय्वृतु[पोटायुवति]सूत्रतः

छन्दस्यसानच् शुजृभ्याम् ॥ २-८७ ॥

शवसानस्तु मार्गे ना गन्तरि स्यात् त्रिलिङ्गकः ॥
जरसानस्तु कथितः पुंलिङ्गः पुरुषे बुधैः ॥ ३२६ ॥

ऋञ्जिवृधिमन्दिसहिभ्यः कित् ॥ २-८८॥

ऋञ्जसानस्तु बलदे वृद्धसानस्तु पूरुषे ।
मन्दसानस्तु जीवाग्न्योः सहसानो यमे क्रतौ ॥ ३२७ ॥

अर्तेः गुणश्शुट् च ॥ २-८९ ॥

अर्शसानः कृशानौ ना हिंसितर्यप्ययं त्रिषु ॥

सम्यानच्स्तवः२-९०॥

संस्तवानस्तु कथितो महिषोद्भातृवाग्मिषु ॥ ३२८ ॥
मन्थानो मन्थदण्डेऽत्र बहुलोक्तेर्निगद्यते ।

युधिबुधिदृशिभ्यः किच्च ॥ २-९१ ॥

युधानी युद्धनिपुणे युजेः पाठे त्विहाश्रिते ॥ ३२९ ॥
युजानो द्विजसारथ्योर्बुधानः पण्डिते गुरौ ।
दृशानो ज्योतिरादित्यचन्द्रविप्रेषु कीर्तितः ॥ ३३० ॥

१. Vā. III-ii-178. २. Pā. II-i-65.

डुकृञ्स्तनोलुक् छलोपश्च्वि॥२-९२॥
तेर्द्वश्च ॥ २-९३ ॥

जुहुराणोऽग्निचन्द्राश्ववृषकौटिल्यकारिषु ।
शिश्विदान इति प्राहुः धार्मिके चाप्यधार्मिके ॥३३१॥

कृपेर्बाहुलकादस्मिन् लादेशेऽप्यकृते सति ।
खड्गार्थकः कृपाणोऽसौ प्राचोऽप्यच्छान्दसाविमौ ॥

तृस्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ॥ २-९४ ॥

शंस्ता कर्तरि शास्ता स्यादाद्युक्त्या शास्तिरत्र चित् ।
शास्ता समन्तभद्रे ना शासके पुनरन्यवत् ॥ ३३३ ॥

नास्य दीर्घस्सर्वनामस्थाने स्याच्छास्तराविति ।
प्रशास्तुस्तु प्रशास्तारावैसृन्नित्यत्र वर्णनात् ॥ ३३४ ॥

क्षत्ता शूद्रात् क्षत्रियाजे प्रतीहारे च सारथौ ।
भुजिष्यातनयेऽपि स्यान्नियुक्तेऽपि प्रजापतौ ॥ ३३५ ॥

वैश्यायां शूद्रजः क्षत्तेत्याहुः कोशेषु केषुचित् ।
याज्ञवल्क्यस्तु पूर्वोक्तमेवार्थं बहु मन्यते ॥ ३३६ ॥

आदिशब्देन चोद्गातृप्रतिहर्त्रादयो मताः ॥

बहुलमन्यत्रापि॥२-९५॥

प्रपञ्चार्थं बहुलमन्यत्रापीतीह सूत्रितम् ॥ ३३७ ॥

मन्ता हन्तेत्यादयोऽन्ये तदुदाहरणक्षमाः ॥

नप्तृनेष्टृत्वष्टृहोतृपोतृप्रशास्तृजामातृभ्रातृपतर्तेर्नञ्युपपदे करणेऽर्थे निपातितः ।

मातृपितृदुहितृ ॥ २-९६ ॥

पौत्रदौहित्रयोर्नप्ता तयोः पुत्रेऽपि विश्रुतः ॥ ३३८ ॥

ऋत्विग्भेदेऽपि नेष्टा स्यान्नयतेष्वग्गुणाविह ॥ ३३९ ॥

त्वष्टा प्रजापतौ देवशिल्पिन्यपि च शिल्पिनि ।
त्विषेर्दीप्त्यर्थकस्यात्वमप्तॄन्सूत्रे निपातनात् ॥ ३४० ॥

जुहोतेश्च पुनातेश्च प्रशास्तेरप्यनुक्रमात् ।
होतृपोतृप्रशास्तारो यागकान्तरवाचकाः ॥ ३४१ ॥

1. Pā. VI-iv-11.

सोदर्ये भ्रातृशब्दोऽयं भ्राजिधातोर्निपातितः ।
व्यत्यस्माद्भ्रातृपुत्रे स्याद् भ्रातृव्यो व्यनि शात्रवे ॥३४२॥

भ्रातुर्व्यच्चेति सूत्रे च छप्रत्ययविधानतः ।
भ्रातृव्य इत्यपि भ्रातृसुतार्थः कथितो बुधैः ॥ ३४३ ॥

वन्दिते भ्रातुरित्येवं समासान्तनिषेधतः ।
उक्ताः प्रशस्ता भ्राता च सुभ्राता चैवमादयः ॥ ३४४ ॥

अन्यत्र पूजनात् कप् चेत् स्युर्मुख्यभ्रातृकादयः ।
मातेर्मानार्थकादन्तर्भावित्य[र्भावित]ण्यर्थशालिनः ॥

जामातृशब्दो जायायां कर्मण्युपपदे कृतः ।
जामाता दुहितुः पत्यौ वल्लभेऽर्के सिते तिले ॥३४६॥

माता तु भुव्यकारादौ ब्राह्मघाद्यासु प्रसूमयोः ।
भ्रातर्यस्या मातुलः स्यादपि धुत्तूरपादपे ॥ ३४७ ॥

मातुलानी मातुली च द्वाविमौ मातुलस्त्रियाम् ।
संख्यासंभद्रपूर्वाया मातुरण्युत्वशासनात् ॥ ३४८ ॥

षाण्मातुरोऽपत्येऽस्याः सांमातुरो भाद्रमातुरः ।
शुभ्रादित्वाड्ढकि कृते वैमात्रेयो विमातृजे ॥ ३४९ ॥

पिता तु जनके पुंसि मातामहपितामहौ ।
मातापित्रोः क्रमात्तातेतयोर्मातरि तु क्रमात् ॥ ३५० ॥

मातामहिपितामह्यौ षित्वोक्तेर्ङीषि साधितौ ।
पितृव्यः पितृसोदर्ये भवेतां पितुरागते ॥ ३५१ ॥

पित्र्यं च पैतृकं चास्य देवता पित्र्यमुच्यते ।
वायव्यवद्यदत्रापि स्व्यपत्ये दुहिता स्त्रियाम् ॥ ३५२ ॥

१. Pā. IV-i-144.
२. Pā. V-iv-157.
३. Pā. IV-i 115.
४. Pā. IV-i-123.

दौहित्रो दुहितुः पुत्रे बिदाद्यैञि निगद्यते।
क्रमान्मानयतेः पातेर्दोग्धेरपि निपातितम् ॥ ३५३ ॥

मातादित्रितयं तत्रावयवार्थोऽपि योज्यताम् ।
अप्तृन्नित्यादिसूत्रे यन्नप्त्रादिग्रहणं कृतम् ॥ ३५४ ॥

तज्ज्ञापयति नोणादितृन्तृचोस्तत्र संग्रहः ।
यद्यप्युद्घातृशब्दोऽत्र शंसादीत्यादिशब्दनात् ॥ ३५५ ॥

साधनीयस्तथाप्यस्य भाष्योक्तेः दीर्घ इष्यते।
व्युत्पत्तिपक्षे नियमस्त्वव्युत्पत्तौ विधिर्यथा ॥ ३५६ ॥

स्यादित्येतत्कृते तत्र नप्त्रादिग्रहणं कृतम् ॥

स्वसुरसेः ऋन्॥ २-९७॥ "सुञ्यसेः ऋन्" इति केचित् ॥

स्वसृशब्दः स्त्रियामेष भगिन्यां परिकीर्तितः ॥ ३५७ ॥

स्वस्रीयो भागिनेयः स्यात् स्वसुश्छ इति सूत्रतः ।
मातापित्रोर्भगिन्योस्तु षष्ठाल्लुगलुकोः सतोः ॥ ३५८ ॥

कृते त्वलुकि षत्वस्य विकल्पेन प्रवर्तनात् ।
क्रमादेवं स्मृतौ मातृष्वसा अपि पितृष्वसा ॥ ३५९ ॥

मातुष्वसा चापि मातुःस्वसा स्याच्च पितुःस्वसा ।
पितुःस्वसा लुग्जुषोस्तु ढक्छणोरनयोः सुते ॥ ३६० ॥

मातृष्वसेयमातृष्वस्रीयावेवमेव निर्दिष्टौ ।
पैतृष्वसेयपैतृष्वस्रीयावप्यमू विबुधैः ॥ ३६१ ॥

यतेर्वृद्धिश्च॥ २-९८॥ भ्रातॄणां तु मिथो दारा यातरः परिकीर्तिताः ।
स्वदितास्वदितत्वाभ्यां वृद्धेर्मतविभेदतः ॥ ३६२ ॥

नञि च नन्देः॥२-९९॥ ननान्दा च ननन्दा च भगिन्यां पत्युरिष्यते ।
अत्र बाहुलकादेव नलोपो न नखो भवेत् ॥ ३६३ ॥

१. Pā. IV-i-104.
२. Pā. VI-iv-11.
३. Pā. IV-i-143.

न षैट्स्वस्रादिभ्य इति ङीब्धातोः[ङीप्टापोः]प्रतिषेधनात्।
स्त्रीत्वेऽप्युक्तेऽप्येषु शब्देष्वृन्नेभ्यो ङीब्न कल्पते ॥

दिवेर्श्नः ॥ २-१०० ॥ देवा तु देवरे पुंसि पण्डितैः परिकीर्तितः ॥

नयतेर्डिच्च ॥ २-१०१ ॥ पुरुषे ना पुंसि नारी स्त्री स्त्रियां परिकीर्तिता ॥ ३६५ ॥

ङीन्प्रत्ययान्नृनैरयोर्वृद्धिश्चेति प्रकीर्तितात् ।
नृशब्दात्तु नरंमन्यः मन्यतेः खश्यचो विधेः[श्ममोर्विधेः] ॥

सप्तम्येस्थः छन्दसि ॥ २-१०२ ॥ सप्तम्येष्ठा सारथौ रूपं देवृवत् षस्तु वार्तिकात्[२] ।
सप्तम्यलुक् तत्पुरुषे क्वेतीति हि परिस्फुटः ॥ ३६७ ॥
सप्तम्येष्ठ इत्याहुरा····मु[हुरन्येऽनु]पसर्गे कमाश्रिताः ॥

अर्तिसृधृधम्यवित्-भ्यो निः ॥ २-१०३ ॥ सृस्थाने शृ इति केचित् ॥

अरणिर्वह्निमन्थे ना द्वयोर्निर्मन्थदारुणि ॥ ३६८ ॥

सरतेश्च शृणातेश्च पाठभेदादिह स्थितात् ।
सरणिः शरणिश्च द्वे कथिते पङ्क्तिमार्गयोः ॥ ३६९ ॥

तालव्यादिस्तु हिंसार्थेऽप्यस्ति धात्वर्थसौष्ठवात् ।
विश्वंभरायां धरणिः धर्मेः सूत्रैकगोचरात् ॥ ३७० ॥

सिरायां धमनिर्हट्टविलासिन्यां च योषिति ।
सिद्धादिपाठतस्तद्वान् धर्मशीलः सदीर्घकः ॥ ३७१ ॥

अवनिर्गमने भूम्यामवनिः स्यादथाशनिः ।
स्त्रीपुंसयोश्चञ्चलायां दम्भोलावपि कथ्यते ॥ ३७२ ॥

तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम् ।

१. Pā. IV-i-10.
२. Pā. IV-i-5.
३. A gaṇasūtra under Pā. IV-i-73.
४. Vā. VIII-iii-97.
५. Pā. VI-iii-14.

कुमारी लताविशेषः ।
अत्र रञ्जेर्बाहुलकान्नलोपे प्रत्ययेऽप्यसौ ॥ ३७३ ॥
रजनी नलिनीरात्रिपरिव्राजिकासु[रात्रिहरिद्राजतुकासु]च॥

आक्तिशुषेः सनइछन्दसि ॥ २-१०४ ॥ शुचेरिति केचित् ॥
छान्दसो मारुते चम्वामाशुशुक्षणिरित्यसौ ॥ ३७४ ॥

कृषेरादेश्च चः ॥२-१०५॥ आदेश्च धः इति केचित् ॥
जने तु चर्षणिस्सोऽपि छान्दसो न तु लौकिकः ।
[कृषे]रादेश्च धः पाति[धं वक्ति] धर्षणिं वर्णयन्निह ॥

वृतेश्च ॥ २-१०६ ॥ वर्तनिस्त्वेकपद्यां स्त्री वर्त्मनिर्मुडुपस्थितौ ॥

क्षिपेः किच्च ॥२-१०७॥ क्षिपणिस्तु प्रकथितो बुधैरायुधवाचकः ॥ ३७६ ॥

अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः ॥ २- १०८ ॥ [सान्तोऽयम]र्चिरित्येतज्ज्वालाभासोः प्रकीर्तितात्[तम्]।
इदन्तोऽप्यर्चिरित्यस्ति णिजन्तादचि ङा[दच इः] कृते ॥
शोचिर्दीप्तौ शुद्धभावे पिङ्गलत्वे च कथ्यते ।
हविराज्ये च होतव्ये सर्पिः स्यान्न द्वयोर्घृते ॥ ३७८ ॥
छदिःशब्दः स्त्रियामेव पटले परिकीर्तितः ।
ईस्मन्त्रन्किषु चेत्यत्र च्छादेर्ह्रस्वो विधीयते ॥ ३७९ ॥
छदिर्हिते ढञ्विधानाच्छादिषेयं विशेष्यवत् ।
छर्दिस्तु वमनव्याधौ इदन्तोऽप्ययमर्चिवत् ॥ ३८० ॥

वृहेर्नलोपश्च ॥१-१०९॥ बर्हिस्तु ज्वलने पुंसि कुशे स्यादेष न स्त्रियाम् ।
अयं प्राचीनपूर्वस्तु पुंसीन्द्राग्न्योः प्रकीर्तितः ॥ ३८१ ॥

द्युतेरिसिञादेश्च जः ॥ २-११० ॥ ज्योतिः पुंस्यनलेऽर्के च क्लीबं तेजोभदृष्टिषु ।
ज्योत्स्ना स्यादेव कौमुद्यां मत्वर्थीये निपातिता ॥३८२॥

१. Pā. VI-iv-97.

ज्यौत्स्नी तु रात्रौ तुतदत्यां [तद्वत्यां] ज्योत्स्नाद्यणि निगद्यते
ज्योतिरायुष इत्यादिसूत्रतः षत्वशासनात् ॥ ३८३ ॥

ज्योतिष्टोमः सामसङ्घभेदे च ततकर्मणि ॥

वसौ रुचेः संज्ञायाम् ॥ २-१११ ॥

वसुरुच्योरिति केचित् ॥

वसुरोचिर्यज्ञभेदे रोचिस्तु बहुलोक्तितः ॥ ३८४ ॥

नपुंसकं प्रकाशेऽस्य वसुरुच्योरिति त्विह ।
पाठाद्वसिर्वसौ रोचिर्वक्त्रे द्वयमुदाहृतम् ॥ ३८५ ॥

भुवः किच्च ॥२-११२॥ भुविस्तु शिशिरे पुंसि समुद्रेऽपि प्रकीर्तितः ॥

सहो धश्च ॥२-११३॥ सधिर्वैधानरे धीरैर्वृषभेऽपि निगद्यते ॥ ३८६ ॥

पिबतेस्थुक्च॥२-११४॥ पाथिः सूर्ये च चन्द्रेऽब्धौ स्वर्गे चक्षुषि च स्मृतः ।

जनेरुसिः ॥ २-११५ ॥ जनुर्जन्मनि विद्वद्भिर्नपुंसकमुदाहृतम् ॥ ३८७ ॥

जनुषान्धस्तु जात्यन्धे तृतीयाया अलुम्वशात् ॥

मनेर्धश्छन्दसि ॥२-११६॥ मधुस्तु छान्दसं क्षौद्रे न द्वयोरभिधीयते ॥ ३८८ ॥

अर्तिपॄवपियजितनिधनितपिभ्यो नित् ॥२-११७॥ सप्त धातवः ॥

अरुर्व्रणे दिनकरे चन्द्रमस्यपि कथ्यते ।
अरुन्तुदो विध्वैरुषोस्तुद इत्युच्यते खशि ॥ ३८९ ॥

च्वावरूकृतमित्यादि सलोपेन निगद्यते ।
दिवाविभेत्यादिनास्मिन् कृञ्जेष्टे स्यादरुष्करः ॥ ३९० ॥

परुर्ग्रन्थौ वपुः काये शुभाकारेऽपि कथ्यते ।
यजुर्वेदे च वेदांशे समाहारे त्वृचोऽस्य च ॥ ३९१ ॥

१. Pā. VIII-iii-83.
२. Pā. III-ii-35.
३. Pā. III-ii-21.

भवेद्दृग्यजुषं द्वन्द्वे तनुः कायेऽथ न स्त्रियाम् ।
धनुश्चापे राशिभेदे सन्नकद्रौ [सल्लकद्रौ] तु पुंस्ययम् ॥

धनुर्धरे त्वसौ धीरैर्वाच्यलिङ्गः प्रकीर्तितः ।
अच्प्रत्ययेन धानुष्के धनुर्ग्रह इति ग्रहः ॥ ३९३ ॥

अनुत्तरपदस्थस्य समासे नित्यषोक्तितः ।
कुप्वोर्विसर्गस्य सिद्धावरुष्करधनुष्करौ ॥ ३९४ ॥

शार्ङ्गधन्वा पुष्पधन्वा बहुव्रीहावनङ्वशात् ।
शतधन्वा शतधनुर्वा संज्ञायामिति स्मृतेः ॥ ३९५ ॥

धनुषा जीवतीत्यर्थे धानुष्कष्ठनि कथ्यते ।
ननुः [तपुः] पुंसि भवेदग्नौ विरोधिनि च भास्करे ॥३९६॥

एतेर्णिच्च ॥ २-११८ ॥ जीवितस्य तु कालोऽयस्तत्रायुरभिधीयते ।
आयुर्यत्पुरुषस्यास्ति भवेत्तत्पुरुषायुषम् ॥ ३९७ ॥

द्व्यायुषं त्र्यायुषं चेति द्विगावुभयमीरितम् ।
सूत्रादैचतुरेत्यादेस्समासान्ताज्विधानतः ॥ ३९८ ॥

आयुष्टोमः स्मृतो ज्योतिरायुषस्तोम इत्यतः ॥

चक्षेः शिच्च ॥ २-११९ ॥ दृशि दृग्गोलके चैव चक्षुरित्यभिधीयते ॥ ३९९ ॥

च्वौ सत्यरुर्मनस्सूत्रादत्र चक्षूकृतादयः ।
चक्षुषे हितमित्यर्थे शरीरावयवाद्यति ॥ ४०० ॥

चक्षुष्यः केतकीपुण्डरीकवृक्षरसान्तरे ।
कुलित्थकासुभगयोः चक्षुष्योऽक्षिहितेऽन्यवत् ॥ ४०१ ॥

मुहेः किच्च ॥ २-१२० ॥ मुहुरित्यव्ययं ज्ञेयं अभीक्ष्णार्थाभिधायकम् ।

१. Pā. V-iv-113.
२. Pā. V-iv-77.
३. Pā. VIII-iii-83.
४. Pā. V-iv-51.
५. Pā. V-i-6.

यो विसर्गस्येदुदुपधस्य चाप्रत्ययस्यः[यस्य षः] ॥४०२॥

स कुप्वोः प्रतिषिद्धोऽस्य मुहुःकाम मुहुःप्रिय ॥

बहुलमन्यत्रापि ॥२-१२० ॥

आचक्षुरादिर्बहुलमन्यत्रापीत्युदाहृतिः ॥ ४०३ ॥

कृगृशृवृञ्चतिभ्यः ष्वरच् ॥ २-१२१ ॥

पञ्च धातवः । केचित्तु वृञः स्थाने पृधातुं पठन्ति ॥

कर्वरो रक्षसि व्याघ्रे शिलायां कर्वरी स्त्रियाम् ।
गर्वरः स्यादहङ्कारे सन्ध्यायां गर्वरी स्त्रियाम् ॥ ४०४ ॥

शर्वरी तु त्रियामायां कामिन्यामपि कथ्यते ।
शार्वरं त्वन्धतमसे घातुकेऽप्यणि शौषिके ॥ ४०५ ॥

वर्वरः पामरे केशविन्यासे नीवृदन्तरे ।
भङ्गिकायां पुमान् शाकभेदपुष्पभिदोः स्त्रियाम्॥४०६॥

पृपाठे देवजातौ च केशवक्रे च पर्वरः ।
स्त्रीलिङ्गः पर्वरीत्येष निम्नगायां निगद्यते ॥४०७ ॥

चत्वरं त्वङ्गणे क्लीबं स्थण्डिले ना चतुष्पथे ।
स्त्रीलिङ्गश्चत्वरीत्येष रथ्यायां परिकीर्तितः ॥

नौ सदेः ॥ २-१२२ ॥

निषद्वरः स्मरे पङ्के निशायां तु निषद्वरी ॥ ४०८ ॥

इति श्रीधरवंश्येन रचिते पेरुशाख्रिणा ।
द्वितीयपादः पूर्णोऽभूदौणादिकपदार्णवे ॥ ४०९ ॥

१. Pa. VIII-iii-41.

॥ श्रीः ॥

छित्वरच्छत्वरधीवर-पीवरमीवरचीवर-तीवरनीवरगह्वर-कट्वरसंयद्वराः ॥३-१॥

एकादश ष्वरच्प्रत्ययान्ता निपात्यन्ते। एकादशः संपद्वर इत्येके ॥

छित्वरं छेदनद्रव्ये धूर्ते वैरिणि च त्रिषु ।
छत्वरं कुब्जगृहयोः कैवर्ते धीवरः स्मृतः ॥ १ ॥

पीवरः कच्छपे स्थूले मीवरो हन्तृमानिनोः ।
भिक्षुकाणां प्रावरणे चीवरं स्यान्नपुंसकम् ॥ २ ॥

तीवरो ना जलनिधौ व्याधेऽपि परिकीर्तितः ।
स्यान्नीवरो वाणिजके वास्तवे जटिलेऽपि च ॥ ३ ॥

गह्वरस्तु गुहादम्भनिकुञ्जभवनेषु च ।
कट्वरं कुत्सिते वाच्यलिङ्गं तक्रे नपुंसकम् ॥ ४ ॥

संयद्वरः स्मृतोऽनूपे कैश्चिदुक्तो द्वितीयपः ।
उपह्वरं बाहुलकाज्जुह्वतेरुपपूर्वकात् ॥ ५ ॥

लोपे सत्यप्युकारस्य समीपैकान्तयोर्जगुः ।
ह्वरतेर्वाधिकरणे घे सिद्धमिति कथ्यते ॥ ६ ॥

इण्सिञ्जिदीङ्ष्य-विभ्यो नुक् ॥३-२॥

षड् धातवः ॥

इनः सूर्ये नृपे पत्यावात्मनीन्द्रे च कथ्यते।
सिनं शरीरे क्लीबं स्यात्काणे पुंसि सिनः स्मृतः ॥ ७ ॥

जिनः स्यादतिवृद्धे च बुद्धे चार्हति जित्वरे ।
दीना मूषिकयोषायां दुर्गते कातरेऽन्यवत् ॥ ८ ॥

उष्णो ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गवत् ।
ईषदुष्णे कदुष्णं च कवोष्णं कोष्णमित्यपि ॥ ९ ॥

रूपत्रयं कैवं चोष्ण इति सूत्रेण सिध्यति ।
उष्णासहे स्यादुष्णालु शीतौ सत्यभिधेयवत् ॥ १० ॥

शीतोष्णाभ्यां कारिणि कन्युष्णकः शीघ्रकारिणि ।
उष्णंकरणमित्युष्णभद्रयोः[3] करणे मुमि ॥ ११ ॥

रणोद्वेगे च हीने च बुधैरूनमुदाहृतम् ॥

फेनमीनौ ॥ ३-३ ॥ फेनः सारस्वतकफे फेनिलस्तद्वति त्रिषु ॥ १२ ॥

फेनादिलच्चेति चेन फेनलो लज्वशाद्भवेत् ।
मतुप्समुच्चयार्थान्यतरस्यामस्य वृत्तितः ॥ १३ ॥

फेनवानित्यपि भवेन्मीनो राश्यन्तरे झषे ।
ठकि प्राग्वहतीये स्यान्मैनिको मीनहन्तरि ॥
मीनस्यैकस्य पर्यायेष्विष्टत्वात्प्रत्ययो भवेत् ॥ १४ ॥

कृषेर्वर्णे ॥ ३-४ ॥ व्यासार्जुनाग्निहरिकोकिलकाकशूद्र-
तामिस्रपक्षकलिनीलगुणेषु कृष्णः ।
द्रव्ये त्रिषु द्रुपदजातटिनीकणा च
कृष्णाथ लोहमरिचे दुरितं च कृष्णम् ॥ १५ ॥

बन्धेर्ब्रधिबुधी च ॥३-५॥ ब्रध्नः सूर्ये द्विजे बुध्नो मूले स्वर्गे च शङ्करे ॥

धापृवस्यज्यतिभ्यो नः ॥ ३-६ ॥ धाना भृष्टयवे प्रोक्तो धान्याकेऽभिनवोद्भिदि ॥ १६

पर्ण तु छदने क्लीबं पुंलिङ्गः किंशुके स्मृतः ।
भारद्वाजे तु पर्णीयं पार्णमन्यत्र वाच्यवत् ॥ १७ ॥

वस्नः स्याद्वेतने मूल्ये वसनद्रव्ययोरपि ।
ठना वहत्यावहति हरतीत्यत्र वस्निकः ॥ १८ ॥

१. Pā. VI-iii-107.
२. Pā. V-iii-72.
३. Vā. VI-iii-70.
४. Pā. V-ii-99.
५. Pā. III-iv-3.

वस्नेन जीवतीत्यर्थे ठनि वस्निक उच्यते ।
बेनस्तु लुण्टके प्रोक्तो राजभेदे प्रजापतौ ॥ १९ ॥

अतः सूर्ये बाहुलकात्पङ्क्तौ श्रोणोऽपि लभ्यते ॥

लक्षेरट् च ॥ ३-७ ॥ लक्षेरट् चेति सूत्रेऽत्र व्याख्याभेदेन पण्डितैः ॥ २० ॥

लक्षणो लक्ष्मणश्चेति रूपद्वयमुहाहृतम् ।
लक्षणं नाम्नि चिह्ने च रामभ्रातरि लक्ष्मणः ॥ २१ ॥

लक्षणा हंसयोषायां सारस्यामपि कथ्यते ।
सेनान्तलक्षणेति ण्ये लाक्षण्योऽपत्यमस्य चेत् ॥ २२ ॥

इञ्प्रत्ययादुदीचामिञिति लाक्षणिरुच्यते ।
आश्वलक्षणिकस्त्वश्वलक्षणाध्येतृवेदिनोः ॥ २३ ॥

विद्यालक्षणकल्पान्ताद्वार्तिके ठञ्विधानतः ।
चिह्ननाम्नोः सलक्ष्मके सौमित्रौ सारसस्त्रियाम् ॥ २४ ॥

क्रमेण लक्ष्मणः क्लीबे त्रिषु पुंसि स्त्रियामपि ॥

वनेरिञोपधायाः ॥ ३-८ ॥
वेन्नाशब्दस्तरङ्गिण्यां स्त्रियां विद्वद्भिरुच्यते ॥ २५ ॥

सिवेर्ष्ट्यू च ॥ ३-९ ॥ स्यूना तु रशनायां स्त्री स्यूनः किरणसूर्ययोः ।
दीर्घोच्चरणसामर्थ्यान्न गुणस्यात्र संभवः ॥ २६ ॥

असन्नियोगशिष्टेन कृते बाहुलकादिह ।
ङ्ङ्वोः शूडित्यादिना छोठि स्योनोऽप्यर्थस्तु पूर्ववत्॥२७॥

कृवृजूसिद्रुपन्य-निस्वपिभ्यो नित् ॥ ३-१० ॥
कर्णः पृथाज्येष्ठसुते सुवर्णालौ श्रुतावपि ।
चतुरर्थ्यां वुञ्छणादि फिञा कार्णायनिः स्मृतः ॥ २८ ॥

कनि कर्णलॅलाटादित्यलङ्कारे तु कर्णिका ।
उपकर्णप्रायभवे त्रिषु स्यादौपकर्णिकम् ॥ २९ ॥

१. Pā. IV-i-152.
२. Pā. IV-i-153.
३. Vā. IV-ii-60.
४. Pā. VI-iv-19.
५. Pā. IV-iii-65.

अच्प्रत्यये सति स्तम्बेकर्णयोरिति सूत्रतः ।
जपेः कर्णेजपः कर्णोपपदात्कथितः खले ॥
कर्णमूले कर्णजाहमिति जाहचि कथ्यते ॥ ३० ॥

वर्णः स्वर्णकुथाकुनुतगुणशोभायशोलेपेषु [?] ।
गीतिक्रमे द्विजादौ शुक्लादौ चाक्षरे तु वर्णं वा ॥

स्यादिनिप्रत्यये त्वस्माद्वर्णीति ब्रह्मचारिणि ।
वार्तिकादिह चौन्येभ्योऽपि दृश्यत इति स्मृतात् ॥३२॥

वर्णवः सूपकारे स्यान्मत्वर्थीयवशासनात् ।
दुर्वर्णं रजते क्लीबं सुवर्णं काञ्चने स्मृतम् ॥ ३३ ॥

अवर्णस्तु परीवादे पुंसि धीरैर्निगद्यते ।
जर्णश्चन्द्रे द्रुमे वृद्धे स्त्रियां सेनाबले स्मृता ॥ ३४ ॥

सेनायां समवैत्यत्र ण्यठकोः सैन्यसैनिकाः ।
हरिषेणात्मजे हारिषेण्यः सेनान्तसूत्रतः ॥ ३५ ॥

हारिषेणिरुदीचामिञिति सूत्रान्तरादिञि ।
सेनाचरश्चरेर्भिक्षासेनादायेषु चेति टे ॥ ३६ ॥

द्रोणः कृपीपतौ काकभेदवृश्चिकयोश्च ना ।
अस्त्र्याढके तच्चतुष्के द्रोणी काष्ठाम्बुवाहिनी ॥ ३७ ॥

प्राग्वतीये ठञि द्रोणवाहे स्यात् द्रौणिकस्त्रिषु ।
अणठञोः स्यात्तत्पचति द्रोणादणिति
सूत्रतः [वार्तिकात्] ॥ ३८ ॥

द्रौणश्च द्रौणिकः स्त्रीत्वे द्रौणी च द्रौणिकी स्मृता ।
द्रोणपर्वतजीवन्तादिति सूत्रेण वा फकि ॥ ३९ ॥

१. Pā. III-ii-13.
२. Vā. V-ii-109.
३. Pā. IV-i-152.
४. Pā. IV-i.153.
५. Pā. III-ii-17.
६. Vā. v-i-52.
७. Pā. IV-i-103.

द्रौणायन इञा द्रौणिः द्रोणापत्येऽत्र कीर्तितौ ।
पन्नस्तु नीचैर्गमने संपन्नो वित्तशालिनि ॥ ४० ॥

पीडिते तु विपन्नः स्यात्प्रपन्नः शरणागते ।
आर्ते प्राप्तेऽपि चापन्नः स्यादुत्पन्नः समुद्भते ॥ ४१ ॥

डे पन्नगो मौ [?] सर्वत्र पन्नयोरिति वार्तिकात् ।
केचित्तु पद्यतेः क्तान्तं वार्त्तिके तत्र चक्षते ॥ ४२ ॥

स्याद्भक्तभुक्तयोरन्नमान्नोन्नं लब्धरीह णे ।
निपातनाद्ब्राह्मणकौष्णिक इत्यादिसूत्रतः ॥ ४३ ॥

अन्नशब्दस्योष्णभावे यवाग्वामुष्णिका कनि ।
स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान् ॥ ४४ ॥

धेट इट् च ॥ ३-११ ॥ धेनः समुद्रे नद्यां तु धेना क्वचन वाच्यपि ॥
तृषिशुषिरसिभ्यः कित् ॥ ३-१२ ॥ पिपासालिप्सयोस्तृष्णा शुष्णः सूर्याग्निरश्मिषु ॥ ४५ ॥

रश्मौ दण्डाश्वयोः पुंसि रस्नं द्रव्ये नपुंसकम् ॥
सुञो दीर्घश्च ॥३-१३॥ सूनं प्रकथितं धीरैरुच्छूने वाच्यलिङ्गकम् ॥ ४६ ॥

पुष्पे च प्रसवे क्लीबं सूना पुत्र्यां वधस्थले ॥
रमेस्त च ॥ ३-१४ ॥ रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम् ॥ ४७ ॥

एतत्पूर्वस्त्वक्षरान्तः शब्दः सिद्धौ प्रकीर्तितः ।
रास्नासास्नास्थूणा-वीणाः ॥ ३-१५ ॥ रास्ना तु स्याद्भुजङ्गाक्ष्यामेलापर्ण्यामपि स्त्रियाम् ॥ ४८ ॥

घटस्य वलयाकारमुखप्रान्तेऽपि कथ्यते ।
सास्ना धेनुगलोद्देशकम्बले कथिता बुधैः ॥ ४९ ॥

स्थूणायःप्रतिमायां च स्तम्भेऽपि वरवेश्मनाम् ।
स्त्रीलिङ्गे गृहपूर्वत्वे त्वेतदाहुर्नपुंसकम् ॥ ५० ॥

१. Vā. III-ii-48.
२. See the Kaumudi for an expression of a similar view under Pā. III-ii-48.
३. Pā. V-ii-71.

वीणा विद्युति बल्लक्यां प्रवीणः कुशले त्रिषु ।
वीणावादनशिल्पी यः तत्र स्याद्वैणिकस्त्रिषु ॥ ५१ ॥

त्रीह्यादित्वादिनावस्माद्वीणी वीणावतः स्मृतः ॥
गादाभ्यामिष्णुच् ॥ ३-१६ ॥ गेष्णुर्नटे गायके च देष्णुर्दातरि दुर्दमे ॥ ५२ ॥

कृत्यशूभ्यां स्नक् ॥ ३-१७ ॥ कृत्स्नं कुक्ष्यम्बुसर्वेषु भवेदक्ष्णमखण्डके ॥
तिजेर्दीर्घश्च ॥ ३-१८ ॥ तीक्ष्णं सामुद्रलवणविषलोहाजिमुष्ककै ॥ ५३ ॥

यवक्षारे [यवाग्रके] तु पुंस्येष तिग्मात्मत्यागिनोस्त्रिषु ॥
श्लिषेरच्चोपधायाः ॥ ३-१९ ॥ श्लक्ष्णं त्वकर्कशे सूक्ष्मे वाच्यवत्स्यान्निरन्तरे ॥ ५४ ॥

यजिमनिशुन्धिदसिजनिभ्यो युच् ॥ ३-२० ॥

पञ्च धातवः ॥

यज्युः शिष्टेऽपि चाध्वर्यौ मन्युर्दैन्ये क्रतौ क्रुधि ।
शुन्ध्युरभ्रौ च सलिले दस्युश्चोरे रिपावपि ॥ ५५ ॥

जन्युः प्रजापतौ प्राणिन्यपि स्याज्जातवेदसि ॥
भुजिमृङ्भ्यां युक्त्युकौ ३-२१ ॥ भुज्युस्तु भोजने सूर्ये मृत्युर्दैन्ये मृतौ यमे ॥ ५६ ॥

सर्तेरयुः ॥ ३-२२ ॥

अयूरिति पाठान्तरम् ॥

सरयुः सरयूश्च द्वे पाठभेदान्नदीभिदि ।
सारवः स्यादत्र भवे दाण्डिनायनसूत्रतः ॥ ५७ ॥

पानीवि[धी]षिभ्यः पः ॥ ३-२३ ॥

चत्वारो धातवः ॥

पापं तु किल्बिषे पापस्तद्वति स्यात्त्रिलिङ्गकः ।
समासे कुत्सितैरस्य पापनापितकादयः ॥ ५८ ॥

नेपः पुरोहिते नीपस्त्वत्र बाहुलकाद्व्रणे ।
अकृते सति बन्धूके नीलाशोके कदम्बके ॥ ५९ ॥

उक्तो वेपस्तु पानीये सेपः स्याद्बन्धसाधने ।
च्युतेः किच्च ॥ ३-२४ ॥ च्युपं तु वक्त्रवचनमाहुः क्लीबे विमर्शकाः ॥ ६० ॥

1. Pā. VI-iv-174.

स्तुवो दीर्घश्च ॥३-२५॥ स्तूपः पुंसि समुच्छ्राये विद्वद्भिः परिकीर्तितः ॥
सुशृभ्यां निच्च ॥३-२६॥ सूपो व्यञ्जनभेदे स्यात्सूपकारेऽपि कीर्तितः ॥ ६१ ॥

शृणातेः प्रत्यये चास्मिन्नुत्वे बाहुलकात्कृते ।
प्रस्फोटने शूर्पमस्त्री दन्त्यादिमपरे जगुः ॥ ६२ ॥

तदा तु धातुभेदे च दशपाद्यां विवेचितः ।
आर्हीयार्थेष्विह स्यातामञ्ठञ्भ्यां शौर्पशौर्पिके ॥ ६३ ॥

क्रीतं द्वाभ्यां तु शूर्पाभ्यां द्विशूर्पमनयोर्लुकि ।
अध्यर्धशूर्पमप्येवमर्हीयस्य द्विगोर्हि लुक् ॥ ६४॥ ॥

द्विशौर्पिकं द्विशूर्पेण क्रीतं ठञि लुगन्ततः ।
यद्यप्यस्मिन् प्रकरणे संख्यापूर्वपदस्थले ॥ ६५ ॥

तदन्तविधिरस्त्येव तथाप्यलुकि तेन नाञ् ।
सूत्रेण परिमाणान्तस्यासंज्ञा शाणयोरिति ॥ ६६ ॥

कृते ठञ्युत्तरपदवृद्धिरत्र द्विशौर्पिके ॥
कुयुभ्यां च ॥ ३-२७॥ कूपः कूपकगर्तान्धुमृन्मानगुणवृक्षके ॥ ६७ ॥

कौपीनं स्यादकार्ये च चीरप्रगुह्यदेशयोः ।
यज्ञस्तम्भे तु कथितो यूपशब्दः पुमानसौ ॥ ६८ ॥

खष्पशिल्पशष्पबाष्प-रूपपर्पतल्पाः ॥ ३-२८ ॥ सप्त शब्दाः ॥
खष्पः क्रोधे बलात्कारे खलीने तु नपुंसकम् ।
शिल्पमुद्योगनैपुण्ये शष्पस्तु प्रतिभाक्षये ॥ ६९ ॥

पुमान् बालतृणे त्वेष न द्वयोः परिकीर्तितः ।
ऊष्माश्रुणोः पुमान् बाष्पो रूपं स्यान्नाटके पशौ ॥७०॥

स्वभावेऽपि च सौन्दर्ये शुक्लादौ श्लोकशब्दयोः ।
आहतं वा प्रशस्तं वा रूपं यस्यास्ति तत्र तु ॥ ७१ ॥

१. Pā. VII-iii-17.

मत्वर्थीये यति भवेद्रूप्यमित्यभिधेयवत् ।
रूपधेयं भागरूपनामभ्यः स्वार्थधेयतः ॥ ७२ ॥

पर्पं गृहे पङ्क्तुपीठे भवेद्बालतृणेऽपि च ।
पर्पादिभ्यष्ठनि कृते स्यात्पङ्क्तौ पर्पिकस्त्रियु ॥ ७३ ॥

स्त्रियां तु पर्पिकी षित्वान्ङीषि विद्वद्भिरुच्यते ।
तल्पमट्टे च शय्यायां दारेष्वपि निगद्यते ॥ ७४ ॥

स्तनिहृषिपुषिगदि-मदिभ्यो णेरित्नुच् ॥ ३-२९ ॥

पञ्च धातवः ॥

स्तनयित्नुः पुमान् मेघे मृगे रोगे घनध्वनौ ।
हर्षयित्नुः सुते हेम्नि पोषयित्नुः पिके द्विजे ॥ ७५ ॥

गदयित्नुः पुमान् कामे जल्पाके कामुकेऽपि च ।
मदयित्नुर्मदे कामे पुमान्मद्ये नपुंसकम् ॥

कृहनिभ्यां क्त्नुः ॥ ३-३० ॥

क्त्नुः प्रत्ययः । किदयम् ॥

कृत्नुः शिल्पिनि हत्नुस्तु व्याधौ शस्त्रेऽपि कथ्यते ॥

गमेः सन्वच्च ॥३-३१॥

जिगत्नुस्तु प्रकथितो गतिशीले विशारदैः ॥ ७७ ॥

क्त्नोः कित्त्वादगुणः कृत्नौ न मलोपोऽन्ययोरपि ।
प्रत्यये दशपादीयास्तकारं न बभाषिरे ॥ ७८ ॥

तत्तल्लक्ष्यविरोधेन तदेतन्नाम नोदितम् ॥

दाभाभ्यां नुः ॥३-३२॥

दानुर्दातरि विक्रान्ते भानुः किरणसूर्ययोः ॥ ७९ ॥

सूर्यवह्न्योश्चित्रभानुः स्वर्भानुस्सिंहिकासुते ॥

वचेर्गश्च ॥ ३-३३ ॥

वावदूकार्थको वग्नुशब्दस्त्रियु निगद्यते ॥ ८० ॥

धेट इत् च ॥ ३-३४ ॥

सा गौर्धेनुरिति प्रोक्ता या भवेन्नवसूतिका ।
जातेः समासे गोधेनुः पोटायुवतिसूत्रतः ॥ ८१ ॥

१. Vā. V-iv-25. २. Pā. II-i-65.

उत्सौघञा धैनवं स्यादर्थे प्राग्दीव्यतीयके ।
वैष्कयास इति ह्यस्ति सूत्रमुत्सादिषु स्मृतम् ॥ ८२ ॥

तदन्तविधिरेष्वस्मादसे वचनतो भवेत् ।
धेन्वन्तादपि तेनाञ् स्याद्धेनुपाठेऽपि तद्गुणे ॥ ८३ ॥

तेन गौधेनवमपि भवेदाधेनवं तथा ।
अत्र ठग्भाव्यनञ् धेनुरुक्तो ह्यापिशलेर्मते ॥ ८४ ॥

तस्मात्पक्षे धैनुकं च गौधेनुकमपीष्यते ।
अचित्तैर्हस्तिधेनोष्ठगिति बृन्देऽपि धैनुकम् ॥ ८५ ॥

बन्धके या स्थिता धेनुः सा धेनुष्या निगद्यते ।
धेनुंभव्या स्मृता धेनोर्भव्यायामिति मुम्विधेः ॥ ८६ ॥

स्याद्धेन्वड्डुहं द्वन्द्वे समाहाराभिधायिनि ॥

सुवः किञ्च ॥३-३५॥

सूनुस्तु कथितः सूर्ये तनुजेऽप्यनुजेऽपि च ॥ ८७ ॥

जहातेर्डेऽन्तलोपश्च ॥ ३-३६ ॥

जह्नुः स्यात्पुंसि राजर्षिभेदे च मधुसूदने ।
अण्प्रत्ययेऽस्मात्कथितो गङ्गायां जाह्नवी स्त्रियाम् ॥८८॥

स्थो णुः ॥ ३-३७ ॥

स्थाणुः कीले पशुपतौ पुमानस्त्री ध्रुवे स्मृतः ॥

अजिवृरीभ्यो निच्च ॥ ३-३८ ॥

वेणुर्नृपान्तरे वंशे वर्णुर्देशे नदान्तरे ॥ ८९ ॥
रेणुः स्त्रीपुंसयोर्धूलौ पुमान् पर्याटके पुनः ॥

विषेः किच्च ॥ ३-३९ ॥

विष्णुर्नारायणे पुंसि सूर्ये च वसुदेवते ॥ ९० ॥

कृदाधारार्चिकलिभ्यः कः ॥ ३-४० ॥

षड्धातवः ॥

कर्को वह्नौ सिताश्वे च पुट[घट]भेदे च दर्पणे ।
इवार्थे त्वत्र कार्कीक ईकका कर्कलोहितात् ॥ ९१ ॥

१. Pā. IV-i-86.
२. Pā. IV-i-86.
३. Pā. IV-ii-48.
४. Vā. VI-iii-66.
५. Pā. V-iii-110.

दा····धायकं····[दाको दातरि धाकः] स्यादाधारे
वृषभेऽपि च ।
राका नद्यन्तरे प्रोक्ता नवजातरजःस्त्रियाम् ॥ ९२ ॥

संपूर्णेन्दुतिथौ चापि कच्छ्वामपि निगद्यते ।
अर्कोऽर्ककर्णे[पर्णे] स्फटिके रवौ ताम्रे दिवस्पतौ॥९३॥

कल्कोऽस्त्री घृततैलादिशेषे दम्भे विभीतके ।
विट्किट्टयोश्च पापे च त्रिषु पाशाशये पुनः ॥ ९४ ॥

लशैकतद्धित इति कस्येत्वं वा कथा तयोः[दाकधाकयोः] ।
राकायामपि केऽणैश्च नात्र बाहुलकाद्भवेत् ॥ ९५ ॥

उत्तरत्र यथायोगमेवमूह्यं विचक्षणैः ।
रमेर्बाहुलकादत्र रङ्कः कृपणमन्दयोः ॥ ९६ ॥

अस्मिन् कपिलैकादीनां वेति लत्वे विकल्पिते ।
लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च ॥ ९७ ॥

सृवृभूशुषिमुषिभ्यः क्ित् ॥ ३-४१ ॥

पञ्च धातवः ॥

सृकः सरणशीलेऽपि मारुते चोत्पले शरे ।
वृकस्तु श्वापदे काके भूकं तु छिद्रकालयोः ॥ ९८ ॥

शुष्कशब्दो नीरसेऽर्थे वाच्यवल्लिङ्ग उच्यते ।
मुष्को मोक्षकवृक्षे स्यात्संघाते वृषणेऽपि च ॥ ९९ ॥

मुष्करः स्यादूषसुषीत्यादौ मत्वर्थरस्मृतेः ॥

शुकवल्कोल्काः॥३-४२॥ शुको व्याससुते कीरे रावणस्य च मन्त्रिणि ॥ १०० ॥

शिरीषपादपे पुंसि ग्रन्थिपर्णे नपुंसकम् ।
शुकानां संहतौ शौकं खण्डिकौद्यञि कथ्यते ॥ १०१ ॥

१. Pā. I-iii-8.
२. Pā. VII-iv-13.
३. See the gaṇa under VI-i-112
४. Pā. V-ii-108.
५. Pā. IV-ii-45.

वल्कोऽस्त्री वल्कले शल्के स्यादुल्का तु विभावसौ ।
निर्गतज्वालकाष्ठे च ज्वालायामपि कथ्यते ॥ १०२ ॥

इण्भीकापाशल्यतिमर्चिभ्यः कन् ॥ ३-४३ ॥

सप्त धातवः ॥

एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा ।
साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते ॥ १०३ ॥

नित्यैकवचनान्तोऽयं संख्यावाची विनिश्चितः ।
असहायार्थकादस्मादाकिनिच् कन्लुकां विधेः ॥ १०४ ॥

एकाकी चैककश्चैक इति रूपत्रयं भवेत् ।
ऐकध्यमेकधा चैकाद्धो ध्यमुञ्वा स्मृतो यतः ॥ १०५ ॥

सकृदेकस्य कृत्वोऽर्थे सकृद्भावसुचोर्विधेः ।
द्विबह्वोर्विषये त्वेकाच्च प्राचामिति सूत्रतः ॥ १०६ ॥

डतरे डतमे चैकतरश्चैकतमोऽपि च ।
स्यादैकागारिकश्चोरे स्त्रियां टित्वेन ङीबिह ॥ १०७ ॥

एकादिश्चैकस्य चादुगिति नञ्प्रकृतित्वतः ।
सत्यादुगागमे चास्य भवेदेकान्नविंशतिः ॥ १०८ ॥

अनुनासिकपक्षोऽयमन्यत्रैकाद्नविंशतिः ।
तृतीयायाः समासोऽत्र ज्ञेयो यौगविभागिकः ॥१०९॥

पूर्वं नञा तत्पुरुषे तृतीयानुसमस्यते ।
एकनाथादयः पूर्वकालैकेति समासतः ॥ ११० ॥

आदित्यान्महतःसूत्रमध्ये योगविभागतः ।
निर्देशतो वा प्रागेकादशभ्य इति दर्शितात् ॥ १११ ॥

भवेदेकादशेत्यात्वं द्वन्द्वे तत्पुरुषेऽपि वा ।
तादर्थ्यादपि ताच्छब्द्ये य एकादश ते दश ॥ ११२ ॥

१. Pā. V-iii-44.
२. Pā. V-iii-94.
३. Pā. II-i-49.
४. Pā. VI-iii-46.
५. Pā. V-ii-118.

स्युर्दशैकादशाः ष्टनष्टच्[1]सूत्रेऽकारनिपातनात् ।
दशैकादशिको गर्ह्यान्य एतान्[2] संप्रयच्छति ॥ ११३ ॥
एकादशं सहस्रं वा शतमेकादशाधिकम् ।
खलल्लुभ्यां[खलुभ्यां च] क्रमेणैकधुरीणैकधुराविह ॥
वहन्नेकधुरं योऽस्ति तत्र स्यातामुभाविमौ ।
मत्वर्थ एकगोपूर्वाड्ड्यिन्[3]त्यमिति सूत्रतः ॥ ११५ ॥
तद्वत्युदीरितावैकशतिकैकसहस्रिकौ ।
पूर्वकालैक[4]सूत्रेण कर्मधारय एव सः ॥ ११६ ॥
अन्यत्रानभिधानान्न स्यादिनिर्वाप्यतः क्वचित् ।
सौत्रनिर्देशतो ह्येकदेशिनेति यदिष्यते ॥ ११७ ॥
सर्वैकान्येति सप्तम्याः काले दा चेदिहैकदा ।
सङ्ख्यै[5]कवचनाच्चेति वीप्सायामेकशः शसा ॥ ११८ ॥
वीप्सानुक्तौ शसाल्पार्थात् द्वित्वेनैककशः स्मृतम् ।
मण्डूके कातरे भेकः काको ना चिरजीविनि ॥११९॥
वृक्षभेदे पीठसर्पिण्यपि द्वीपान्तरेऽपि च ।
काका स्यात्काकनासायां काकोली काकजङ्घयोः ॥१२०॥
रक्तिकायां मलघ्वां च काकमाच्यां च योषिति ।
काकं सुरतबन्धे स्यात्काकनामपि संहतौ ॥ १२१ ॥
वेषधारे च दृष्टे च ज्येष्ठे च क्वचिदिष्यते ।
पाकः शिशौ परिणतौ स्थाल्यादौ पचनेऽपि च ॥१२२
केशस्य जरसा शौक्ल्ये विष्ठायामपि कथ्यते ।
शल्कं तु शकले वल्के पुंसि मुद्गरसूर्ययोः ॥ १२३ ॥
अत्कस्त्वासन्नपथिकशरीरावयवेषु ना ।
मर्कः शरीरवाय्वग्नौ नवनीतेषु चेतसि ॥ १२४ ॥

१. Pā. IV-iv-31.
२. Pā. IV-iv-30.
३. Pā. V-ii-118.
४. Pā. II-i-49.
५. Pā. V-iii-51.
६. Pā. V-iv-43.

श्यतेर्बाहुलकाच्छाकः पुमान् द्वीपे द्रुमे नृपे ।
शक्तौ हारीतकाख्ये तु न स्त्रियामयमुच्यते ॥ १२५ ॥

भवार्थे तु दिगादित्वादस्माद्यत्प्रत्यये कृते ।
बुद्धे शाक्यस्तत्र शाक्यसिंहशाक्यमुनी अपि ॥ १२६॥

स्त्रियां शाकीति कथिता शाके महति कोविदैः ।
तत्र शाकीपलालीति पामादिगणसूत्रतः ॥ १२७ ॥

मत्वर्थीये वाच्यलिङ्गः ह्रस्वतः शाकिनं स्मृतम् ॥

नौ ह्रः ॥ ३-४४ ॥ गोधिकायां तु विबुधैर्निहाका परिकीर्तिता ॥ १२८॥

नोसदेर्ङिच्च ॥ ३-४५ ॥ निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः ।
वक्षोऽलङ्करणे हेममात्रे हेमपलेऽपि च ॥ १२९ ॥

असमासे ठका प्रोक्तमार्हीयार्थेषु नैष्किकम् ।
समासे परिमाणान्तस्यासंज्ञाशाणयोरिति ॥ १३० ॥

ठञि स्यादुत्तरपदवृद्धौ परमनैष्किकम् ।
क्रीतं तुं पञ्चभिर्निष्कैः पञ्चनिष्कं ठञो लुकि ॥१३१॥

सूत्रेण वा द्वित्रिपूर्वान्निष्कादिति लुगीरणात् ।
द्विनैष्किकं द्विनिष्कं च त्रिनिष्कं च त्रिनैष्किकम् ॥

बहुपूर्वात्प्रवर्त्तव्यमिति वार्तिकदर्शनात् ।
बहुनैष्किकमप्यत्र बहुनिष्कं च कथ्यते ॥ १३३ ॥

स्यमेरीट् च ॥३-४६॥ स्यमेरिट् चेति ह्रस्वपाठो वा ॥

स्यमीका नीलिकायां स्त्री स्यमीको नाकुवृक्षयोः
स्यमेरिट्चेति सह्रस्वपाठे तु स्यमिकोऽप्यसौ ॥ १३४ ॥

अजियुधिनीभ्यो दीर्घश्च ॥ ३-४७ ॥ चत्वारो धातवः ॥

वीकः स्याद्वन्धवाहेऽपि पक्षिण्यक्षिमलेऽपि च ।
यूका केशकिमौ तद्वान् यूकालो लुकि[लचि] कथ्यते ॥

१. Pā. V-ii-100.
२. Pā. VII-iii-17.
३. Pā. V-i-30.
४. Vā. V-i-30.

सिध्मादिषु क्षुद्रजन्तूपतापाच्चेति सूत्रणात्[1]।
धूको वायौ कामिलायां धूकानीको द्रुमान्तरे॥ १३६ ॥

ह्रियो रश्च लो घा ॥ ३-४८ ॥

ह्रीका ह्रीकेति शब्दौ द्वावपि लज्जाभिधायिनौ।
आद्यः पुंसि चरौ ताते द्वितीयो नकुले पुमान्॥१३७॥

शकेरुनोन्तोऽन्त्युनयः ॥ ३-३९ ॥

चत्वारः प्रत्ययाः ॥

शकुनः पुंसि कथितः पक्षिभेदेऽपि पक्षिणि।
शुभशंसिनिमित्ते तु शकुनं स्यान्नपुंसकम् ॥ १३८ ॥

शकुन्तः कीटभेदेऽपि भासे पक्षिणि चोच्यते।
खगे शकुन्तिः शकुनिः करणे सौबले खगे ॥ १३९ ॥

पक्षिमत्स्यमृगान् हन्तीत्यत्र प्राग्वहतेष्ठकि[2]।
सपर्यायविशेषाणां ग्रहणात्तस्य हन्तरि ॥ १४० ॥

आद्यन्तयोः शाकुनिको मतः शाकुन्तिकोऽन्ययोः।
कमेर्वाहुलकादुन्तौ कुभावे प्रकृतेरपि ॥ १४१ ॥

आदिलोपे प्रत्ययस्य कुन्तिर्जनपदे स्मृतः।
तस्य राजनि तत्रत्यजनेऽपि प्रचुरश्रुतिः ॥ १४२ ॥

विवक्षितेऽर्थे कुन्तीनां निवासा इति कुन्तयः।
स्युश्चातुरर्थिकस्यात्र शिष्टैर्जनपदे लुपः ॥ १४३ ॥

कुन्तीनां राज्ञि कौन्त्यः स्याद्वृद्धेदित्यादिना[3] ञ्यङि।
एवं कुन्तेरपत्येऽपि कौन्त्यस्तद्राजशासनात्[4] ॥ १४४ ॥

बहुत्वे लुकि सत्यत्र कुन्तयः परिकीर्तिताः।
स्त्रियांभवन्तिकुन्तीति ञ्यङ्प्रत्ययलुकि स्त्रियाम्[5] ॥१४५॥

१. Gaṇasūtra under Pā. V-ii-97.
२. Pā. IV-iv-35.
३. Pā. IV-i-171.
४. Pā. II-iv-62.
५. Pā. IV-i-176.

इतो मैनुष्यजातेर्ङीष्युक्ता कुन्तीति सूरिभिः ।
कुन्ती पाण्डुप्रियायां च सल्लक्ष्यां गुग्गुलुद्रुमे ॥ १४६ ॥

मनुष्यजातेरन्यत्र कृदिकारादिति स्म ङीष् ॥[1]

भुवो झिच् ॥ ३-५० ॥ वर्तमानस्तु कालो यो भवन्तिस्तत्र कथ्यते ॥ १४७ ॥

अवेरपि पदेऽप्येष भवेद्बाहुलकेन झिच् ।
अवन्ती नगरीभेदे काञ्चिकेऽपि प्रकीर्त्यते ॥ १४८ ॥

वदन्तीति वचोमात्रे किंवदन्ती जनश्रुतौ ।

कन्युच् क्षिपेश्च॥३-५१॥ क्षिपण्युस्तु पुमान् देहे सारथौ वाच्यलिङ्गकः ॥

कन्युच्चेति चकारेण भुवोऽप्येष प्रवर्तते ।
एवमुत्तरसूत्रेऽपि चात्क्षिपेरनुङ्ग्रहतः[2] ॥ १५० ॥

भुवन्युः स्वामिनि ब्रह्मे ज्वलने शशलाञ्छने ॥

अनुङ् नदेश्च ॥३-५२॥ नदनुर्वारिवाहे ना क्षिपणुस्तु समीरणे ॥ १५१ ॥

कृवृदारिभ्य उनन् ॥ ३-५३ ॥ करुणस्तु रसे वृक्षे कृपायां करुणा मता ।
वरुणस्तरुभेदेऽपि[ऽप्सु] प्रतीचीपतिसूर्ययोः ॥ १५२ ॥

दारुणो रसभेदे च त्रिषु तु स्याद्भया....[वहे] ।

त्रो रश्च लो वा ॥ ३-५४ ॥ तरुणः कुब्जपुष्पे ना रुचके यूनि तु त्रिषु ॥ १५३ ॥
तलुनोऽपि भवेद्यूनि तरुणी तलुनी स्त्रियाम् ।

क्षुधिपिशिमिथिभ्यः कित् ॥ ३-५५ ॥ क्षुधुनो म्लेच्छजातौ स्यात्पिशुनं कुङ्कुमे स्मृतम् ॥१५४॥
कपिवक्त्रे च काके ना सूचककूरयोस्त्रिषु ।
पृक्कायां पिशुना स्त्री स्यान्मिथुनं राशियुग्मयोः ॥१५५॥

फलेर्गुक् च ॥ ३-५६ ॥ फल्गुनस्त्वर्जुने भीष्मे तपस्ये ककुभद्रुमे ।
अस्मात्प्रज्ञाद्यणि बुधैः फाल्गुनोऽपि प्रकीर्तितः ॥१५६॥

उक्तेष्वर्थेषु नक्षत्रभेदे स्यात्फल्गुनी स्त्रियाम् ।
तद्युक्ता पौर्णमासी तु फाल्गुनी तु भवेदणि ॥ १५७ ॥

१. Pā. IV-i-65. २. Gaṇasūtra under Pā. IV-i-45.

सास्मिन्मासे फाल्गुनिकः फाल्गुनश्च तदर्थकौ ।
विभाषाफाल्गुनीत्येवं ठकि पक्षे णिचः स्मृतेः ॥१५८॥
श्रविष्ठाफल्गुनीत्यादि जातप्रत्ययलुग्विधेः ।
लुक्[1]तद्धितलुकीति स्त्रीप्रत्ययस्याप्यतो लुकि ॥ १५९ ॥
फल्गुनीनक्षत्रजातः फल्गुनः परिकीर्तितः ।
स्त्रियां तु फल्गुनी फल्गुन्यैषाढाभ्यां हि टान्विधिः ॥

अशेर्लशश्च ॥ ३-५७ ॥ लशुनं तु महाकन्दे मध्यतालव्यमिष्यते ।
सूत्रे लसेति दन्त्यान्तादेशपाठस्तु नोज्ज्वलः ॥ १६१ ॥

अर्जेर्णिलुक् च॥३-५८॥ अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः ।
मातुरेकसुतेऽपि स्याद्धवले पुनरन्यवत् ॥ १६२ ॥
नपुंसकं नेत्ररोगे गवि स्यादर्जुनी स्त्रियाम् ।
उषायां बाहुदानद्यां कुट्टन्यामपि च क्वचित् ॥ १६३ ॥
अर्जुने भक्तिरस्येति भवेदर्जुनको वुनि ॥

तृणाख्यायां चित्॥३-५९॥ तृणे त्वर्जुनमित्येतदन्तोदात्तं नपुंसकम् ॥ १६४ ॥

अर्तेश्च ॥ ३-६० ॥ अरुणो व्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ ।
निश्शब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु ॥ १६५ ॥
अरुणातिविषाश्यामामञ्जिष्ठात्रिवृतासु च ॥

अजियमिशीङ्भ्यश्च ॥ ३-६१ ॥ त्रयो धातवः । अजेर्वीभावः ॥
वयुनं देवसदने यमुना तु नदीभिदि ॥ १६६ ॥
बुधैरजगरे पुंसि शयुनः परकीर्तितः ॥

वृतुवदिहनिकमि-कषिभ्यः सः॥३-६२॥ षड् धातवः ॥
वर्स तर्स [2]तितुत्रेति न ह्यत्र स्यादिडागमः ॥ १६७ ॥
यतः प्रत्ययसंज्ञेयमसिद्धा बहुलोक्तितः ।
न प्रवृत्तं ततः षत्वं कक्षशब्दे तु तद्भवेत् ॥ १६८ ॥

१. Pā. IV-ii-23.
२. Pā. IV-iii-34.
३. Pā. I-ii-49.
४. Vā. IV-iii-34.
५. Pā. VII-ii-9.

आदेशौप्रत्ययोरिति सूत्रे भाष्यकैयटाद्युक्तम् ।
एकत्र[एतच्च]सर्वमपरे त्विह षत्वं वर्षतर्षयोराहुः ॥१६९

अयमाशयस्तु तेषां दन्त्ययुतोऽप्यस्तु भाष्यकारोक्त्या ।
बाहुलकबलप्राप्तषत्वाभावश्च पाक्षिको भवतु ॥ १७० ॥

तेन च षत्वे तर्षं वर्षं मूर्धन्यषान्वितं च स्यात् ।
दुर्वारमेतदुभयं यथाकथंचिद्भवेद्वृषितृषिभ्याम् ॥ १७१ ॥

ण्यन्ताभ्यामेरचि वा घञि वा कप्रत्यये घञर्थे वा ।
अच्प्रकरणे भयादेरुपसंख्यानप्रकाशनावसरे ॥ १७२ ॥

आकार एवोदाहृतमस्माद्वर्षं ततश्च तद्ग्राह्यम् ।
तस्माद्विरूपतेयं वर्षे तर्षे च साधु फलिताभूत् ॥१७३॥

भारतादिधरण्यंशे जम्बूद्वीपाब्दवृष्टिषु ।
वर्षमक्ली क्लियां भूम्नि वर्षाः प्रावृषि कीर्तिताः ॥१७४॥

प्राग्वतीयेष्विहार्थेषु निर्युक्ता[निर्वृत्ता]दिषु पञ्चसु ।
द्विगोः कालार्थवर्षान्तात् खठञेतल्लुकां विधेः ॥ १७५ ॥

वैर्षाल्लुक् चेति सूत्रेण रूपसिद्धिरभूदिति ॥
खप्रत्यये द्विवर्षेण ठञि प्रोक्तो द्विवार्षिकः ॥ १७६ ॥

यतो वृद्धिरियं वर्षस्यैभविष्यतिसूत्रतः ।
स्यादुत्तरपदस्यादेर्भविष्यति तु कथ्यते ॥ १७७ ॥

द्वैवर्षिकः पाक्षिके तु द्विवर्षो लुकि सिध्यति ।
नित्यं लुका चित्तैवति द्विवर्षः कथितो बुधैः ॥ १७८ ॥

वर्षादितीह निर्देशात्प्रावृडर्थो न गृह्यते ।
प्रावृडर्थात्तु जातादौ वैर्षाभ्यष्ठकि वार्षिकः ॥ १७९ ॥

१. Pā. VIII-iii-19.
२. Pā. V-i-88.
३. Pā. VII-iii-16.
४. Pa. IV-i-89.
५. Pā. IV-iii-18.

कौलाट्ठञोऽपवादस्य ऋत्वणो बाधको ह्ययम् ।
तर्षः पूषणि चोत्साहे पिपासालिप्सयोरपि ॥ १८० ॥

अनुतर्षः सुरापानपात्रे तृष्णाभिलाषयोः ॥
पुत्रादौ तर्णके वर्षे वत्सः क्लीबं तु वक्षसि ॥ १८१ ॥

मुनिभेदेऽपि वत्सो ना गर्गादिगणदर्शितः ।
वत्सलस्तु त्रिषु स्निग्धे वत्सांसाभ्यां लजीरणात् ॥

तथा च सूत्रे कामार्थो वत्सशब्द इति ह्यभूत् ।
ष्टरज्वशेन तु स्वल्पे वत्से वत्सतरः स्मृतः ॥ १८३ ॥

षिद्गौरादिभ्यश्च ङीषि स्त्रियां वत्सतरी भवेत् ।
वात्सकं वत्सबृन्दे स्याद्गोगोत्रोक्षेत्यौदिना वुञि ॥१८४॥

हरेस्तु लाञ्छने पुंसि श्रीवत्सः कथितो बुधैः
हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे ॥ १८५ ॥

योगमन्त्रादिभेदेषु परमात्मनि मत्सरे
निर्लोभनृपतौ भिक्षौ शरीरमरुदन्तरे ॥ १८६ ॥

कंसोऽस्त्री तैजसद्रव्ये कांस्ये मानेऽप्ययं स्मृतः ।
आर्हीयार्थेषु कथितः कंसाट्टिठनि कंसिकः ॥ १८७ ॥

स्त्रियां तु कंसिकी प्रोक्ता ठिड्ढाणञिति ङीब्वशात् ।
[6]कंसीयपरशव्येन[न्येति] सूत्रादेतद्विभाव्यताम् ॥१८८॥

कक्षा स्यादन्तरीयस्य पश्चादञ्चल[दपि च]पल्लवे ।
स्पर्धायां ना तुदोर्मूलकच्छवीरुत्तृणेषु च ॥ १८९ ॥

अत्र बाहुलकादर्धमासे पक्षः पचेः सतः ।
पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु ॥ १९० ॥

१. Pā. IV-iii-11.
२. Pā. IV-i-105.
३. Pā. V-ii-98.
४. Pā. IV-i-41.
५. Pā. IV-ii-39.
६. Pā. V-i-25.
७. Pā. IV-i-15.
८. Pā. IV-iii-168.

स्त्री पक्षतिः पक्षमूले पक्षौत्तिरिति शासनात् ॥

प्लुषेरुपधायाः ॥ ३-६३ ॥

प्लक्षो द्वीपविशेषे स्यात्पर्कटीगर्दभाण्डयोः ॥ १९१ ॥

पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्तितः ।[2]

मनेर्दीर्घश्च ॥ ३-६४ ॥

मांसं स्यादामिषे मांसा कक्कोलीजटयोर्मता ॥ १९२ ॥

घञ् ल्युडन्ते पचौ लोपान्मांस्पाको मांस्पचन्यपि ।
पृषोदरादिष्वनयोः सिद्धिरीदृग्विभाव्यताम् ॥ १९३ ॥

अक्षेर्देघने ॥ ३-६५ ॥

अक्षमिन्द्रियमक्षो ना रथाङ्गव्यवहारयोः ।
पाशके शकटे कर्षे भूतभेदे कलिद्रुमे ॥ १९४ ॥

अक्षेण वाक्षणा दीव्यत्यादिष्वर्थेष्वाक्षिकष्ठकि ।
अक्षद्यूतेन निर्वृत्तं स्यादाक्षद्यूतिकं ठकि ॥ १९५ ॥

अक्षे तु कुत्सिते काक्षः स्यात्कापथ्यक्षयोरपि ।
काभावोऽयं बहुव्रीहावक्षिशब्देन वा भवेत् ॥ १९६ ॥

अक्षे धुरः समासान्ते निषेधात्कथिताक्षधूः ।
दृढधूरक्ष इति वा द्वेधा प्यक्षे हि धूरियम् ॥ १९७ ॥

स्नुवृधिकृत्यृषिभ्यः क्वित् ॥ ३-६६ ॥

चत्वारो धातवः ॥

स्नुषा पुत्रस्य भार्यायां स्याद्वृक्षस्तु महीरुहे ।
कृत्सं पाथसि नक्षत्रे ऋक्षं स्यादिन्द्रयेऽपि च ॥ १९८ ॥

ऋषेर्जातौ ॥ ३-६७ ॥

ऋक्षोऽद्रिभेदे भल्लूके शोणकेऽपि प्रकीर्तितः ॥

उन्दिगुधिकुषिभ्यश्च ॥ ३-६८ ॥

त्रयो धातवः ॥

उत्सः प्रस्रवणे प्राग्दीव्यतीयेष्वौत्स उच्यते ॥ १९९ ॥
उत्सादिभ्योऽञ्वशाद्वुत्सः स्तबकग्रन्थिपर्णयोः ।
स्तम्बे हारप्रभेदे च सद्वितीययुतोऽप्यसौ ॥ २०० ॥
प्रयुज्यते विपश्चिद्भिकुक्षं तु जठरे स्मृतम् ॥

१. Pā. V-ii-15. प्लक्षादिभ्योऽनञ्[ञ्ण्] ॥
२. Both the mss. here add ३. Pā. IV-i-86.

गृधिवर्णो[ण्यो]र्दकौ च ॥ ३-६९ ॥

गृत्सस्तु गर्धने दत्वं भष्भावस्य निवृत्तये ॥ २०१ ॥

पक्षो मासार्धके पार्श्वे गृहे साध्यविरोधयोः ।
केशादेः परतो बृन्दे बले सखिसहाययोः ॥ २०२ ॥

चुल्लीरन्ध्रे पतत्रे च राजकुञ्जरपार्श्वयोः ।
पक्षतिः पक्षमूले स्यात्पक्षात्तिरिति सूत्रतः ॥ २०३ ॥

चतुरर्थ्यां वुञ्छणादिफका पाक्षायणः स्मृतः ।
मत्वर्थीयइना पक्षी पाक्षिको हन्ति तं ठकि ॥ २०४ ॥

अशोः सरः ॥ ३-७० ॥

अक्षरं त्वपवर्गेऽपि स्यात्परब्रह्मवर्णयोः ।
अशेः सरोऽयं न सरन्मध्योदात्तत्वदर्शनात् ॥ २०५ ॥

अश्नोतेर्वासरो भौष्यं शिष्टानुकरणं वदत् ।
कैयटस्तु नितं प्राहोज्ज्वलदत्तादिसंमतम् ॥ २०६ ॥

वसेश्च ॥ ३-७१ ॥

द्विषण्मासात्मके काले वत्सरः परिकीर्तितः ।

सपूर्वाच्चित् ॥ ३-७२ ॥

वसेः सपूर्वाच्च सरन्[सरः] स्वरभेदाय चित्कृतः ॥२०७॥

संवत्सरेद्वत्सरादि तत्रोदाहरणं स्मृतम् ।
सांवत्सरं फले पर्वण्यपि संवत्सरादणि ॥ २०८ ॥

जाताद्यर्थेष्वतोऽन्यत्र स्यात्सांवत्सरिकं ठञि ।
प्राग्वतीयेष्विहार्थेषु निर्वृत्तादिषु पञ्चसु ॥ २०९ ॥

राड्यहःसूत्रतः संवत्सरान्तात् खठञो द्विगोः ।
उक्तौ द्विसंवत्सरीणद्विसांवत्सरिकौ क्रमात् ॥ २१० ॥

संख्यायाः संवर्तसरस्येत्यादिना वृद्धिरत्र हि ।
ठञ्युत्तरपदस्याचामादेरच उदाहृता ॥ २११ ॥

संवत्सरतमः स स्याद्यः संवत्सरपूरणः ।
नित्यं शतादिमासेति सूत्रेण तमटाडटः ॥ २१२ ॥

१. Pā. V-ii-25.
२. Mahābhāṣya, Keilhorn I, 36.
३. Pā. V-i-87.
४ Pā. VII-iii-15.
५. Pā. V-ii-57.

अस्मादेव हि सूत्राङ्कुट्[1] मासादेः पूरणे स्मृतः ॥

कुधूमदिभ्यः किन् ॥ ३-७३ ॥

तिलौदने तु कूसरो यवाभ्वां कूसरा स्त्रियाम् ॥२१३॥

प्रत्ययावयवस्यापि सस्य बाहुलकान्न षः ।
धूसरी किन्नरीभेदे ना खरे त्रिषु पाण्डरे ॥ २१४ ॥

मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ।
मत्सरा मक्षिकायां स्त्री क्रोधेऽपि क्वचिदेष ना ॥२१५॥

वेदे तु यौगिको हर्षहेतावेष निगद्यते ॥

पतेरत्सलः ॥ ३-७४ ॥

पत्सलस्तु पुमान्मार्गे प्रत्याहारे च कथ्यते ॥ २१६ ॥

तन्यृषिभ्यां क्सरन् ॥ ३-७५ ॥

मन्त्रोपकरणे प्रोक्तस्तसरः सूत्रवेष्टने ।
ऋक्षरा तोयधारायामृक्षरः कण्टकर्त्विजोः ॥ २१७ ॥

पीयुकणिभ्यां कालन् ह्रस्वः संप्रसारणं च ॥ ३-७६ ॥

राजादने पियालः स्यात् वृक्षभेदेऽप्यरेफकः ।
यज्ञोपकरणे धान्ये कुणालो देशपक्षिणोः ॥ २१८ ॥

भगालं तु कपाले स्यात् भञ्जेर्बाहुलकादिह ।
नलोपोऽनिदितां सूत्रात्कुत्वं न्यङ्क्वादिपाठतः ॥२१९॥

अस्मादिनिश्चेन्मत्वर्थे भगाली स्यान्महेश्वरे ।

कठिकुषिभ्यां काकुः ॥ ३-७७ ॥

कठाकुर्विहगे शुभ्रे कुषाकुर्नाभिसूर्ययोः ॥ २२० ॥

स्यात्परोक्षापिनि त्वेष विशेष्याधीनलिङ्गकः ।
धातोर्हि कुषनिष्कर्ष उत्वतो नात्वतः कषेः ॥ २२१ ॥

दन्तकीयात्कोशकारैरुकारप्रक्रमोक्तितः ॥

सर्तेर्दुक्च ॥ ३-७८ ॥

मुट् चेति केचित् ॥

सृदाकुर्नानिले वक्रे दावाग्नौ प्रतिसूर्यके ॥ २२२ ॥

स्त्रियां सरिति[सर्तेर्मुडिति]मुट्पाठे सृमाकुर्मृग ईरितः ॥

वृतेर्वृञ्चिभ्र ॥ ३-७९ ॥

वार्ताकुशब्दः पुंसि स्याद्भृङ्गवृक्षस्य वाचकः ॥ २२३ ॥

---

1. Both the mss. add here the with **वत्सलः**

2. Pā. VI-iv-4.

अत्वे तु प्रत्ययान्तस्य वार्ताकं बहुलोक्तितः ॥

पर्देर्नित्संप्रसारणमल्लोपश्च ॥ ३-८० ॥

पृदाकुर्वृश्चिके व्याघ्रे सर्पचित्रकयोरपि ॥ २२४ ॥

सृयुवचिभ्योऽन्युजागूजक्नुचः ॥ ३-८१ ॥

सरण्युर्वारिदे वाते शीघ्रगामिन्यपि क्वचित् ।
स्त्रियां यवागूः पक्वान्नशिष्टावस्रावितोम्भसि ॥ २२५ ॥

वचक्नुस्तु पुमान् विप्रे वावदूकेऽभिधेयवत् ।
अयं तपस्विभेदेऽपि विपश्चिद्भिरुदाहृतः ॥ २२६ ॥

शानकः शीङ्भियः ॥ ३-८२ ॥

शयानकस्तु विबुधैः पुमानजगरे स्मृतः ।
भयानकः स्मृतो व्याघ्रे रसे राहौ भयङ्करे ॥ २२७ ॥

शाणकलूधूशिङ्घिधाङ्भ्यः ॥ ३-८३॥

लवाणकं लवित्रे स्यात्समीरे तु धवाणकः ।
शिङ्घाणकः कफे पुंसि क्लीबे नासिकयो[नासायसो]र्मले ॥

डिण्डीरे ना काचपात्रे शिङ्घाणमिति चेष्यते ।
पृषदोरादिपाठेन कलोपोऽत्र विकल्प्यते ॥ २२९ ॥

उल्मुकदर्वीहोमिनः ॥ ३-८४ ॥

दीनारभागे विद्वद्भिः धाणकः परिकीर्तितः ।
अलातेन समानार्थमुल्मुकं स्यान्नपुंसकम् ॥ २३० ॥

दर्वी जिते खजाकायां फणायामुरगस्य च ।
उक्तो दर्वीकरः सर्पे कृञो हेत्वादिटे कृते ॥ २३१ ॥

होम्यृत्विजि स्यादिनिना होमादिन्यप्यसौ भवेत् ।
तथापि संज्ञामात्रेऽस्य प्राचुर्यमिह वर्णनात् ॥ २३२ ॥

अतो वा ज्ञायते कृद्धयो न भवे[नस्या]दिनिठनोर्विधिः ॥

ह्रियः कुप्रश्च लो वा ॥ ३-८५ ॥

कप्रश्चलो वेति केचित् ।
ह्रीकुह्रीकू सलज्जेऽन्यो ह्रीकह्रीकाविहाभ्यधात् ॥२३३॥

हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन् ॥ ३-८६ ॥

दश धातवः

हस्तः करे करिकरे सप्रकोष्ठकृते करे ।
ऋक्षे केशात्परो व्राते वेः परो व्याकुलार्थकः ॥ २३४ ॥

हस्ते च दीयते कार्यमिति वा हस्त्यमन्यवत् ।
युद्धं प्रवृत्तं हस्ताभ्यामुभाभ्यां यत्प्रहृत्य तत् ॥ २३५ ॥

उभाहस्त्युभयाहस्ति द्विदण्ड्यादिषु दर्शिते ।
हस्ताज्जाताविती नौ तु हस्तीदन्तावले स्मृतः ॥ २३६ ॥

नडादित्वात्फकि भवेत्तद्गोत्रे हास्तिनायनः ।
दण्डिनायनसूत्रेण भवेदेष निपातनात् ॥ २३७ ॥

हन्तेष्ठकीह हस्तिघ्नः शक्तौ हस्तिकपाटयोः ।
प्रमाणं न्य[णम]स्य चेद्धस्तिद्वयसं हास्तिनं च तत् ॥

पादस्य लोपोऽहस्त्यादिपर्युदासप्रवर्तनात् ।
[हस्तिपादः समासान्तलोपाभावेन सिद्ध्यति ।]
हास्तिकं हस्तिनां वृन्दे हस्तो हस्तर्क्षजे स्मृतः ॥२३९॥

श्रविष्ठाफल्गुनीत्यादेर्जातप्रत्ययलुग्विधेः ।
स्त्रियां तु टापि हस्ताथ मर्तो भूलोकजन्मनोः ॥२४०॥

भूलोकार्थाद्दिगादिभ्यो लुकी[यति] मर्त्यो नरे स्मृतः ।
नञ्समासे त्वनेन स्यादमर्त्यस्त्रिदिवौकसि ॥ २४१ ॥

गर्तस्त्रिगर्तभेदे स्यादवटे च कुकुन्दरे ।
गर्तोत्तरपदाद्देशवाचिनश्छविधानतः ॥ २४२ ॥

वृकगर्तीयमित्येतज्जाताद्यर्थेषु कथ्यते ।
एतस्तु कर्बुरे पुंसि त्रिषु तद्वति विश्रुतः ॥ २४३ ॥

एतैर्नीत्युभयं वर्णादनुदात्तादिति स्त्रियाम् ।
ङीप्रत्यये नत्वसन्नियोगशिष्टेऽपि टापि च ॥ २४४ ॥

१. Pā. V-iv-128.
२. Pā. V-ii-133.
३. Pā. IV-i-99.
४. Pā. VI-iv-174.
५. Pā. III-ii-54.
६. Pā. V-iv-138.
७. This ardha is not found in mss. but has been introduced so as to fit in with the previous ardha.
८. Pā. IV-iii-34.
९. Pā. IV-iii-55.
१०. Pā. IV-i-39.

वातः स्यात्पुंसि पवने धातुरोगप्रभेदयोः ।
पैशादिभ्यो य इति ये वात्या वातकदम्बके ॥ २४५ ॥

वातस्य शमनं यच्च कोपनं तत्र वातिकम् ।
संयोगोत्पातयोरस्य निमित्ते ठञ्विधानतः ॥ २४६ ॥

वातदन्तबलेत्यादिसिध्मादिगणसूत्रतः ।
ऊङ्विधानेन वातूलो वातवत्यभिधीयते ॥ २४७ ॥

वातूलो वातनिवहे वातस्यासहनेऽपि च ।
ऊलप्रकरणे वैतात्समूहे चेति शासनात् ॥ २४८ ॥

वार्तिकोक्त्या स्मृतो वातमजो वातंधयः खशि ।
मृतावसिते रम्ये समाप्तावन्त इष्यते ॥ २४९ ॥

अन्ते जाताद्यन्तिमं स्यादन्ताच्चेति डिमज्विधेः ।
अवारपारात्यन्तानुकामं गामीति खश्रुतेः ॥ २५० ॥

अत्यन्तं गामिनि भवेदत्यन्तीनो विशेष्यवत् ।
अन्तगात्यन्तगानन्तगा गमेर्डविधेः स्मृताः ॥ २५१ ॥

दिवाविभेति टे त्वन्तकरोऽनन्तकरस्तथा ।
अनन्तावसथेति न्ये स्वार्थ आनन्त्यमुच्यते ॥ २५२ ॥

दन्तोऽद्रिकटके कुञ्जे रदनेऽप्युन्नतोपले ।
वा शसादिष्वदद्भ्राति[दिषु दद्भावः] र्पद्दन्नित्यादिसूत्रतः॥

दात्तः कूप इहोर्दक् च विपाश इति सत्यञौ ।
अर्थे दन्तेन नर्नृत्त[निर्वृत्त]इति नाण्प्रत्ययस्ततः ॥२५४॥

दन्तावलो दन्तशिखात्संज्ञायां वलचा द्विपे ।
इनिना तु भवेद्दन्ती दन्त्यो दन्तभवे यता ॥ २५५ ॥

१. Pā. IV.ii.49.
२. Gaṇasūtra under V-ii-97.
३. Pā. V-ii-121.
४. Vā. IV-iii-23.
५. Pā. V-ii-11.
६. Pā. III-ii-21.
७. Pā. V-iv-23.
८. Pā. VI-i-63.
९. Pā. IV-ii-74.
१०. Pā. V-ii-113.

वौतदन्तबलेत्यादिसिध्मादिगणसूत्रतः ।
ऊङ्विधानेन दन्तूलो दन्तवत्यभिधीयते ॥ २५६ ॥

दन्ता अस्योन्नताः सन्तीत्युरचौ दन्तुरः स्मृतः ।
निम्नोन्नते लाक्षणिकः प्रयोगोऽस्यानुमोदकः ॥ २५७ ॥

बहुव्रीहौ तु वयसि दन्तस्य दतृभावतः ।
भवेत्संख्यासुपूर्वस्य द्विदन्निति सुदन्निति ॥ २५८ ॥

षोडन्नुत्वे षषः ष्टुत्वे चादेः परपदस्य च ।
सुदतीत्युगितश्चेति ङीपि स्त्रीत्वे निगद्यते ॥ २५९ ॥

स्याद्विदन्तसुदन्तादिर्वयसोऽन्यत्र तत्र तु ।
स्याद्द्विदन्तीसुदन्तीति नासिकोदरसूत्रतः ॥ २६० ॥

अग्रान्तशुद्धशुभ्रेभ्यो वृषादपि वराहतः ।
दन्तस्य दतृभावो वा बहुव्रीहौ प्रकीर्तितः ॥ २६१ ॥

तेन शब्दाः कुड्मलाग्रदन्नित्याद्या हि पाक्षिकाः ।
लोतः पुंसि तु मेषे स्याल्लोतमश्रुणि चोरिते ॥ २६२ ॥

पोतः शिशौ वह्नित्रे च धूर्तो धुत्तूरभूरुहे ।
शठे च खण्डलवणेऽप्ययं विद्वद्भिरुच्यते ॥ २६३ ॥

तूस्तं बाहुलकादत्र तुसतेः शब्दवाचिनः ।
पापे धूलौ जटायां च दीर्घोऽपि बहुलोक्तितः ॥२६४॥

नञ्याप इट् च ॥३-८७॥ उक्तो नापितशब्दोऽयं बुधैरन्तेवसायिनि ।
नापित्यं तदपत्ये ण्यप्रत्यये कारिलक्षणे ॥ २६५ ॥

तनिमृङ्भ्यां किच्च ॥ ३-८८ ॥ इञः परेण वृद्धत्वात्फिञो वा नापितायनिः ।
ततं व्याप्ते विस्तृते च वाच्यवल्लिङ्गमिष्यते ॥ २६६ ॥

१. Gaṇasūtra under V-ii-97.
२. Pā. V-ii-106.
३. Pā. V-iv-141.
४. Pā. V-iv.130.
५. Pā. IV-i-6.
६. Pā. IV-i-55.
७. Pā. V-iv-145.

क्लीबं वीणादिके वाद्ये पुंलिङ्गस्तु समीरणे ।
संपूर्वकत्वे सततं संततं चाप्यनारते ॥ २६७ ॥

द्वयमेतदसत्वे स्यात्क्लीबं सत्वे त्रिलिङ्गकम् ।
हिते तते चान्त्यलोपः समो वाक्येन कीर्तितः ॥२६८॥

मृतं तु याचिते मृत्यौ क्लीबं मृत्युमति त्रिषु ।
नञ्पूर्वमेतत्कैवल्ययज्ञशेषसुधाम्बुषु ॥ २६९ ॥

अञ्जिघृसिभ्यः क्तः ॥ ३-८९ ॥

त्रयो धातवः ॥

अक्षिते च परिच्छिन्नेऽप्यक्तमित्यभिधीयते ।
व्यस्तशब्दोचितावर्थावक्तस्य व्याप्तसंकुले ॥ २७० ॥

जगावुज्ज्वलदत्तस्तु विश्वकोशलिपिभ्रमात् ।
घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत् ॥ २७१ ॥

सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्री ।
बाहुलकादृतमुदके दीप्तोञ्छशिलार्चितेषु सत्येऽपि॥२७२

असितो नञ्समासेन नीले ना तद्वति त्रिषु ।
असिता स्त्री न त्वतुल्यशिष्टङीपो निषेधनात् ॥२७३॥

असिक्नी च छन्दसि क्नमेक इत्युक्तिदर्शनात् ॥

दुतनिभ्यां दीर्घश्च ॥ ३-९० ॥

स्यात्सन्देशहरे दूतो दूती गौरादिङीष्वशात् ॥ २७४ ॥

दूतिश्च क्तिचि संज्ञायां दूङो दैवादिकाद्भवेत् ।
दूतशब्दाद्दूत्यदौत्ये कथिते भावकर्मणोः ॥ २७५ ॥

वार्तिकोक्त्या ब्राह्मणादिगणपाठाच्च यष्यञोः ।
तातोऽनुकम्प्ये जनके शीङो बाहुलकादिह ॥ २७६ ॥

शीता नभस्सरिति लाङ्गलपद्धतौ च
प्रोक्ता दशाननरिपोरपि धर्मपत्न्याम् ।
शीतं स्मृतं हिमगुणे च तदन्विते च
शीतोऽलसे च बहुवारतरौ च दृष्टः ॥ २७७ ॥

१. Vā. IV-i-39. २. Vā. V-i-126.

षिङ्बन्धन इति त्वस्माद्दीर्घेऽपि बहुलकोक्तितः ।
सीतशब्दो यथायोग्यलिङ्गोऽस्तीति विचिन्त्यताम् ॥

तालव्यादिश्च दन्त्यादिस्तथा च द्विविधोऽप्ययम् ।
धरणीमेदिनीविश्वरभसादिषु दर्शितः ॥ २७९ ॥

शीतोष्णाभ्यां कारिणीति कनि स्याच्छीतकोऽलसे ।
सीतया समिते सीत्यं नौवयैःसूत्रतो यति ॥ २८० ॥

त्रिसीत्याद्याश्च सिध्यन्ति तदन्तविधिसंभवात् ।

जेर्मुट्चोदात्तः ॥ ३-९१ ॥

नीमूतः स्याद्व्रतिकरे[स्याद्वृत्तिकरे]शक्रेऽद्रौ घोषके घने॥
जेर्मुट् चोदात्त इत्येवं सूत्रमार्षं न मन्वते ।
पृषोदरादिष्वत एवाकरेऽयमुदाहृतः ॥ २८२ ॥

जीवनं सलिलं मूतं बद्धमेतेन यत्ततः ।
जीमूतोऽभूत्पूर्वपदस्यादेशो जी विधीयते ॥ २८३ ॥

अथवान्त्याक्षरयुगं लुप्तं पूर्वपदे भवेत् ॥

लोष्टपलितौ ॥ ३-९२ ॥ पुंनपुंसकयोर्लोष्टो मृत्सङ्घाते निपात्यते ॥ २८४ ॥

पलितं शैलजे तापे केशपाके च कर्दमे ।
कुतिश[क्रियते] येन पलितं पलितंकरणो हि सः ॥

उच्यते करणेऽनाद्यसुभगस्थूलसूत्रतः ।
कर्मसूपपदेष्वच्वौ च्व्यर्थेष्वेव ख्युनो विधेः ॥ २८६ ॥

पलितंकरणी ङीपि नञ्स्नञीकगिति स्मृतेः ।
कर्तृषूपपदेष्वेषु भुवः खिष्णुच्खुकञ्विधेः ॥ २८७ ॥

एवंविधेषु पलितंभविष्णुरिति कथ्यते ।
पलितं भावुकोऽप्येषां खित्वात् पूर्वपदस्य मुम् ।
पलिता स्त्री न त्वतुल्यशिष्टङीपो निषेधनात् ॥२८८॥

१. Pā. V-ii-72.
२. Pā. IV-iv-91.
३. Pā. III-ii-56.
४. Vā. IV-i-15.

पलिक्नी च छन्दसि क्नमेक इत्युक्तिदर्शनात् ।

इण्याभ्यामितन्॥३-९३॥ स्याद्दूर्वायान्तु हरिता हरिद्भूर्णयुतेऽन्यवत् ॥ २८९ ॥

बहुव्रीहौ तु हरितजम्भा नान्तः प्रकीर्तितः ।
इयेतः पाण्डरवर्णे ना तद्वति स्यादयं त्रिषु ॥ २९० ॥

रुहे रश्च लो वा॥३-९४॥ रोहितं रुधिरे क्लीबमृजुशक्रशरासने ।
रोहितो मीनमृगयोर्भेदे रोहितकद्रुमे ॥ २९१ ॥

रोहितं रक्तगोशीर्षकुङ्कुमाजिकुचन्दने ।
पुमान् नदान्तरे भौमे वर्णे च त्रिषु तद्वति ॥ २९२ ॥

रश्च लो वेति सूत्रोक्तेः स्याल्लकारादिकोऽप्ययम् ।
अर्थभेदे व्यवस्थातः प्रयोगोऽस्यावगम्यताम् ॥ २९३ ॥

हरिताद्या गुणे वर्णादनुदात्तादिति स्मृतेः ।
स्त्रीलिङ्गे हरिताश्येतारोहितालोहितेतिवत् ॥ २९४ ॥

भवेयुर्हरिणी श्येनी रोहिणी लोहिनीति च ।
स्वार्थिके लोहितादत्र कनि लोहितको मणौ ॥ २९५ ॥

कोपाद्रक्ते लोहितको वर्णे चानित्य इत्यतः ।
स्त्रियां लोहितिका लोहिनिका वा लिङ्गबाधनात् ॥२९६॥

रक्ते लाक्षादिना लोहितको वा लिङ्गबाधनात् ।
इवार्थेऽस्माल्लौहितीक ईकका कर्कलोहितात् ॥ २९७ ॥

पूर्वाज्ज्योऽग्रामणीपूर्वाल्लौहितध्वज्यसिद्धये ।
तद्राजाज्यादयस्तेन बहुत्वे लोहितध्वजाः ॥ २९८ ॥

हन्ता रौहितिको मीनमृगभेदार्थकाद्वुकि ।
रोहिणीति भभेदेऽपि तज्जातो रौहिणः पुमान् ॥२९९॥

१. Vā. IV-i-39.
२. Pā. IV-i-39.
३. Pā. V-iv-30.
४. Pā. V-iv-31.
५. Pā. V-iii-110.
६. Pā. V-iii-112.

स्त्रियां जातप्रत्ययस्य लुगुक्त्या रोहिणी भवेत् ।
लुक् तद्धितलुकीति स्त्रीप्रत्ययस्य कृते लुकि ॥ ३०० ॥

पिप्पलीत्यादिगणे पाठात्पुनरप्यत्र ङीष्विधिः ॥

पिशोः किञ्च ॥ ३-९५ ॥ मांसे तु पिशितं क्लीबे मांस्यां तु पिशिता स्त्रियाम् ॥ ३०१ ॥

श्रुदक्षिस्पृहिगृहिभ्य आय्यः ॥ ३-९६ ॥ चत्वारो धातवः ॥

श्रवाय्यस्तु स्मृतोऽध्वर्यौ श्रवणीये क्रतौ पशौ ।
दक्षाय्यो गरुडे गृध्रखगे दक्षतरेऽपि च ॥ ३०२ ॥

स्पृहयाय्यः सस्पृहे स्यात् गृहयाय्यो गृहाधिपे ।
काथादिकावृदुपधावुभौ स्पृहिगृही इह ॥ ३०३ ॥

अयामन्ताल्वाय्यसूत्रादयादेशोऽत्र णेः स्मृतः ॥

दिधिषाय्यः ॥ ३-९७ ॥ विचक्षणैः पूजितेऽर्थे दिधिषाय्य इति स्मृतः ॥ ३०४ ॥

वृङ एण्यः ॥ ३-९८ ॥ वरेण्यशब्दः कथितो वरणीयेऽभिधेयवत् ॥

स्तुवः क्सेय्यः ॥३-९९॥ केय्य इति केचित् ॥

स्तुषेय इति विख्यातः तत्र यः स्तुतिमर्हति ॥ ३०५ ॥

तत्र केय्यं वदन्तस्तु स्तुवेय्यमुवङा विदुः ।
न तद्बहुमतं वेदतद्भाष्यादिविरोधतः ॥ ३०६ ॥

राजेरन्यः ॥ ३-१०० ॥ राजन्यः पावके राजपुत्रे राजन्यपि स्मृतः ॥

भृरम्योश्च ॥ ३-१०१ ॥ शरण्यं गृहरक्षित्रोः स्याद्रमण्यं तु सुन्दरे ॥ ३०७ ॥

अर्तेर्निच्च ॥ ३-१०२ ॥ वने त्वरण्यं महति त्वरण्यानी स्त्रियामिह ।
णे शैषिक इहारण्यो जाताद्यर्थेषु कथ्यते ॥ ३०८ ॥

आरण्येति स्त्रियामस्माट्टाबदन्तत्वलक्षणः ।
आरण्यको वुञ्यारण्यान्मनुष्य इति सूत्रतः ॥ ३०९ ॥

१. Pā. I-ii-49.
२. Gaṇasūtra under IV-i-41.
३. Pā. VI-iv-55.
४. Pā. IV-ii-129.

पैथ्यध्यायन्यायहस्तिविहारेषु मनुष्यवत् ॥

पर्जन्यः ॥ ३-१०३ ॥ पर्जन्यो मेघशब्देऽपि ध्वनदम्बुदशक्रयोः ॥ ३१० ॥

वदेरान्यः ॥ ३-१०४ ॥ वदान्यस्तु भवेत्त्यागिन्यपि वाग्मिनि भेद्यवत् ॥

अमिनक्षियजिवधि-पतिभ्योऽत्रन् ॥३-१०५॥ अमत्रं भाजने क्लीबमृक्षे नक्षत्रमुच्यते ॥ ३११ ॥

यत्तु नैभ्राण्नपादादिसूत्रे नक्षत्रमीरितम् ।
क्षत्रेण नञ्समासेऽपि व्युत्पत्त्यन्तरमत्रवत् [मस्तु तत्] ॥

यजत्रो यजमानाग्निहोत्रयष्टव्यदेवते ।
वधेः प्रकृत्यन्तरतो वधत्रं स्मृतमायुधे ॥ ३१३ ॥

पतत्रं वाहने पक्षिपक्षे वर्णे नभस्यपि ॥

गडेरादेश्च कः ॥३-१०६॥ स्त्रीणां श्रोणिप्रदेशेऽपि कुटुम्बिन्यां च न द्वयोः ॥३१४॥

कडत्रं लडयोरैक्यात्कलत्रमपि चेष्यते ॥

वृञश्चित् ॥ ३-१०७ ॥ चर्मरज्जौ तु कथिता वरत्रा विबुधैः स्त्रियाम् ॥ ३१५ ॥

अञ्जि स्याद्वह्वचः कूपेष्विति निर्वृत्तवाचिनि ।
कूपे निगद्यते दैर्घ्यवरत्र इति नाण् ततः ॥ ३१६ ॥

अञ्जा तदर्थं विकृतेः प्रकृतौ चर्मणोऽञ्जिति ।
वरत्राया इदमिति वारत्रं चर्म वार्ध्रवत् ॥ ३१७ ॥

संविदेः कत्रन् ॥३-१०८॥ ज्ञाने कुटुम्बके चैव संविदत्रं नपुंसकम् ॥

कृतेर्नुम् च ॥ ३-१०९ ॥ कृन्तत्रं लाङ्गले छेद्ये छेदने वेष्टनेऽपि च ॥ ३१८ ॥

भृमृदृशियजिपर्विपच्य-मितमिनमिहर्येभ्योऽतच् ॥ ३-११० ॥ दश धातवः ॥

भरतः शम्बरे रामानुजे भारतवर्षपे ।
दुष्यन्तजे नटे नाट्यशास्त्रकृत्तन्तुवाययोः ॥ ३१९ ॥

भारती तु सरस्वत्यामस्मादेवाणि शैषिके ।
वायौ मृत्यौ च मरतो दर्शतः सोमसूर्ययोः ॥ ३२० ॥

१. Vā. IV-ii-129.
२. Pā. VI-iii-75.
३. Pā. IV-ii-73.

दशपाद्यां तु दरतशयतौ यदुदाहृतौ ।
दृशीङ्पाठेन नेडयंतन्मन्त्रतद्ब्राष्यवैकृतात् ॥ ३२१ ॥

यष्टव्ये यजतः प्रोक्तः कृष्णवर्णे च पावके ।
पर्वतः पादपे पुंसि शाकमत्स्यप्रभेदयोः ॥ ३२२ ॥

देवर्षिभेदे शैलेऽपि विपश्चिद्भिरुदाहृतः ।
मत्वर्थीयाद्भवेदेष तत्पर्येत्यपि तद्धितात्[?] ॥ ३२३ ॥

छप्रत्यये पर्वतौच्चेत्यनेन सति शैषिके ।
मनुष्यः पर्वतीयः स्याज्जाताद्यर्थेषु विश्रुतः ॥ ३२४ ॥

अमनुष्ये विभाषामनुष्य इत्युक्तसूत्रतः ।
पर्वतीयः पार्वतश्च भवेद्वैभाषिकेऽप्यणि ॥ ३२५ ॥

पार्वत्यपत्येऽञि तस्योपसंख्यानादजातये[?] ।
सति ङीषि भवेद्गौर्यो वह्नौ तु पचतः पुमान् ॥३२६॥

अमतः कालमृत्यौ च रोगेऽपि च निगद्यते ।
तृष्णापरे तु तमतः तृष्णायामपि कथ्यते ॥ ३२७ ॥

ऊर्णाविकारे धूमे च सूर्ये च नमतो नते ।
स्पृहणीये तुरङ्गे च यज्ञे वायौ च हर्यतः ॥ ३२८ ॥

पृषिरञ्जिभ्यां कित् ॥ ३-१११ ॥

पृषतो ना मृगे बिन्दौ त्रिषु सश्वेतबिन्दुके ।
रजतं त्रिषु शुक्ले स्यात्क्लीबे दुर्वर्णहारयोः ॥ ३२९ ॥

खलतिः ॥ ३-११२ ॥

अमुण्डनेऽपि निष्केशे खलतिः पुंसि च स्त्रियाम् ।
सलोपः स्खलतेरित्वं प्रत्ययान्ते निपात्यते ॥ ३३० ॥

कृदिकारादक्तिनः इत्यतो ङीष् वा स्त्रियां भवेत् ॥

शीङ्शपिरुगमिवञ्चि-जीविप्राणिभ्योऽथः ॥ ३-११३ ॥

वञ्चिस्थाने वन्दि केचित्पठन्ति ॥
शयथो वाहने व्याधौ मृत्यावपि च पुंस्यसौ ॥३३१॥

१. Pā. IV-ii-143.
२. Gaṇasūtra under Vā. IV-i-45.
३. Pā. V-iv-23.

निद्रालौ वाच्यलिङ्गोऽथ शपथः शपने पुमान् ।
रवथः कोकिले भीरौ शब्दनेऽपि च कथ्यते ॥ ३३२ ॥

गमथः पथिके प्रोक्तो वर्त्मन्यप्येष दृश्यते ।
वञ्चथः कोकिले काले धूर्तेऽपि परिकीर्तितः ॥ ३३३ ॥

वन्दथो वञ्चथस्थाने स्तुत्यस्तोत्रोऽपरैः स्मृतः ।
जीवथो धर्मशशिनोरायुष्मति च कथ्यते ॥ ३३४ ॥

बलिनि ग्रामनिचये प्राणथः स्यात्प्रजापतौ ।
आहुः शमिदमिभ्यामप्यथं बाहुलकादिह ॥ ३३५ ॥

शमथः सचिवे शान्तौ दमथो दमदण्डयोः ॥

भृञश्चित् ॥ ३-११३ ॥ भरथः पावके पुंसि लोकपालेऽपि कथ्यते ॥ ३३६ ॥

रुदिविदिभ्यां ङित् ॥ ३-११४ ॥ "रुदिविदिभ्यां कित्" इति केचित् ॥

शिशौ तु रुदथो योगिकृतिनोर्विदथः स्मृतः ।
रुविदिभ्यां किदित्यन्यो रुवथं कुक्कुटेऽब्रवीत् ॥ ३३७ ॥

उपसर्गे वसेः ॥३-११५॥ वेश्मन्यावसथः पुंसि भवेत्क्षपणकेऽपि च ।
अनैन्तावसथेति ञ्ये त्वावसथ्यमपि स्मृतम् ॥ ३३८ ॥

वसत्यावसथे योऽसौ स्यादावसथिकः छलि ।
छलः षित्वादिह स्त्रीत्वे ङीष्यावसथिकी स्त्रियाम् ॥३३९॥

स्यादग्नौ तूपवसथस्तोमे संवसथः स्मृतः ।
उपसर्गे वसेरेवमथप्रत्यय ऊह्यताम् ॥ ३४० ॥

पाठभेदो बहुविधः शीङ्शपीत्याद्यनन्तरम् ।
दशपाद्यादिषु तथाप्यसौ नाकरसंमतः ॥ ३४१ ॥

अत्यविचमितमिनमि-रभिलभिनभितपिपति-पणिपनिमहिभ्योऽसच् ॥ ॥ ३-११६ ॥

त्रयोदश धातवः । "अत्यमिचमितमिरभिनभितपिपणिपनिभ्योऽसच्" इति केचित् । तन्मते नव धातवः ॥

१. Pā. IV-i-41.

वाय्वायुघात्मस्वतसः स्त्र्युमायामतसी स्मृता ।
गौरादित्वेन ङीषत्र विपश्चिद्भिर्विबुध्यताम् ॥ ३४२ ॥

अवसो राज्ञि सूर्ये च स्थानेऽप्याहुर्जलेऽवसम् ।
नार्के न स्त्री यज्ञपात्रे चमसः पिटकेऽस्त्रियाम् ॥३४३॥

तमसः पुंसि कूपे च व्यवसाये च कथ्यते ।
ध्वान्ते तु तमसं क्लीबं तमसा सरिति स्त्रियाम् ॥३४४॥

अनुकूले तु नमसो रभसो वेगहर्षयोः ।
लभसो याचके वित्ते नभसोऽब्धिविहायसोः ॥ ३४५ ॥

तपसो विहगे चन्द्रे हरिदश्वे च कथ्यते ।
पतसः स्यात्खगे पण्यद्रव्ये तु पणसः स्मृतः ॥ ३४६ ॥

पनसः कण्टकिफले कटके वानरान्तरे ।
स्त्रियां रोगप्रभेदे स्यान्महसं भाजने स्मृतम् ॥ ३४७ ॥

वेञस्तुट् च ॥ ३-११७॥ "वियस्तुट् च" इति केचित्पठन्ति ॥

वेतसः पुंसि वानीरे जातवेदस्यपि स्मृतः ।
वेतस्वानत्र कुमुदनडेत्यादिड्मतुब्वशात् ॥ ३४८ ॥

टिलोपे ङित्वसामर्थ्यादभत्वेऽपि भवेदिह ।
वेञस्तु[स्तुट् च]वियस्तुट्चेत्यत्र सूत्रं द्विधोच्यते ॥३४९॥

आद्ये वेञ् तन्तुसन्ताने वी गत्यादिष्वनन्तरे ।
वियस्तुट् चेति पाठस्तु दशपाद्यां समाश्रितः ॥ ३५० ॥

यथाकथंचिद्रूपस्य निष्पत्तिर्नैव हीयते ।
असत्यस्मिन् बाहुलकाद्धान्ये यवस ईरितः ॥ ३५१ ॥

वहियुभ्यां णित् ॥३-११८॥

बलीवर्देऽप्यजगरे वीतिहोत्रे च वाहसः ।
यावसस्तृणसङ्घाते घासेऽप्यन्ने च कथ्यते ॥ ३५२ ॥

१. Pā. IV-i-41. २. Pā. IV-ii-87.

वयश्च ॥ ३-११९ ॥

वायसस्तु विपश्चिद्भिः चिरजीविनि कथ्यते ।
वेद वायसविद्यां वाधीते वायसविद्यिकः ॥ ३५३ ॥

विद्यालक्षणकल्पान्ताट्टार्तिके ठञ्विधानतः ॥
"वयो णित्" "वहियुभ्यां च" इति न्यासभेदेन
केचित्पठन्ति ॥

दिवेः किच्च ॥ ३-१२० ॥

दिवसो वासरे पुंसि क्लीबे च परिकीर्तितः ॥ ३५४ ॥

कृञ्शृशलिकलिगर्दि-
भ्योऽभच् ॥ ३-१२१ ॥

पञ्च धातवः ॥

करभो मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते ।
शरभोऽष्टापदे कीशभेदेऽपि च मृगान्तरे ॥ ३५५ ॥

शलभस्तु पतङ्गाख्ये करभे करिशावके ।
गर्दभः श्वेतकुमुदे गण्डभेदेऽपि रासभे ॥ ३५६ ॥

क्षुद्रजन्तुप्रभेदेऽपि रोगभेदेऽपि कथ्यते ॥

ऋषिवृषिभ्यां कित् ॥ ३-१२२ ॥

ऋषभः स्वरभेदे स्यात् अष्टवर्गौषधे वृषे ॥ ३५७ ॥

श्रेष्ठार्थे च वराहस्य पुच्छे रन्ध्रे च कर्णयोः ।
ऋषभी शूकशिम्ब्यां च नराकारस्त्रियामपि ॥ ३५८ ॥

विधवायां निराशायामपि विद्वद्भिरुच्यते ।
ऋषभाय हिते तु स्यादार्षभ्यो ञ्यविधानतः ॥ ३५९ ॥

भवेदत्रर्षभतरस्तनुत्वे ष्टरचो विधेः ।
वृषभः पुरुषश्रेष्ठे वृषेऽपि परिकीर्तितः ॥ ३६० ॥

रुषेः निल्लुष् च ॥ ३-१२३ ॥

गन्धहस्तिनि हिंस्रे च लुषभः परिकीर्तितः ॥

रासिर्वल्लिभ्यां च ॥ ३-१२४ ॥

रासभस्तु प्रकथितः चक्रीवति विशारदैः ॥ ३६१ ॥

वल्लभो दयितेऽध्यक्षे सुलक्षणतुरङ्गमे ॥

जृविशिभ्यां भच् ॥ ३-१२५ ॥

भूतग्रामे च महिषे जरन्तः पुंसि कथ्यते ॥ ३६२ ॥

१. Vā. IV-ii-60.

वेशन्तस्त्वपरिप्राप्तापवर्गे पल्वलेऽपि च ।
स्यादर्हन्तो बाहुलकादिह क्षपणके जिने ॥ ३६३ ॥

रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ॥ ३-१२६ ॥

चत्वारो धातवः ॥

रोहन्तो वृक्षभेदे ना रोहन्ती वीरुधि स्त्रियाम् ।
नन्दन्तस्तनये सख्यौ नन्दत्यौ तु सखीसुते ॥ ३६४ ॥

जीवन्तः स्याद्द्वौ पुंसि जीवन्तीत्योषधौ स्त्रियाम् ।
प्राणान्तः पवने वाते प्राणन्तीत्यौषधौ स्त्रियाम् ॥३६५॥

रोहन्त्यादिषु षित्त्वेन स्त्रीत्वे ङीषिह बुध्यताम् ॥

तृभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ॥ ३-१२७ ॥

तरन्तः सागरेऽर्के ना तरन्ती नावि कथ्यते ॥ ३६६ ॥
भवन्तः पुंसि काले स्यात् भवन्ती भवनान्तरे ।
वहन्तो वृषभे वायौ रथे च परिकीर्तितः ॥ ३६७ ॥

वसन्तः पुष्पसमये भवेद्वासन्तिकः ष्ठकि ।
गौणादध्येतृवेदित्रोः भासन्तो....[भासुरा]र्कयोः ॥३६८॥

साधन्तः स्यात्परिव्राजि गडयन्तोऽभ्रयन्त्रयोः ।
घटादित्वान्मितां ह्रस्वे णेरयादेशतो ह्ययम् ॥ ३६९ ॥

अयादेशे मण्डयन्तो नन्दयन्तेति पूर्ववत् ।
अलङ्कारे नटे चैव मण्डयन्तो निगद्यते ॥ ३७० ॥

जयन्तः शक्रसूनौ ना जयन्ती त्वोषधौ तथा ।
स्यान्नन्दके नन्दयन्तो नन्दिर्ण्यन्तोऽत्र गृह्यते ॥३७१॥

अन्ये वसिवहीत्येवं विपर्यासं बभाषिरे ।
साधयन्त इति त्वाहुः साधेर्ण्यन्तत्ववाचिनः ॥ ३७२ ॥

कश्चित्वनाशीरर्थेऽपि नन्दन्तमिह वर्णयन् ।
आशिषीत्यनुवृत्तिं च कुर्वन् स्वोक्त्या विरुध्यते ॥३७३॥

हन्तेर्मुट् च हि च ॥ ३-१२८ ॥

हिमागमे तु विबुधैः हेमन्त इति कथ्यते ।
सर्वत्राण्च तलोपश्चेत्युक्तेर्जातादिहैमनम् ॥ ३७४ ॥

पक्षे चाद्दत्वणि त्वत्र हैमन्तमपि कथ्यते ॥

भन्देर्नलोपश्च॥३-१२९॥ भदन्तः स्यात्क्षपणके चिह्ने तु विबुधैः स्मृतः ॥ ३७५॥

ऋच्छेररः ॥ ३-१३० ॥ ऋच्छरा गणिकायां स्त्री त्वरायामपि कथ्यते ।
जर्जराद्या इहान्येऽपि विज्ञेया बहुलोक्तितः ॥ ३७६ ॥
जर्जरं शैवले क्लीबं पुरुहूतध्वजेऽपि च ।
झर्झरं स्यात्कलियुगे वाद्यभेदे नदान्तरे ॥ ३७७ ॥
मन्थरः सूचके कूपे मन्दगामिनि चेति दिक् ॥

अर्तिकमिम्रमिचमिदिविवासिभ्यश्चित् ॥ ३-१३१ ॥ षड् धातवः । वाशीति तालव्यवानित्यपरे ॥
छदे कवाटेऽप्यररं सोमे लोहे च पुंस्ययम् ॥ ३७८ ॥
कमरः कोमले बाले कामुकेऽपि प्रकीर्तितः ।
भ्रमरः कामुके भृङ्गे स्यादप्येष मधुद्रवे ॥ ३७९ ॥
संज्ञायामित्यणि....[भवेत्] भ्रामरं भ्रमरैः कृतम् ।
चमरं चामरे स्त्री तु मञ्जरीमृगभेदयोः ॥ ३८० ॥
चामरं तु स्याद्विकारेऽवयवे वा प्रकीर्णके ।
देवरस्तु बुधैर्भर्तुः कनिष्ठभ्रातरि स्मृतः ॥ ३८१ ॥
वासरो दिवसे रागे वस्त्रभेदे हुताशने ।
अयं तु वसतेर्ण्यन्ताद्गदितो दन्त्यमध्यमः ॥ ३८२ ॥
केचिद्वाशीति तालव्यं पठित्वा शब्दवाचिनः ।
वाश्यतेर्वाशरं प्राहुः कोकिलज्वलनार्थकम् ॥ ३८३ ॥

कुवः श्वरन् ॥ ३-१३२॥ कुररः कथितो धीरैः उत्क्रोशाख्ये विहङ्गमे ॥

अङ्गिमदिमन्दिभ्य आरन् ॥ ३-१३३ ॥ त्रयो धातवः ॥
अङ्गार उल्मुके न स्त्री पुंलिङ्गस्तु महीसुते ॥ ३८४ ॥
वराहे पानशौण्डे च मदारो न द्वयोर्मणौ ।
ईदिदैवादिको हर्षार्थको नास्यनुमस्त्यत : ॥३८५॥

१. Pā. IV-iii-117.

मन्दारस्तु भवेन्मन्देः स्तुत्याद्यर्थान्नुमन्वितः ।
पारिभद्रेऽर्कपर्णे च सुरद्रौ हस्तिधूर्तयोः ॥ ३८६ ॥
धातोरस्माद्बाहुलकाद्दारौ मन्दारुरित्यपि ।
पारिभद्रतरौ कश्चिच्छब्दः शब्दार्णवे स्थितः ॥३८७॥

गडेः कड च ॥३-१३४॥ कडारः कपिले दासे निस्सारोत्पलमूलयोः ॥

शृङ्गारभृङ्गारौ॥३-१३५॥ शृङ्गारस्सुरते नाट्ये····[रसे च गज]मण्डने ॥ ३८८ ॥
नपुंसकं लवङ्गेऽपि नागसंभवचूर्णयोः ।
भृङ्गारी झिल्लिकायां स्त्री कनकालौ पुमानसौ ॥३८९॥

कञ्जिमृजिभ्यां चित् ॥ ३-१३६ ॥ कञ्जारो जठरार्केभमयूरमुनिधातृषु ।
कञ्जिधातुरसौ सौत्र इति धीरैर्विमृश्यताम् ॥ ३९० ॥

कमेः किदुच्चोपधायाः ॥ ३-१३७ ॥ मार्जारस्तु बिडाले स्यात्खट्वाङ्गेऽप्येष विश्रुतः ॥
कुमारो बालके स्कन्दे युवराजेऽश्ववारके ॥ ३९१ ॥
शुकेऽपि वारणाद्रौ च कुमारं जात्यकाञ्चने ।
कुमारी रामतरणीवनकास्योर्नदीभिदि ॥ ३९२ ॥
कन्यापराजितागौरीजम्बूद्वीपेषु कीर्तिता ।
कौमारापूर्ववचने प्राप्ते इति निपातनात्[2] ॥ ३९३ ॥

तुषारादयश्च ॥३-१३८॥ तुषारो हिमभेदे च शीकरे शिशिरे हिमे ।
कासारस्तु सरस्यां स्यात्सहकारस्तु चूतके ॥ ३९४ ॥
अत्र बाहुलकादेष सहतेरकगागमः ॥
दीनारस्तु भवेन्निष्के सुवर्णाभरणेऽपि च ॥ ३९५ ॥
दीङो सुडागमोऽप्यत्र ज्ञेयो बाहुलकाद्बुधैः ॥

सर्तेरपः षुक् च॥३-१३९॥ सर्षपो विबुधैर्धान्यविशेषे परिकीर्तितः ॥ ३९६ ॥

उषिकुटिदलिकचिखजिभ्यः कपन्॥३-१४०॥ पञ्च धातवः ॥
उषपो दहने सूर्ये माने तु कुटपः पुमान् ।
मुखत्राणे प्रहरणेऽप्युच्यते दलपो बुधैः ॥ ३९७ ॥

१. Pā. IV-ii-13.

२. The text is not complete here. An ardha is probably missing.

कचपः शाकपत्रे स्यात्तथा शाकुनिकेऽप्यसौ ।
खजपं दधनि प्रोक्तं घृतेऽपि च विचक्षणैः ॥ ३९८ ॥

कृणेः संप्रसारणं च ॥ ३-१४१ ॥

कुणपः पूतिगन्धे च शवे च परिकीर्तितः ।
कौणपो राक्षसे प्रोक्तः शैषिकेऽणि विशारदैः ॥ ३९९ ॥

कपश्चाक्रवर्मणस्य ॥ १४२ ॥

स्वरार्थं तु कपश्चाक्रवर्मणस्येति सूत्रितम् ॥

विटपविष्टपविशिपोलपाः ॥ ३-१४३ ॥

चत्वारः शब्दाः । "विटपविष्टप[पिष्टप]विशिपोलपाः" इति केचित्पेठुः ॥

विटपो न स्त्रियां स्तम्बे शाखाविस्तारपल्लवे ॥ ४०० ॥

मत्वर्थीये तु विटपी भूरुहे परिकीर्तितः ॥
विष्टपं भुवने प्राहुः केचिदोष्ठ्यचरादिकम् ॥ ४०१ ॥

दन्तोष्ठ्यादिकमन्ये तु पन्थाः प्रामाणिको ह्ययम् ।
विशिपं वेश्मनि प्रोक्तमुलपो ना तृणान्तरे ॥ ४०२ ॥

गुल्मिन्यां न स्त्रियामेष स्यादपाने तु न द्वयोः ॥
बहुलोक्तेर्मण्डपोऽस्त्री मण्डेर्वेष्टनवाचिनः ॥ ४०३ ॥

विटपान्मण्डपोऽप्युक्तो दशपादीनिरूपणे ॥

घृतेस्तिकन् ॥ ३-१४४॥

दीपार्चिर्द्रव्यगुडिकापक्षिजातिषु वर्तिका ॥ ४०४ ॥

कृतिभिदिलतिभ्यः कित् ॥ ३-१४५ ॥

कृत्तिका तारकाभेदे चर्मण्यपि निगद्यते ।
पौर्णमासी कृत्तिकया युक्ता कार्तिक्युदाहृता ॥ ४०५ ॥

मासे सा यत्र तत्रोक्तौ द्वौ कार्तिकिककार्तिकौ ।
विभाषौ फाल्गुनीत्यादिठकि पक्षेऽणि च स्मृते ॥

भित्तिका वाहिनीभित्त्योः स्याद्धोधायां तु लत्तिका ॥

इष्यशिभ्यां तकन् ॥ ३-१४६ ॥

इष्टका मृद्विकारे स्यात्प्रासादाद्युपयोगिनि ॥ ४०७ ॥

इत्वं नेहेष्टकेषीकासूत्रमध्ये निपातनात् ।
अत एवेष्टकचिते सूत्राद्ह्रस्वोऽवगम्यताम् ॥ ४०८ ॥

१. Pā. IV-ii-23. २. Pā. VI-iii-65.

पक्केष्टकचितेऽप्येवं तदन्तविधिसंभवात् ।
अष्टकापितृदेवत्यतिथावित्वं न शासनात् ॥ ४०९ ॥

इणस्तशंस्तशसुनौ ॥ ३-१४७ ॥

एतशश्चैतशाश्च द्वावेतौ ब्राह्मणवाचकौ ।
अदन्तः प्रथमस्सान्तः द्वितीयश्चेति तत्स्थितिः ॥४१०॥

बीपतिभ्यां तनन् ॥ ३-१४८ ॥

वी गत्यादौ ॥
स्याद्वेतनं भृतौ क्लीबे यस्तु तेनोपजीवति ।
ठक्कि वैतनिकस्तत्र पत्तनं पुटभेदने ॥ ४११ ॥

दृदलिभ्यां भः ॥३-१४९॥ दर्भः काशकुशाद्येषु दल्भः स्याद्दर्भचैक्रयोः ॥

अर्तिगृभ्यां भन् ॥३-१५०॥ अर्भशब्दस्तु कथितः पुंलिङ्गो बालके बुधैः ॥ ४१२ ॥

गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके ।
मत्वर्थीय इनावस्मात्तद्वत्यां गर्भिणी स्त्रियाम् ॥ ४१३ ॥

गार्भिणं तत्समूहे स्याद्भिक्षौदिभ्योऽणिति स्मृतेः ।

इणः कित् ॥ ३-१५१ ॥ अनेकपे तु विबुधैरिभः पुंसि निगद्यते ॥ ४१४ ॥

आड्ये तर्दर्हतीत्यर्थे स्यादिभ्यो दण्डयवद्यति ॥

असिसञ्जिभ्यां क्थिन् ॥ ३-१५२ ॥

कीकसे न द्वयोरस्थि स्यादूरौ सक्थि न द्वयोः ॥ ४१५ ॥

उत्तरमृगोपमानात्तत्पुरुषे टज्विधानतः सक्थ्नः ।
स्यादुत्तरसक्थं मृगसक्थमथोफलकसक्थमिति ॥

यत्स्वाङ्गवाचि विदितं सक्थितदन्ताद्बहुव्रीहेः ।
षच्प्रत्ययेन हि बहुव्रीहौ सक्थीति दीर्घसक्थः स्यात् ॥

नञ्दुःसुभ्यः परतो यत्सक्थि तदन्ततो बहुव्रीहेः ।
अचि वासक्थोऽसक्थी स्यातां दुःसक्थदुःसक्थी ॥

किंच सुसक्थसुसक्थी नञ्दुःसुभ्यो हलीति सूत्रेण ।
हलि सक्थ्योरिति पाठो हलिशक्त्योरिति च तत्र हि द्वैधम् ॥ ४१९ ॥

१. Vā. VII-iii-45.
२. Another reading noted in the ms. is ऋषिवत्कक्ष्योः
३. Pā. IV-ii-38.
४. Pā. V-i-63.
५. Pā. V-iv-113.
६. Pā. V-iv-121.

टादावच्यनङादेशभाविनी अस्थिसक्थिनी ॥

प्लुषिशुषिकुषिभ्यः किलः ॥ ३-१५३ ॥

प्लुक्षिर्जलेऽमावशनौ शुक्षिर्वायौ च तेजसि ॥ ४२० ॥

कुक्षिशब्दस्तु जठरे पुंलिङ्गः परिकीर्तितः ।
शारिकुक्षो बहुव्रीहौ सुप्रातेति निपातनात् ॥ ४२१ ॥

कुलकुक्षीति ढकञि खड्गे कौक्षेयकः पुमान् ।
धूमादित्वेन जातादिष्वर्थेषु वुञि कौक्षकः ॥ ४२२ ॥

भवार्थे दृतिकुक्षीति कौक्षेयो ढञि कथ्यते ॥

अक्षेर्नित् ॥ ३-१५४ ॥

अक्षि चक्षुष्यनङ् भाविटादावचि निगद्यते ॥ ४२३ ॥

पङ्कजाक्षी बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्वशात् ।
अक्ष्यन्तादव्ययीभावे टच्प्रत्ययविधौ सति ॥ ४२४ ॥

प्रत्यक्षादिः प्रतिपर्यसमनुभ्योऽक्ष्ण इत्यतः ।
निपातनात्परोक्षे लिडिति सूत्रकृता स्वयम् ॥ ४२५ ॥

परोक्षमिति पूर्वान्तस्यौकारादेश इष्यते ।
त्रिपदात्तु बहुव्रीहौ षजन्तादषडक्षतः ॥ ४२६ ॥

स्वार्थिके खेऽषडक्षीणमषडर्क्षाशितड्विति ।
अच्प्रत्ययोद[त्यये ग]वाक्षादि स्यादक्ष्णोऽदर्शनादिति ॥

इषेः क्सुः ॥ ३-१५५ ॥

रसालाख्यौषधाविक्षुः स्याद्दुडप्रकृतौ पुमान् ।
क्षेत्रेऽमीषां भवेदिक्षुशाकटं चेक्षुशाकिनम् ॥ ४२८ ॥

अवितृस्तृतन्त्रिभ्य ईः ॥ ३-१५६ ॥

चत्वारो धातवः ॥

रज्ज्वलायां स्त्रीत्वे स्यादवीः पुंसि पशौ स्मृतः ।
तरीर्ना मारुते वह्नौ स्त्री पेटी नौ दशासु च ॥ ४२९ ॥

१. Pā. V-iv-120.
२. Pā. IV-ii-96.
३. Pā. IV-ii-127.
४. Pā. IV-iii-56.
५. Pā. V-iv-113.
६. Gaṇasūtra under V-iv-107.
७. Pā. III-ii-115.
८. Pā. V-iv-7.

स्तरीर्धूमे घने तन्त्रीर्धमन्यां वल्लरीगुणे ।
नाडीतन्त्र्योः स्वाङ्ग इति बहुव्रीहौ न कप् ततः ॥

वीणा हि बहुतन्त्रीका बहुतन्त्रीस्तु कन्धरा ॥

यापोःकिद्धेच॥३-१५७॥[1] यीरश्वे च मार्गे च दीर्घयष्टयग्रजन्मनोः ॥ ४३१ ॥

पपीस्तु कथितो हस्तिन्यादित्ये च हिमद्युतौ ।

लक्ष्मेर्मुट् च ॥ ३-१५८ ॥[2] मुक्चेति केचित् ॥

लक्ष्मीस्त्रिवर्गसंपत्तिशोभापद्मासु कथ्यते ॥ ४३२ ॥

स्यादेकवचनान्तोऽयमुरःप्रभृतिषु श्रितः ।
बहुव्रीहेर्वा द्विबहु वचनान्तादतोऽत्र कप् ॥ ४३३ ॥

इति श्रीधरवंश्येन रचिते पेरुशास्त्रिणा ।
तृतीयपादः पूर्णोऽयमौणादिकपदार्णवे ॥

१. Pā. V-iv-159. २. Pā V-iv-151.

अथ चतुर्थः पादः ॥

वातप्रमीः ॥ ४—१ ॥

वातप्रमीर्वातमृगे शमीवृक्षे हयेऽपि च ।
स्त्रीपुंसयोरयं स्त्रीत्वे ङीषप्यस्यादिकः परः ॥ १ ॥

कृदिकारादिति भवेदिति केचन मन्वते ।
कारप्रत्ययसम्बन्धस्तत्कालस्यैव बोधकः ॥ २ ॥

इतिनैव मुनित्रय्योपदिष्टमिति तन्मतम् ।
वातप्रमीश्रीलक्ष्मीति पक्षेऽङ्यन्तात्सुसाधकाः[धवः] ॥

इति रक्षितवाग्वृत्तिरप्यत्रार्थेऽनुसारिणी ।
आशीराश्यहिदंष्ट्रायां लक्ष्मीर्लक्ष्मी हरिस्त्रियाम् ॥ ४ ॥

इति द्विरूपकोशोक्तिरप्यत्रोदाहृतिक्षमा ।
तेनाशीविषशब्दोऽपि साधु...[सं]गच्छत[ते]तराम् ।
आशीःशब्दः सकारान्तोऽप्यस्ति सर्वत्र संमतः ॥ ५ ॥

ऋतन्यञ्जिवन्यञ्जर्पि-मद्यत्यङ्किकुयुकृशिभ्यः कलिज्यतुजलिजिषु-जिष्णुजिसन्यस्यनिथि-न्नुल्यसासानुकः॥४-२॥

द्वादश धातवः । अत्र प्रत्ययभेदेषु मतभेदात् सूत्रपाठभेदः ।
आद्यस्य निरनुबन्धकस्य पाठादात्मी[दत्नी]यतुजित्यादि ।
इष्ठचः स्थाने इष्णुच् पठ्यते । इन्स्थाने इशन् । इथिन्स्थाने
इथिः । उल्यनन्तरं असल्यस्थाने अचः अषो वा ।
तदनन्तरस्य आस इति दीर्घादिः,अस इति ह्रस्वादिर्वा ।
उभयथापि न सन्धिविशेषः । तथा च "ऋतन्यञ्जि-
वन्यञ्ज्यर्पिमद्यत्यङ्किकुयुकृशिभ्योऽलियतुजलिजिषुजिष्णु-
जिशन्स्यन्मिथ्युल्यचासानुकः अषासानुक इति वा ॥

रत्निः करे बद्धमुष्टौ दशपाद्यां त्वसावकित् ।
अरत्निशब्दस्तु तथा स्यात्करे प्रसृताङ्गुलौ ॥ ६ ॥

एनं कतिपये धीराः कूर्परेऽपि प्रयुञ्जते ।
प्रागुक्तरीत्या तु नञा समासे सिध्यतीदृशः ॥ ७ ॥

१. Gaṇasūtra under IV-i-45.

तन्यतुर्घनवार्ताकरात्रिष्वशनिशब्दयोः ।
अञ्जलिस्तु पुमान् हस्तसंपुटे कुडवेऽपि च ॥ ८ ॥

द्विगावतद्धितलुकि द्व्यञ्जलिर्व्यञ्जलीतिवत् ।
द्व्यञ्जलं व्यञ्जलमिति स्याद्विकल्पेन टज्विधेः ॥ ९ ॥

अञ्जलिः सर्ववन्द्यत्वात्सतन्नस्मिन्निति स्मृतः ।
शैकन्ध्वादिषु पाठेन गोनर्दीयः पतञ्जलिः ॥ १० ॥

स्थविरान्त्रे वनिष्टु स्यात् द्विपा सदृशचर्मणि ।
अञ्जिष्ठो दहने भानौ सलिलेऽपि च सर्पिषि ॥ ११ ॥

अत्रार्थेऽञ्जिष्णुरित्येवमिष्णुच्पाठे प्रसिध्यति ।
अम्रमांसेऽर्पिसो दन्त्यसान्वितः प्रत्ययो ह्ययम् ॥ १२ ॥

तालव्यशं वदन्तोऽन्ये त्वाहुर्म्रामार्द्रमांसयोः ।
मीने मत्स्योद्वयोर्देशभेदे पुंभूम्नि कथ्यते ॥ १३ ॥

स्त्रियां मत्सीति मत्स्यस्य ङ्यां यलोपविधानतः ।
पक्षिमैत्स्येति सूत्रोक्तेर्मात्स्यिको मत्स्यहन्तरि ॥ १४ ॥

अतिथिः कुशपत्रे स्यात्पुमानागन्तुके त्रिषु ।
नञ्बहुव्रीहिरूपेण स्मृतिष्वेष प्रसाधितः ॥ १५ ॥

यदा पृषोदरादित्वादकारो लुप्यते तदा ।
तिथिशब्दो भवेदेष द्वयोः प्रतिपदादिषु ॥ १६ ॥

स्यादातिथ्यमतिथ्यर्थेऽतिथेर्ञ्य इति सूत्रतः ।
अतिथौ साध्वातिथेयं स्यात्तिथ्यतिथिसूत्रतः ॥ १७ ॥

अङ्गुलिः करशाखायां कर्णिकायां गजस्य च ।
अस्य तत्पुरुषे संख्यैव्ययादेर्ङीब्वि[देष्टब्वि]धानतः ॥

१. Vārtika under I-i-64.
२. Pā IV-iv-35.
३. Pā. V-iv-26.
४. Pā. IV-iv-104.
५. Pā. IV-i-26.

ज्ञेयमेकाङ्गुलं दारु निरङ्गुलमिति क्रमात् ।
दारुण्येव बहुव्रीहौ षचि पञ्चाङ्गुलं स्मृतम् ॥ १९ ॥

अङ्गुलीयं तत्र भवेज्जिह्वामूलाङ्गुलेश्छतः ।
मनुष्यनामतष्ठच्चेत्स्यात् षडङ्गुलिदत्तकः ॥ २० ॥

ठाजादिवचनाल्लोपे षडिकः परिकीर्तितः ।
कवसः कोकिले काले अचमाहुरिहापरे ॥ २१ ॥

कवचो गर्दभाण्डे च सन्नाहे पर्पटेऽपि च ।
मत्वर्थीय इनावस्मात्कवची वर्मिणि स्मृतः ॥ २२ ॥

ठञ्विधानात् कवचिनां गणे कावचिकं भवेत् ।
मूर्धन्यषान्वितमषं वदन्ति कतिचित्तदा ॥ २३ ॥

कवषः क्रोधने शब्दकारेऽपि परिकीर्तितः ।
भवेद्यवासः कार्पासे धन्वयासौषधावपि ॥ २४ ॥

ह्रस्वादौ प्रत्यये केचित्तृणे यवसमूचिरे ।
असच्प्रकरणे बाहुलकादेष निरूपितः ॥ २५ ॥

कृशानुः स्यात्पुमान् वह्नावादित्येऽपि च विश्रुतः ॥
शर्करा खण्डविकृतावुपलाकर्परांशयोः ॥ २६ ॥

अः करन् ॥ ४-३ ॥

रोगभेदेऽपि शकले स्त्रियां विद्वद्भिरुच्यते ।
शैर्कराया वेति चातुरर्थिकस्यात्र वा लुपि ॥ २७ ॥

वोक्तिसामर्थ्यलब्धाणः पक्षे च श्रवणे सति ।
ठक्षयोरक्र्[ठक्चयोरपि ठक्]छौ
चेत्येतैत्सूत्रोक्तयोः सतोः ॥ २८ ॥

कुमुदादौ वराहादौ पाठात्पक्षे च ठच्ककोः ।
शर्करा शार्करं शार्करिकं च विबुधैः स्मृतम् ॥ २९ ॥

१. Pā. IV-ii-83. २. Pā. IV-ii-84.

शर्करीयं शर्करिकं तथा शार्करकं क्रमात् ।
सिकैताशर्कराभ्यां चेत्यणि मत्वर्थदर्शिते ॥ ३० ॥
शर्करायुक्तमध्वादौ शार्करं त्रिषु कथ्यते ।
देशे लुबिलचौ चेति चोक्तेरण्मतुपोरपि ॥ ३१ ॥
शर्कराः सन्ति देशेऽस्मिन्नित्यर्थस्य विवक्षणे ।
स्युः शर्कराः शर्करिलः शार्करः शर्करावता ॥ ३२ ॥
शर्करावच्छब्देन सहेति शेषः ॥
इवार्थे शर्करादिभ्योऽण् शर्करेवेति शार्करम् ।
प्रत्ययादेः ककारस्य नास्येत्संज्ञा लशौ किति ॥ ३३ ॥
पुषःकिदित्युत्तरत्रैवास्य कित्त्वानुशासनात् ॥

पुषः कित् ॥ ४-४ ॥ पुष्करं पङ्कजे व्योम्नि पयःकरिकराग्रयोः ॥ ३४ ॥
औषधद्वीपविहगतीर्थरागोरगान्तरे ।
तूर्यवक्त्रेऽपि कथितं काण्डे खड्गफलेऽपि च ॥ ३५ ॥
इनिना पुष्करादिभ्यो देश इत्यत्र पुष्करी ।
स्त्रीत्वे पुष्करिणी वाप्यामृन्नेर्भ्यो ङीब्विधानतः ॥ ३६ ॥
पुष्करे सीदतीत्यर्थादुक्तः पुष्करसन्मुनिः ।
इञा पौष्करसादिः स्याद्वृद्ध्यादित्वात्तदात्मजे ॥ ३७ ॥
वृद्धिः पदद्वयेऽत्रानुशतिकादिषु पाठतः ॥

कलञ्च ॥ ४-५ ॥ पुष्कलस्त्रिषु पूर्णे च श्रेष्ठे च परिकीर्तितः ॥ ३८ ॥

गमेरिनिः ॥ ४-६ ॥ कालान्तरे यो गमिष्यन् स गमी परिकीर्तितः ।
समासोक्तिप्रकरणे द्वितीयायाः श्रितादिभिः ॥ ३९ ॥
गम्यादेरुपसंख्यानादुक्तो ग्रामगमी बुधैः ॥

आङि णिच् ॥ ४-७ ॥ आयतावागमिष्यन् यः स त्वागामी निगद्यते ॥ ४० ॥

१. Pā. V-ii-104.
२. Pā. V-iii-105.
३. Pā. V-iii-107.
४. Pā. I-iii-8.
५. Pā. V-ii-135.
६. Pā. IV-i-5.
७. Pā. IV-i-96.
८. Pā. VII-iii-20.
९. Pā. II-i 26.

भुवश्च ॥ ४-८ ॥ कालान्तरे भविष्यन् यः स भावी परिकीर्तितः ॥
प्रे स्थः ॥ ४-९ ॥ प्रस्थास्यमानो यस्तत्र प्रस्थायी कथितो बुधैः ॥

परमे किच्च ॥ ४-१० ॥ परमेष्ठी विरिञ्चौ च पुंसि स्यात्परमेश्वरे ।
हेलदन्तादितीहालुक् षत्वं स्थाथीति वार्तिकात्[1] ॥ ४२ ॥

मन्थेः ॥ ४-११ ॥ मन्था मथनदण्डे ना वज्रे वाते बृहस्पतौ ।
स्यादात्वमत्र पथिमन्थ्यृभुक्षामादिति स्मृतेः[2] ॥ ४३ ॥

दो दं[थोन्थ]इत्यत्र सूत्रेण दस्य[थस्य]दादेश[आदेश] ईरितः
भत्वे तु भस्य टेर्लोप इति टेर्लोप ऊह्यताम् ॥ ४४ ॥

ऋन्नेभ्यो ङीपि तेनात्र सुमथी सिध्यति स्त्रियाम्[3] ॥

पतः स्थ च ॥ ४-१२ ॥ लब्धवर्णैः पुंसि पन्थाः पदव्यां परिकीर्तितः ॥ ४५ ॥

आत्वादिमथिवत्सर्वमत्र शब्दे विचिन्त्यताम् ।
पथको वुन्विधौ तत्र[4] कुशलः पथ इत्यतः ॥ ४६ ॥

पन्थानं गच्छतीत्यर्थे पथिकः स्यात्पथः ष्ठनि ।
स्त्रियां तु पथिकी षित्वात्[5] षिद्गौरादिति ङीष्विधेः ॥

नित्यं गच्छति पन्थानं यस्तु तत्र निगद्यते ।
पन्थो णे[6] नित्यमिति णे पान्थः पान्था स्त्रियां हि टाप् ॥

उत्तरपथेन गच्छति यो यस्तेनाहृतश्च तत्र ठञा ।
औत्तरपथिकः स्त्री त्वौत्तरपथिकी ङीपि टिड्ढेति[7] ॥

सूत्रं त्विहोत्तरपथेनाहृतं चेत्युदाहृतम्[8] ।
वारिजङ्गलकान्तारस्थलशङ्कजपूर्वकात्[9] ॥ ५० ॥

१. Pā. VI-iii-9.
२. Vā. VIII-iii-97.
३. Pā. VII-i-85.
४. Pā. VII-i-87.
५. Pā. VII-i-88.
६. Pā. IV-i-5.
७. Pā. V-ii-63.
८. Pā. IV-i-41.
९. Pā. V-i-76.
१०. Pā. IV-i-15.
११. Pā. V-i-77.
१२. Vā. V-i-77.

पथोऽस्मिन्नुपसंख्यानाद्वुन्गच्छत्याहृताद्वयोः[र्थयोः] ।
बुधैरुक्तस्ततो वारिपथिकाद्याः परेऽपि षट् ॥ ५१ ॥
मधुकं वा मरिचं वा[?]स्थलपूर्वादपि पथो विहिते ।
स्थूलपथ[स्थलपथिक]मिति प्रकथितमुदीरितार्थद्वये विबुधैः
चतुरर्थ्यावुञ्छणादिसूत्रपक्षादिमध्यगात् ।
पान्थायनः पथः[1]पन्थ चेति सूत्रात्फका भवेत् ॥ ५२ ॥
जाते पैथः पन्थ चेति सूत्रेण वुनि पन्थकः ।
ढञि पैथ्यतिथीत्येवं पाथेयं पथि साधुनि ॥ ५४ ॥
पथोऽनपेते पथ्यः स्याद्धर्मपथ्यर्थसूत्रतः ।
पथ्यं पथि भवेऽपि स्याद्दिगादिभ्यो[5]यदीरणात् ॥ ५५ ॥
यः शतपथमधीते वेद च षिकना भवेत्स शतपथिकः ।
षष्टिपथिकोऽपि तद्वत् स्त्री शतपथिकी च षष्टिपथिकी च ॥
ऋक्पूरब्धूरिति पथः समासान्तानुवर्णनात् ।
सर्वेष्वपि समासेषु प्रोक्ता राजपथादयः ॥ ५७ ॥
पथ्यन्ताज्जातत्पुरुषाद्वा समासान्तशासनात् ।
पैथो विभाषेति सूत्रे स्यादपन्थास्तथापथम् ॥ ५८ ॥
अपथं त्वव्ययीभावे बहुव्रीहौ स्मृतोऽपथः ।
पथं संख्याव्ययादेरित्यनेन क्लीबताविधेः ॥ ५९ ॥
त्रिपथं विपथं चेत्याद्युच्यते विबुधैरिह ।
पथशब्दस्यात्र कृतसमासान्तस्य दर्शनात् ॥ ६० ॥
सुपन्था अतिपन्था इत्यत्र न क्लीबता भवेत् ।
न पूंजनादिति ह्यत्र समासान्तो निवारितः ॥ ६१॥

१. Pā. IV-iii-29.
२. Pā. IV-iii-29.
३. Pā. IV-iv-104.
४. Pā.IV-iv-92.
५. Pā. IV-iii-54.
६. Pā. V-iv-74.
७. Pā. V-iv-72.
८. Pā. IV-i-26.
९. Pā. V-iv-69.

काभावे कापथं का पथ्यैक्षयोरिति के स्मृतः।
अकारान्तः पथोऽप्यस्ति समासान्तं विनाध्वनि ॥६२॥

पुंसि तेन समासे तु पुँल्लिङ्गा विपथादयः।
पुँल्लिङ्गे कापथे काकोरीषैदर्थे च सूत्रतः ॥ ६३ ॥

परवल्लिङ्गतावाधिक्कीबत्वं हि पथादिषु।
बहुव्रीहौ न भवति विपथा नगरीति दिक् ॥ ६४ ॥

अर्तेर्भुक्षिनक् ॥४-१३॥ ऋभुक्षाः पुंसि कथितो देवराजे विचक्षणैः।
आत्वादि मघिवत्सर्वमत्रान्थादेशवर्जितम् ॥ ६५ ॥

ऋभुक्षिसाधकं सूत्रं दशपादीमते स्थितम्।
अत्र तृज्ज्वलदत्ताद्याः समासेनैनमूचिरे ॥ ६६ ॥

क्षियन्ति ऋभवो देवा अस्मिन्निति विवक्षिते।
डप्रत्यये स्वर्गवज्ज्ञवाच्यृभुक्षो भवेत्ततः ॥ ६७ ॥

मत्वर्थीयइनासिद्ध्येदृभुक्षा इति तद्वति ॥

खजेराकः ॥ ४-१४ ॥ खजाकः स्यात्पुंसि दध्नो विकारे विहगान्तरे ॥ ६८ ॥

खजाका तु स्त्रियां दर्व्यां बन्धक्यामपि कथ्यते ॥

बलाकादयश्च ॥४-१५॥ बलाका बकपङ्क्तौ च बिसकण्ठ्यां च वर्तते ॥ ६९ ॥

कामुक्यामप्यथ पुमान् बलाको बकपक्षिणि।
शलाका शस्यमदनशालिकाशल्लकीषु च ॥ ७० ॥

पताका वैजयन्त्यां च सौभाग्येऽङ्के ध्वजेऽपि च।
व्रीह्यादित्वादिनावस्मात्पताकी वैजयन्तिके ॥ ७१ ॥

आकान्ताः केचिदन्येऽपि बलाकादिषु कीर्तिताः ॥

पिनाकादयश्च ॥४-१६॥ पिनाकोऽस्त्री रुद्रचापे पांसुवर्षत्रिशूलयोः ॥ ७२ ॥

१. Pā. VI-iii-104.
२. Pā. VI-iii-105.
३. Pā. V-ii-116.

इनिना तु भवेदस्मात् पिनाकी चन्द्रशेखरे ।
पद्माकरे तडाको ना प्रोक्तो मध्यतृतीयकः ॥ ७३ ॥

पिण्याकः सिरहके हिङ्गौ तिलचूर्णे च कुङ्कुमे ।
पिण्याकशब्दः सिद्धोऽयं पिषेर्णत्वे युगागमे ॥ ७४ ॥

पिडागमे तु नयतेः पिन्याक इति दन्त्यवान् ।
पिनाकादाविताऽन्येऽपि ज्ञेया एवंविधा बुधैः ॥ ७५ ॥

कषिदूषिभ्यमीकन् ॥ ४-१७ ॥

कषीका पक्षिजातौ स्त्री मक्षिकायामपि स्मृता ।
दूषीका तूलिकायां स्यादपि लोचनयोर्मले ॥ ७६ ॥

ण्यन्तादूदुषेः स्याद[दिः]····सैन्ये[?]दूषिर्दूषी तु कीर्त्यतः।
उभाभ्यां खनिते [कनि तु]स्वार्थे ह्रस्वमध्यैव दृषिका ॥

ह्रस्वस्तु केऽणै इत्येवं सूत्रेणात्र विचिन्त्यताम् ॥

अनिहृषिभ्यां किच्च ॥ ४-१८ ॥

अनीकोऽस्त्री रणे सैन्ये नीरिवन्यसौनितः[?] ॥ ७८ ॥

हृषीकमिन्द्रिये क्लीबं हृषीकेशस्तु केशवे ॥

वक्रकर्णेः कक्रुण च ॥ ४-१९ ॥

घण्टिकायां कक्रणीका सैव प्रतिसरापि च ॥ ७९ ॥

शृपृवृभ्यां ह्रे रुकचाभ्यासस्य ॥ ४-२० ॥

शर्शरीकस्तु हिंस्रेऽश्वे मल्लस्याभरणेऽपि च ।
पर्परीकस्तु भक्ष्येऽग्नौ घुमणौ च जलाशये ॥ ८० ॥

वर्वरीको वक्रकेशे तथा स्यात्केशसंचये ॥

पर्फरीकादयश्च॥४-२१॥ पर्फरीकं किसलये पालकस्तोत्रभेत्तृषु ॥ ८१ ॥

स्फुरतेर्वा फलेः पर्वेः पृणातेर्वा निपातनात् ।
अर्थापयामासुरार्या मन्त्रभाष्ये यथोचितम् ॥ ८२ ॥

दर्दरीकं तु वादित्रे झर्झरीकं तु विग्रहे ।
तित्तिडीका चिञ्चिकायां चञ्चरीको मधुव्रते ॥ ८३ ॥

1. Pā. VII-iv-13.

चरेर्नुं चेति हि नुमा प्राक्प्राप्तो रुगपोदितः ।
मर्मरीको हीनजने कर्करीका गलन्तिका ॥ ८४ ॥

कर्करीत्यपि तत्र स्यात्तित्तिडीत्यग्लिकार्थवत् ।
बहुलोक्तेः कादिलोपह्रस्वङीषां प्रवर्तने ॥ ८५ ॥

अनयोः शब्दयोरत्र व्युत्पत्तिरुपजायते ।
अन्ये तु कर्करीशब्दमनुवृत्त्या प्रचक्षते ॥ ८६ ॥

पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे ।
पुंसि व्याघ्रेऽग्निदिङ्नागे कोशकारान्तरेऽपि च ॥ ८७ ॥

ईकारान्ताः पर्फरीकादि[रीके]ष्वन्येऽप्यूह्या विपश्चिता ॥

ईषेः किद्ध्रस्वश्च ॥४-२२॥ शलाकायामिषीकादि दीर्घोऽपि बहुलोक्तितः ॥ ८८ ॥

ऋजेश्च ॥ ४-२३ ॥ बुधैरुपहते प्रोक्तमृजीकमभिधेयवत् ॥

सर्तेर्नुम् च ॥ ४-२४ ॥ लालायान्तु सृणीका स्त्री पुंस्यग्नौ च समीरणे ॥८९॥

मृडेः कीकच्ककङ्कणौ ॥ ४-२५ ॥ मृडीकस्तु मृगे प्रोक्तः शिशौ तु स्यान्मृडङ्कणः ॥

अलीकादयश्च ॥४-२६॥ अलीकमप्रिये पापे वितथेऽपि प्रकीर्तितम् ॥ ९० ॥

व्यलीकमप्रियाकार्ये वैलक्ष्येष्वपि पीडने ।
ना नागरे व्यलीकं तु पटलप्रान्त इष्यते ॥ ९१ ॥

क्लीबे पुंसि च वल्मीकं वामलूरौ चरुर्भिर्दि च [रुग्भिदि] ।
वाहीको वाहके वृद्धौ वाहे गवि च कथ्यते ॥ ९२ ॥

इणस्सुप्रतिपूर्वात्तु सुप्रतीको गजान्तरे ।
शमीकस्त्वृषिभेदे स्यादलीकादिरितीह दिक् ॥ ९३ ॥

कृतृभ्यामीषन् ॥४-२७॥ पुंसि क्लीबे च कथितः करीषः शुष्कगोमये ।
सर्वकूलोभ्रसूत्रेण स्यात्करीषं कषः खचि ॥ ९४ ॥

स्तम्भे दक्षे तरीषः स्याद्व्यवसाये तरीतरि ॥

शृपृभ्यां किच्च ॥४-२८॥ शिरीषो वृक्षभेदे ना पुरीषं विशि न द्वयोः ॥ ९५ ॥

१. Pā. III-ii-42.

अर्जेः ऋज च ॥४-२९॥ ऋजीषं पिष्टपचन उदपाने वने तथा ।
निष्पीडितरसे सोमलताशेषे च कथ्यते ॥ ९६ ॥

अंबरीषं ॥ ४-३० ॥ अम्बरीषं रणे राष्ट्रे क्लीबं पुंसि नृपान्तरे ।
नरकस्य प्रभेदे च किशोरे भास्करेऽपि च ॥ ९७ ॥

आम्रातकेऽनुतापे च स्यात्खण्डपरशावपि ॥
कृशपृकटिपटिशौटिभ्य ईरन् ॥ ४-३१॥ वशाङ्कुरे करीरोऽस्त्री वृक्षभिद्वटयोः पुमान् ॥ ९८ ॥

करीरा चीरिकायां स्त्री दन्तमूले च दन्तिनाम् ।
वपुष्यस्त्री शरीरं स्यात्परे द्रव्येऽपि कथ्यते ॥ ९९ ॥

फले परीरं दर्यान्तु कटीरो जघनेऽपि च ।
पटीरश्चन्दनरसे कन्दुके [कण्टके] कार्मुके स्मरे॥ १०० ॥

शौटीरस्तु भवेद्वीरे दानशौण्डेऽप्ययं स्मृतः ।
ब्राह्मणादिष्यञि त्वस्माच्छौटीर्यं भावकर्मणोः ॥ १०१ ॥

हिण्डीरप्रमुखाश्शब्दास्सन्ति बाहुलकादिह ।
हिण्डीरोऽब्धिकफे हिण्डेर्गत्यनादरवाचिनः ॥ १०२ ॥

द्विरूपकोशसंमत्या डिण्डीरोऽप्यत्र दृश्यते ।
किर्मीरो नागरङ्गे च कर्बुरे राक्षसान्तरे ॥ १०३ ॥

जम्बीरः प्रस्थपुष्पाख्यस्तथा दन्तशठेऽपि च ।
तूणीरस्तु निषङ्गे स्यादूह्या एवंविधाः परे ॥ १०४ ॥

वहेः कित् ॥ ४-३२ ॥ उशीरं वीरणतरोर्मूले स्यात्पुंनपुंसकम् ।
किंसरादिभ्यःछनुक्तेरुशीरं पण्यमस्य चेत् ॥ १०५ ॥

भवेदुशीरिकः पुंसि ङीषि स्त्री स्यादुशीरिकी ।
षितः प्राग्वहतीयेषु प्रत्ययास्सप्तमी[?]स्मृताः ॥ १०६ ॥

कशेर्मुट् च ॥ ४-३३ ॥ देशभेदे तु कश्मीरस्तस्मादणि तु शैषिके ।
काश्मीरं कुङ्कुमे प्रोक्तं टङ्कपुष्करमूलयोः ॥ १०७ ॥

1. Pā. IV-iv-53.

ऊ[कुञ्] उच्च ॥ ४-३४ ॥ कुरीरं मैथुने क्लीबं कम्बले च निगद्यते ।
लत्वे कपिलकादित्वात्कुलीरः कर्कटे स्मृतः ॥ १०८ ॥

घसेः किच्च ॥ ४-३५ ॥ क्षीरं तु न द्वयोर्दुग्धे सलिलेऽपि प्रकीर्तितम् ।
क्षैरेयं तत्संस्कृतं यत्क्षीरे क्षीराड्ढञित्यतैः ॥ १०९ ॥
अभक्षेऽपि यवाग्वादौ स्याद्रूक्षा इत्यनाश्रयात् ॥

गभीरगम्भीरौ ॥४-३६॥ निम्ने गभीरगम्भीरौ स्यातामचपलेऽपि च ॥ ११० ॥
गम्भीराञ्ञ्य इति ञ्येन गाम्भीर्यं तद्भवे त्रिषु ।
ब्राह्मणादिष्यञा क्लीबमेतत्तद्भावकर्मणोः ॥ १११ ॥
ष्यञः षित्त्वेन ङीष्यत्र गाम्भीरी कथ्यते स्त्रियाम् ॥

विषा विहा ॥ ४-३७ ॥ विषा बुद्धौ विहा स्वर्गे भवेतामव्यये इमे ॥ ११२ ॥

पच एलिमच् ॥४-३८॥ पचेलिमो वह्निरन्योः कर्तरि प्रत्ययो ह्यसौ ॥

शीङो धुग्लग्वलञ्-
वालञः ॥ ४-३९ ॥ पुंनपुंसकयोश्शीधुरर्धर्चादिः सुराभिदि ॥ ११३ ॥
गौपोष्टगिति सूत्रेण मधुपो मद्यपायिनि ।
शीलं स्वभावे सद्वृत्ते स्वार्थेष्यञि तु सत्यतः ॥ ११४ ॥
ङीषि शैलीत्यपि भवेज्जलनीव्यां तु शैवलः ।
प्रकोष्ठं [?] शैवले क्लीबे शैवालमपि शैवले ॥११५॥
वस्य बाहुलकात्पत्वे शैपालं शैपलञ्च सः ॥

मृकणिभ्यामूकोकणौ
॥ ४-४० ॥ मरूकः कोकमण्डूकमृगेष्वपि शिखावले ॥ ११६ ॥
काणूकः पुंसि काके च श्रेयस्यपि निगद्यते ॥

वलेरूकः ॥ ४-४१ ॥ भवेदुत्पलमूले च वलूको विहगेऽपि च ॥ ११७ ॥

उलूकादयश्च ॥४-४२॥ उलूकः कुरुयोधे स्यात्पेचके जम्भभेदिनि ।
वदेर्यङन्तादूकश्चेद्वावदूकः प्रवक्तरि ॥ ११८ ॥
कुर्वादित्वादपत्येऽस्माद्वावदूक्य इति स्मृतः ।
वदेरूकोऽपि तत्रत्यपाठादस्येति मन्वते ॥ ११९ ॥

१. Pā. IV-ii-20.
२. Pā. IV-iii-58.
३. Pā. III-ii-8.
४. Pā. IV-i-151.

शमेर्बुक् च ॥ ४-४३ ॥

शम्बूको गजकुम्भाण्डे[म्भान्ते] दैत्यभेदेऽपि हिंसके ।
जलशुक्तौशु····मुक्तत्विहबाहुलकादुके ॥ १२० ॥

शम्बुको ह्रस्वमध्यः स्यादेवं जम्बूकजम्बुकौ ।
भवेतां फेरवे नीचे प्रतीचीदिक्पतावपि ॥ १२१ ॥

बन्धूको बन्धुजीवे स्यादप्यसौ पीतसारके ।
भल्लूकः स्यादच्छभल्ले ह्रस्वमध्योऽपि भल्लुकः ॥१२२॥

उलूकादिष्वमी चान्येऽप्येवमूह्या विपश्चिता ॥

शलिमण्डिभ्यामूकण् ॥ ४-४४ ॥

कन्दे सौगन्धिकादीनां शालूकमिति कथ्यते ॥१२३॥

मण्डूको बन्धभेदेऽपि दर्दुरे शोणकेऽपि च ।
मण्डूकीति तु मण्डूकपर्ण्यां मण्डूकयोषिति ॥ १२४ ॥

माण्डूकेयश्च माण्डूको माण्डूकिरिति च त्रयः ।
अपत्ये ढकञ मैण्डूकादिति वा ढगणोरिञि ॥ १२५ ॥

माण्डूकायन्यणि स्त्रीत्वे ष्फविधानेन सिद्ध्यति ।

नियो मिः ॥ ४-४५ ॥

नेमिर्ना तिनिशे कूपत्रिकाचक्रान्तयोः स्त्रियाम् ॥१२६॥

नक्षत्रनेमी रेवत्यां स्त्री ना विष्णौ हिमद्युतौ ।
नेमिं श्यति प्रदेशोऽयमिति नेमिश उच्यते ॥ १२७ ॥

तत्संबन्धादरण्यं च नैमिशं शैषिकादणः ।
अयं बाहुलकादन्यत्रापि मिप्रत्ययो भवेत् ॥ १२८ ॥

या प्रापणे जै क्षये चेत्वाभ्यामस्मिन्प्रवर्तिते ।
उभे स्त्रियौ यामिजामी स्यातां स्वसृकुलस्त्रियोः ॥१२९॥

अर्तेरूच ॥ ४-४६ ॥

ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः ।
वस्त्रसङ्कोचरेखायां वेदनापीडयोरपि ॥ १३० ॥

गतिभेदे तुरङ्गाणामपि विद्वद्भिरुच्यते ॥

भुवः किच्च ॥ ४-४७ ॥

स्थानमात्रे च विबुधैर्भूमिर्भुवि च कथ्यते ॥ १३१ ॥

भूमिजो जनकेऽङ्गारे तयोर्भौमः शिवौषधि ।
सीतायां भूमिजा भौमी जातिर्ङीषि स्त्रियामुमे ॥१३२॥

कृष्णोदक्पाण्डुसंख्यौषा भूमेरच्प्रत्ययस्मृतेः ।
कृष्णभूम उदग्भूमः पाण्डुभूमो द्विभूमवत् ॥ १३३ ॥

यथोचितसमासार्थवर्णनेनावगम्यताम् ॥

अरे रश्च [अश्नोते रश्च] ४-४८ ॥ प्रग्रहे च मयूरे च रश्मिः पुंस्यभिधीयते ॥ १३४ ॥

दल्मिः ॥ ४-४९ ॥ दल्मिरिन्द्रायुधे चेन्द्रेऽप्यायुधे च निगद्यते ॥

वीज्याज्वरिभ्यो निः ॥ ४-५० ॥ वेणिः स्यात्कचबन्धेऽपि नदीनां मेलनेऽपि च ॥१३५॥

देवताकेऽपि णत्वं तु भवेद्बाहुलकादिह ।
त्रिवेणी त्रिवणं चेति शिवादिगणसूत्रतः ॥ १३६ ॥

त्रैवणं तदपत्ये स्यादणर्थोक्तसमासतः ।
ज्यानिः स्त्रियां वृद्धिहानिप्रभावेषु सरित्यपि ॥१३७॥

जूर्णिः स्त्रियां भवेद्रोगे सूर्येऽग्नौ च पुमानयम् ॥

सृवृषिभ्यां कित् ॥४-५१ सृणिः स्यादङ्कुशेऽग्नौ च सलिलेऽपि समीरणे ॥१३८॥

वृष्णिस्तु यादवे मेषे पाषण्डे चन्द्रमस्यपि ॥

अङ्केर्नलोपश्च ॥ ४-५२ ॥ चित्रके पावके गार्हपत्यादौ चाग्निरुच्यते ॥१३९॥

स्वाहायां च स्मृताम्नायी वृषाकप्यग्निशौसनात् ।
सर्वत्राग्निर्कलिभ्यां ढगिति वार्तिकशासनात् ॥ १४० ॥

प्राग्दीव्यतीयेष्वर्थेषु स्यादाग्नेयं विशेष्यवत् ।
अग्नायी देवतास्येत्यप्याग्नेयं पुंवदुक्तितः ॥ १४१ ॥

वार्तिके पर्युदासार्हैः स्त्रीभ्यो ढगिति ढग्यतः ।
देवताद्वन्द्वनिर्वृत्तौवीदग्नेरिति शासनात् ॥ १४२ ॥

१. Pā. IV-i-112.
२. Vā. V-iv-75.
३. Pā. IV-i-37.
४. Vā. IV-i-86.
५. Pā. IV-i-120.
६. P. VI-iii-27.

अग्नीषोमाविवावग्नीवरुणाविति चोच्यते ।
ईद्वृद्धाविति चेदाग्निमारुतं चाग्निवारुणम् ॥ १४३ ॥
आग्नावैष्णवमित्यत्र नेत्वं विष्णौ निषेधतः ।
उक्तेषु देवतोद्वन्द्वे चेति वृद्धिः पदद्वये ॥ १४४ ॥
आनङ् च देवताद्वन्द्वे चेत्याग्नावैष्णवस्थके ।
आग्नेन्द्रमिति नेन्द्रैस्य परस्येति निषेधतः ॥ १४५ ॥
उत्तरस्मिन् पदे वृद्धेरिदूर्वृद्धाविति नापतेत् ।
इत्वेनालौकिके वाक्य आनङीत्वं च बाध्यते ॥१४६॥
अबाधे लौकिकेऽप्याप्त्या न सिध्येदाग्निवारुणम् ।
दीर्घाच्च वरुणस्येति परवृद्धिनिषेधतः ॥ १४७ ॥
अग्निष्टुदग्निष्टोमोऽग्नीषोमाविति च षत्वतः ।
अग्निष्टोमः क्रतौ मुख्यः तद्ग्रन्थे त्वस्य लक्षणा ॥१४८॥
वेदेत्याद्याद्द्वितीयस्मादधीत इति चेदपि ।
क्रतूक्थादीति सूत्रेण स्यादाग्निष्टोमिकष्ठकि ॥ १४९ ॥
यतः क्रतुविशेषाणां सूत्रे तत्रोपसङ्ग्रहः ।
यस्त्वग्निमिन्धे तत्राग्नीदाग्नीध्रं शरणे ततः ॥ १५० ॥
अग्नीधः शरणे रैण् भत्वं चेति ह्यनुशासनम् ।
अग्नीदप्युपचारेण तत्स्थ्यादाग्नीध्र उच्यते ॥१५१॥
आग्नीध्रसाधारणौदन्याग्नीध्री स्वार्थिके स्त्रियाम् ।
अग्निमिन्धोममाग्नाष्ट्राग्न्योरिन्ध इति सूत्रतः [वार्तिकात्]
सुपि स्थ इति केऽनिष्ठः षत्वमम्बाम्बसूत्रतः ।
अंगो चेरिति सूत्रेण किपि सत्यग्निचिद्भवेत् ॥१५३॥

१. P. VI-iii-28.
२. Pā. VII-iii-21.
३. Pā. VII-iii-22.
४. Pā. VI-iii-28.
५. Pā. VII-iii-23.
६. Pā. IV-ii-63.
७. Vā. IV-iii-120.
८. Vā. VI-iii-70.
९. Pā. III-ii-4.
१०. Pā. III-ii-91.

चित्यैाग्निचित्ये चेत्यग्निचित्याग्निचयने स्मृता ॥

वह्निश्रिश्रयुद्रुग्लाहात्व-रिभ्यो नित्॥४-५१॥

नव [?]धातवः ॥

हये वृषे चित्रकेऽग्नौ वह्निर्विद्विड्भिरुच्यते ॥ १५४ ॥

श्रेणिः पङ्क्तौ सेकपात्रे सजातौ शिल्पिसंघतौ ।
अच्याच्य[च्विच्च्य]र्थसमासेन प्राहुः श्रेणिकृतं बुधाः ॥
निःश्रेणिस्त्वधिरोहिण्यां श्रोणिः स्यात्कटिमण्डले ।
योनिर्द्वयोर्भगे स्थाने कारणाकारयोरपि ॥ १५६ ॥
द्रोणिः काष्ठाम्बुवाहिन्यां ग्लानिर्हर्षक्षये स्त्रियाम् ।
अपाये हानिराख्याता तूर्णिस्तरसि कथ्यते ॥ १५७ ॥
हानिर्ग्लानिसमानार्था भवेद्धाहुलकादिह ॥

घृणिपृश्निपार्ष्णिचूर्णि-भूर्णि ॥ ४-५२ ॥

अंशुज्वालातरङ्गेषु घृणिरल्पतनौ तु ना ॥ १५८ ॥
पृश्निर्वर्णे तद्युक्ते त्वेन्नाष [द्युते चेदेष] त्रिषु निगद्यते ।
पार्ष्णिरुन्नतनार्यो स्त्री ना स्वय गुल्फयोरधः ॥ १५९ ॥
सिध्मादिपाठतस्तद्वान् पार्ष्णीलः स्याद्द्विदीर्घकः ।
पश्चाद्भागे सैन्यपृष्ठे चूर्णिर्गद्ये प्रकीर्तिता ॥ १६० ॥
कपर्दकशते शास्त्रे भूर्णिस्तु भुवि कथ्यते ।
धारके पोषकेऽप्येष मन्त्रभाष्ये तु दृश्यते ॥ १६१ ॥

वृदृभ्यां विन् ॥ ४-५३॥

वर्विः स्याद्धस्मरे वाच्यलिङ्गको धरणौ स्त्रियाम् ।
दर्विस्तु शकटे दारुहस्तकेऽपि प्रकीर्तिता ॥ १६२ ॥

जृशृस्तृजागृभ्यः किन् ॥ ४-५४ ॥

चत्वारो धातवः ॥

फल्गौ च चटके काये पर्शौ जीर्विर्निगद्यते ।
शीर्विः क्रिमौ च हिंस्रे चाध्वर्यौ स्तीर्विर्नगेऽपि च ॥
जातवेदसि भूपाले जागृविः परिकीर्तितः ॥

दिवो द्वे दीर्घश्चाभ्यास्तस्य ॥ ४-५५ ॥

वह्नौ स्वर्गे दीदिविर्ना धिषणे त्वेतदस्त्रियाम् ॥१६४॥

१. Pā. IV-i-132. २. Pā. V-ii-97.

कृविघृष्विरुछविस्थवि-किकीदिाव ॥ ४-५६ ॥

किकिदिवि इति सर्वह्रस्वो वा । पञ्च शब्दाः । षड्वा ॥

कृविस्तु तन्तुवायस्य द्रव्ये कारौ च कथ्यते ।
घृष्विस्तु सूकरे पुंसि सवने च हुताशने ॥ १६५ ॥

क्वचिच्छविः प्रकथिता स्त्रियां शोभारुचोरपि ।
स्थविः स्यात्तन्तुवायेऽपि पुमान्वायावजङ्गमे ॥ १६६ ॥

एकदीर्घाविमौ चाषे किकिदीविः किकीदिविः ।
विपर्यासो बाहुलकाद्विज्ञेयो ह्रस्वदीर्घयोः ॥ १६७ ॥

अन्ये किकिदिविं सर्वह्रस्वमेव बभाषिरे ।
एके तु किकिदीवी तु नामनी द्वे न्यरूपयन् ॥ १६८ ॥

किकिः पक्षिणि च प्राज्ञे दीविः श्वापदधूर्तयोः ॥

पातेर्डतिः ॥ ४. ५७ ॥

पतिर्धवे ना त्रिष्वीशे समासे घिर्न तु स्वतः ॥ १६९ ॥

संख्यासूत्रेणानडतेर्ग्रहणं न तु साम्प्रतः[?] ।
प्रसारणं तत्पुरुषेष्वज[षे ष्यङ]न्तस्य भवेदिह ॥१७०॥

कारीषगन्धीपत्यादिरस्योदाहरणं मतम् ।
प्राग्दीव्यतीयार्थेषु ष्यः पैत्युत्तरपदाद्यदि ॥ १७१ ॥

प्राजापत्यादयः शब्दाः स्युरपत्यादिवाचकाः ।
एष्वेवार्थेष्वाश्वपतादयः स्युरणि केचन ॥ १७२ ॥

एवं गाणपतं गाणपत्यं स्वार्थे ष्यञा स्मृतम् ।
पत्यन्तमात्रे यद्वा[यग्भा]वकर्मार्थो विहितो यतः ॥१७३

सैनापत्यादयस्तेन शब्दा विद्वज्जनैः स्मृताः ।
धवार्थाद्यज्ञसंयोगे स्त्रियां पत्नीति कथ्यते ॥ १७४ ॥

शूद्रपत्नीति शब्दस्तु सपूर्वत्वेन पाक्षिकः ।
न्यासः शूद्रस्य पत्नीति प्रयोगस्त्वौपचारिकः ॥ १७५॥

१. Pā. IV-i-85.

आचारार्थे क्विबन्तादञ्-
क्यङन्ताद्वा [न्ताच्च कर्त्रर्थे वा] भवेत् क्विपि ।
पत्नियौ पत्निय इति स्यादियङ् धातुसंज्ञया॥ १७६ ॥
उक्ताः सपत्न्यो वनिता भर्तुरैक्ये परस्परम् ।
नकारशासनान्नित्यंसपत्न्यादिषुमूत्रतः । ॥ १७७ ॥
व्यन्सपत्न इतीवार्थे निर्देशेनात्प्रवर्तनात् ।
अर्थे सपत्नी वेत्यस्मिन् सपत्नः कथितो रिपौ ॥१७८॥
ततः शार्ङ्गरवादित्वात्सपत्नी ङीनि कथ्यते ।
तदपत्ये तु सापत्नः शिवाद्यणि निगद्यते ।॥ १७९॥
ईशस्यैक्ये सपतयः सपत्न्यश्च....[स्युर]ङ्गनाः ।
नकारस्य विभाषा सपूर्वस्येत्यनुशासनात् । ॥ १८० ॥
इत्थं सपत्न्यपत्ये तु सापत्यः परिकीर्तितः ।
ण्ये दित्यदित्यादित्येति पुंवत्वे च भसंज्ञया ॥ १८१॥
ढञ्प्रत्यये पैथ्यतिथिवसतिस्वपतेरिति ।
स्वपतौ साध्विति ह्यर्थे स्वापतेयं धने स्मृतम्॥ १८२ ॥
पतिन्नीलक्षणे जायापत्योऽष्टगिति टग्वशात् ॥

शाकेर्ङ्कृतिन् ॥ ४. ५८ ॥ क्लीबे शकृत्पुरीषे स्याच्छसादावस्य वा शकन् ॥१८३॥
वत्से शकृत्करिः स्तम्बशकृतोरिनितीन्वशात् ॥

अमेरतिः ॥ ४. ५९ ॥ अमतिस्त्वनभिप्राये रुजायां चन्द्रकालयोः ॥ १८४ ॥

वहिवस्यर्तिभ्यः क्वित् ॥ ४. ६० ॥ वहतिर्वृषभे वायौ महामात्रे कुटुम्बिनि ।
वसतिस्तु निशि स्थित्यां जैनानामाश्रये गृहे ॥ १८५ ॥
ढञ्प्रत्यये पैथ्यतिथिवसतिस्वपतेरिति ।
वासतेऽयं तत्र साधौ भेद्यलिङ्गकमुच्यते ॥ १८६ ॥

1. Pā. IV-i-35.
2. Pā. IV-i-145.
3. Pā. IV-i-73.
4. P5. IV-i-112.
5. Pā. IV-i-34.
6. Pā. IV-i-85
7. Pā. IV-iv-104.
8. Pā. III-ii-52.
9. Pā. III-ii-64.
10. Pā. IV-iv-104.

अधृतौ रमणे[?] चैव क्रोधेऽप्यरतिरुच्यते ॥

अञ्चेः को वा ॥४. ६१ ॥ ब्रह्माग्नियज्ञपवनेष्वङ्कतिश्चाञ्चतिः पुमान् ॥ १८७ ॥

हन्तेरंह च ॥ ४. ६२ ॥ रथमांसार्थकालेषु दानेऽप्यंहतिरुच्यते ॥

रमेर्नित् ॥ ४. ६३ ॥ रमतिर्नायके नाके काले कामे च कथ्यते ॥ १८८ ॥

सूञः क्तिः ॥ ४. ६४ ॥ सूरिर्विदुषि सूरीति नान्तोऽप्येवं तु तद्भ्रमः ।
दशपाद्यां सुञो दीर्घश्चेत्युक्त्वा निर्द्विधीयते ॥ १८९ ॥
नकारो नानुबन्धोऽत्र प्रत्ययोऽन्यो ह्यनन्तरे ।
सूत्रे प्रस्तोष्यते नो चेत् लाघवात्किन् भवेदिह ॥१९०॥
दशपादीवृत्तिकृतो नितमेनं यदूचिरे ।
न तद्युक्तं श्रु. [ति]ष्वन्तोदात्तस्यैवात्र दर्शनात् ॥१९१॥

अदिशदिभूशुभिभ्यः क्रिन् ॥ ४. ६५ ॥ चत्वारो धातवः ॥
अद्रिः शैलद्रुमार्केषु शद्रिर्वज्रेभशर्करे[?] ।
भूरिर्ना वासुदेवे च शिवे च परमेष्ठिनि ॥ १९२ ॥
सुवर्णे तु भवेत्क्लीबं प्राज्ये स्याद्वाच्यलिङ्गकम् ।
शुभ्रिर्ब्रह्मणि सूर्ये ना शोभने त्वभिधेयवत् ॥ १९३ ॥

वङ्क्वादयश्च ॥४. ६६॥ गृहदारुणि पार्श्वास्थि वाद्यभेदे च दन्तुरे ।
वङ्क्रिः स्यात्कुटिले राजन्यप्येष कथितो बुधैः ॥१९४॥
वप्रिशब्दस्तु विद्वद्भिः क्षेत्रवाची निगद्यते ।
अङ्घ्रिस्तु चरणे बुध्ने सौत्रात्तन्द्रिः प्रमीलने ॥१९५॥
पक्षे तन्द्रीत्यपि भवेत्कृदिकारादिङीष्वशात् ।
गुणे बाहुलकाद्वेरिः स्त्रियां वाद्यान्तरे स्मृता ॥ १९६ ॥
वङ्क्वादय इमेऽन्येऽपि ज्ञेया एवंविधा बुधैः ॥

रात्र्यादिभ्यां त्रिण् ॥ ४. ६७ ॥ रात्रिः क्षपायां स्त्री रात्रिचररात्रिचरावुभौ ॥ १९७ ॥
रात्रेः कृतिविभाषेति मुंविकल्पेन राक्षसे ।
अहेस्सर्वैकदेशेति सूत्रेणाच्प्रत्ययस्मृतेः ॥ १९८ ॥

१. Pā. VI-iii-72. २. Pā. V-iv-87.

अहोरात्रः सर्वरात्रः पूर्वरात्र इतीह दिक् ।
एषां पुँलिङ्गता रात्रेराहाहाः पुंसीति शासनात् ॥ १९९ ॥
एकरात्रादिरात्रान्तं संख्यापूर्वं नपुंसकम् ।
निर्वृत्तादिषु रात्र्यन्तात् द्विगोरर्थेषु ठञ्खयोः ॥ २०० ॥
द्वैरात्रिकद्विरात्रीणौ रात्र्यहःसैत्रतः स्मृतौ ।
शत्रिर्नाम्भोधरे विष्णौ कुञ्जरेऽपि प्रकीर्तितः ॥ २०१ ॥

अदेः स्त्रिनिश्च ॥४. ६८॥ अत्री तु भक्षकेऽत्रिश्चादत्र सूत्रे त्रिपा मुनौ ।
ईत्रयानिञ इत्युक्तेरात्रेयोऽपत्यदृग्वशात् ॥ २०२ ॥
अत्रिर्भृग्वादिसूत्रेण बहुत्वे गोत्रलुग्विधेः ।
अत्रयोऽत्री न त्रिभिरित्यादीन्यूह्यानि पण्डितैः ॥ २०३ ॥
लक्ष्यस्वलायामात्रे [आत्रेय्यस्तु स्त्रियामत्र]
टिड्ढाणञ्इति ङीब्वशात् ।
अदेस्त्रिन्नित्यदेस्त्रिन्निच्चेति पाठौ त्वनाकरौ ॥ २०४ ॥

पतः त्रिन् ॥ ४. ६९ ॥ पतत्रिर्विहगे पुंसि विबुधैः परिकीर्तितः ।
इनौ पतत्रो[त्रात्] नान्तोऽपि पतत्री पक्षिवाचिनः ॥२०५

मृकणिभ्यामीचिः ॥ ४. ७० ॥ मरीचिः कृपणे दीप्तावृषिभेदे च दृश्यते ।
तदपत्ये तु मारीचिर्ह्रीदित्वादिञा भवेत् ॥ २०६ ॥
कणीचिः पुष्पितलताकुञ्जयोः शकटे स्त्रियाम् ।
पल्लवे पुष्पसङ्घाते निनादेऽश्वेऽपि चक्षुषि ॥ २०७ ॥

श्वयतेरिच् ॥ ४. ७१ ॥ श्वयीचिस्तु पुमानिन्द्रे श्वयथावपि कथ्यते ॥

वेरुो डिच्च ॥ ४. ७२ ॥ वीचिः स्वल्पतरङ्गे स्यादवकाशे सुखे द्वयोः ॥ २०८ ॥
नञ्समासे त्वयं वीचिरहिते नरकान्तरे ॥

ऋहनिभ्यामूषन् ॥ ४. ७३ ॥ अरूषस्तु भवेद्भानौ हनूषो राक्षसे स्मृतः ॥ २०९ ॥

पुरः कुषन् ॥ ४. ७४ ॥ पुरुषः पुरुषे सांख्यज्ञे च पुन्नागपादपे ।

१. Pā.II-iv-29.
२. Pā. V-i-87.
३. Pā. IV-i-122
४. Pā. II-iv-65.
५. Pā.IV-i-15.

दीर्घो यदि स्यादन्येषामपि दृश्यत इत्यतः ॥ २१० ॥
पूरुषेऽपि प्रयुज्येते मानभेदेऽप्यमू बुधैः ।

पुरुसंज्ञे शरीरेऽस्मिन् शयनात्पुरुषो हरः ॥ २११ ॥
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते ।

इत्यारभ्य पुराणोक्तैर्वासुदेवेऽप्ययं स्मृतः ॥ २१२ ॥
अण्यस्मात्पौरुषं तस्य भावे कर्मणि तेजसि ।

ऊर्ध्वविस्तृतदोःपाणि नृमानेऽपि च कथ्यते ॥ २१३ ॥
प्रमाणं सोऽस्य पुरुषद्वयसं पौरुषं च तत् ।

पुरुषस्य वधे तस्य विकारे तस्य संहतौ ॥ २१४ ॥
पुरुषेण कृते पौरुषेयं ढञि निगद्यते ।

प्रमाणपुरुषान्ताद् ङीब्वा तद्धितलुकि द्विगोः ॥२१५॥
तेन द्विपुरुषी ङीपि टापि द्विपुरुषा स्मृता ।

पृनहिकलिभ्य उषच् ॥ ४. ७५ ॥ परुषं कर्बुरे रूक्षे निष्ठुरोक्तौ च वाच्यवत् ॥ २१६ ॥
नहुषो राजभेदेऽपि छागभेदे भुजङ्गमे ।

कलुषं पातके क्लीबमाविले त्वभिधेयवत् ॥ २१७ ॥

पीयेरुषन् ॥ ४. ७६ ॥ पीयुधातुर्भक्षणार्थः सौत्र ऊषन्यतः कृति[कृते] ।
पीयूषं सप्तदिवसावधि क्षीरे तथामृते ॥ २१८ ॥
गुणे बाहुलकादस्य पेयूषोऽभिनवं पयः ॥

मस्जेर्नुं च ॥ ४. ७७ ॥ मञ्जूषा पेटके स्त्री स्याद्वीणाच्छादनके तुरी ॥२१९॥

गडेश्च ॥ ४. ७८ ॥ गण्डूषो मुखपूर्तीभपुष्करप्रसृतोन्नते ।
चमूषो धान्यलेह्ये स्यात् चमेर्बाहुलकादिह ॥ २२० ॥

अर्तेररुः ॥ ४. ७९ ॥ अररुस्त्वायुधे चैव शक्रे च परिकीर्तितः ॥

कुटः किच्च ॥ ४. ८० ॥ कुटरुर्वर्धका वस्त्रगेहेऽपि परिकीर्तितः ॥ २२१ ॥
कुटादिपरतालव्यङित्त्वेनैवात्र न क्रमे[?] ।
सिद्धे कित्त्वं....कटु.....वाचकम् ॥ २२२ ॥

शकादिभ्योऽटन् ॥ ४. ८१ ॥

पुंसि क्लीबे च कथितः शकटोऽनसि कोविदैः ।
स्यात्कङ्कटस्तु सन्नाहे देवटश्शिल्पिनि स्मृतः ॥२२३॥
करटो गजगण्डे स्यात्कुसुम्भे निन्द्यजीविनि ।
एकादशाहादिश्राद्धे दुर्दुरूटेऽपि वायसे ॥ २२४ ॥
करटी वाद्यभेदे स्त्री विबुधैः परिकीर्तिता ।
अवटाद्या इतोऽन्येऽपि ज्ञेया एवंविधा इह ॥ २२५ ॥
गोत्रे गर्गादिपठितादावटय्यस्त्ववटाद्यञि ।
औवटय्यश्चेति चाप्यस्मादावटय्येति स्त्रियां मता ॥२२६॥

कृकदिकडिकटिभ्योऽम्बच् ॥ ४. ८२ ॥

चत्वारो धातवः । कदिकडी मध्यौ द्वौ सौत्रौ ॥
करम्बस्तु स्मृतः पुंसि लब्धवर्णैर्विमिश्रिते ।
दधिसक्त्वर्थकत्वे तु करम्भ इति तुर्यतः ॥ २२७ ॥
कदम्बं निकुरुम्बे स्यान्नीपसर्षपयोः पुमान् ।
कदम्बी शाकभेदे स्यान्नीपसायकयोः पुमान् ॥ २२८ ॥
एतौ कदिकडी सौत्रधातू ज्ञेयौ मनीषिभिः ।
कडम्बः स्यादग्रभागे लडयोरेकतास्मृतेः ॥ २२९ ॥
[कटम्बशब्दो] वादित्रवाचकः पुंसि कथ्यते ।

कदेर्णित् पक्षिणि ॥ ४. ८३ ॥

